समदुःखसुखं राज्ञः सततं प्रियमास्थितम् ॥१५०॥
सरीसृपविहीनं च व्याघ्रतस्करवर्जितम् ।
एवंविधं यथालाभं राजा विषयमावसेत् ॥१५१॥
तत्र दुर्गं नृपः कुर्यात्षण्णामेकतमं बुधः ।
धनुर्दुर्गं महीदुर्गं नरदुर्गं तथैव च ॥१५२॥
वार्क्षं चैवाम्बुदुर्गं च गिरिदुर्गं च पार्थिव !
सर्वेषामेव दुर्गाणां गिरिदुर्गं प्रशस्यते ॥१५३॥
दुर्गं च परिखोपेतं वप्राट्टालकसंयुतम् ।
शतघ्नीयन्त्रमुख्यैश्च शतशश्च समावृतम ॥१५४॥
गोपुरं सकपाटं च तत्र स्यात्सुमनोहरम् ।
सपताकं गजारूढो येन राजा विशेत्पुरम् ॥१५५॥
चतस्रश्च तथा तत्र कार्यास्त्वायतवीथयः ।
एकस्मिंस्तत्र वीथ्यग्रे देववेश्म भवेद् दृढम् ॥१५६॥
वीथ्यग्रे च द्वितीये च राजवेश्म विधीयते ।
धर्माधिकरणं कार्यं वीथ्यग्रे च तृतीयके ॥१५७॥
चतुर्थे त्वथ वीथ्यग्रे गोपुरञ्च विधीयते ।
आयतं चतुरस्रं वा वृत्तं वा कारयेत्पुरम् ॥१५८॥
मुक्तिहीनं त्रिकोणं च यवमध्यं तथैव च ।
अर्धचन्द्रप्रकारं च वज्राकारं च कारयेत् ॥१५९॥
अर्धचन्द्रं प्रशंसन्ति नदीतीरेषु तद्वसन् ।
अन्यत्र तन्न कर्तव्यं प्रयत्नेन विजानता ॥१६०॥

राज्ञा कोशगृहं कार्यं दक्षिणे राजवेश्मनः ।
तस्यापि दक्षिणे भागे गजस्थानं विधीयते ॥१६१॥
गजानां प्राङ्मुखी शाला कर्तव्या वाऽप्युदङ्मुखी ।
आग्नेये च तथा भागे आयुधागारमिष्यते ॥१६२॥
महानसं च धर्मज्ञ ! कर्मशालास्तथा पराः ।
गृहं पुरोधसः कार्यं वामतो राजवेश्मनः ॥१६३॥
मन्त्रिवेदविदां चैव चिकित्साकर्तुरेव च ।
तत्रैव च तथा भागे कोष्ठागारं विधीयते ॥१६४॥
गवां स्थानं तथैवात्र तुरगाणां तथैव च ।
उत्तराभिमुखा श्रेणी तुरगाणां विधीयते ॥१६५॥
दक्षिणाभिमुखा वाऽथ परिशिष्टास्तु गर्हिताः ।
तुरगास्ते तथा धार्याः प्रदीपैः सार्वरात्रिकैः ॥१६६॥
कुक्कुटान्वानरांश्चैव मर्कटांश्च विशेषतः ।
धारयेदश्वशालासु सवत्सां धेनुमेव च ॥१६७॥
अजाश्च धार्या यत्नेन तुरगाणां हितैषिणा ।
गोगजाश्वादिशालासु तत्पुरीषस्य निर्गमः ॥१६८॥
अस्तं गते न कर्तव्यो देवदेवे दिवाकरे ।
तत्र तत्र यथास्थानं राजा विज्ञाय सारथीन ॥ ६९॥
दद्यादावसथस्थानं सर्वेषामनुपूर्वशः ।
योधानां शिल्पिनां चैव सर्वेषामविशेषतः ॥१७०॥
दद्यादावसथान्दुर्गे कालमन्त्रविदां शुभान् ।
गोवैद्यानश्ववैद्यांश्च गजवैद्यांस्तथैव च ॥१७१॥
आहरेत भृशं राजा दुर्गे हि प्रबला रुजः ।
कुशीलवानां विप्राणां दुर्गे स्थानं विधीयते ॥१७२॥
न बहूनामतो दुर्गे विना कार्यं तथा भवेत् ।
दुर्गे च तत्र क ेव्या नानाप्रहरणान्विताः ॥१७३॥
सहस्रघातिनो राजंस्तैस्तु रक्षा विधीयते ।
दुर्गे द्वाराणि गुप्तानि कार्याण्यपि च भूभुजा ॥१७४॥
सञ्चयश्चात्र सर्वेषामायुधानां प्रशस्यते ।
धनुषां क्षेपणीयानां तोमराणां च पार्थिव ! ॥१७५॥

शराणामथ खड्गानां कवचानां तथैव च ।
लगुडानां गुडानां च हुडानां परिघैः सह ॥१७६॥
अश्मनां च प्रभूतानां मुद्गराणां तथैव च ।
त्रिशूलानां पट्टिशानां कुठाराणां च पार्थिव! ॥१७७॥
प्रासानां च सशूलानां शक्तिनां च नरोत्तम!
परश्वधानां चक्राणां वर्मणां चर्मभिः सह ॥१७८॥
कुद्दालरज्जुवेत्राणां पीठकानां तथैव च ।
तुषाणां चैव दात्राणामङ्गाराणां च संचयः ॥१७९॥
सर्वेषां शिल्पिभाण्डानां संचयश्चात्र चेष्यते ।
वादित्राणां च सर्वेषामोषधीनां तथैव च ॥१८०॥
यवसानां प्रभूतानामिन्धनस्य च संचयः ।
गुडस्य सर्वतैलानां गोरसानां तथैव च ॥१८१॥
वसानामथ मज्जानां स्नायूनामस्थिभिः सह ।
गोचर्मपटहानां च धान्यानां सर्वतस्तथा ॥१८२॥
तथैवाभ्रपटानां च यवगोधूमयोरपि ।
रत्नानां सर्ववस्त्राणां लोहानामप्यशेषतः ॥१८३॥
कलायमुद्गमाषाणां चणकानां तिलैः सह ।
तथा च सर्वसस्यानां पांसुगोमययोरपि ॥१८४॥
शणसर्जरसं भूर्जं जतु लाक्षा च टङ्कणम् ।
राजा संचिनुयाद् दुर्गे यच्चान्यदपि किञ्चन ॥१८५॥
कुम्भाश्चाशीविषैः कार्या व्यालसिंहादयस्तथा ।
मृगाश्च पक्षिणश्चैव रक्ष्यास्ते च परस्परम् ॥१८६॥
स्थानानि च विरुद्धानां सुगुप्तानि पृथक् पृथक् ।
कर्त्तव्यानि महाभाग! यत्नेन पृथिवीक्षिता ॥१८७॥
उक्तानि चाप्यनुक्तानि राजद्रव्याण्यशेषतः ।
सुगुप्तानि पुरे कुर्याज्जनानां हितकाम्यया ॥१८८॥
जीवकर्षभकाकोलमामलक्याटरूषकान् ।
शालपर्णी पृश्निपर्णी मुद्गपर्णी तथैव च ॥१८९॥
माषपर्णी च मेदे द्वे शारिवे द्वे बलात्रयम् ।
वीरा श्वसन्ती वृष्या च बृहती कण्टकारिका ॥१९०॥

शृङ्गी शृङ्गाटकी द्रोणी वर्षाभूर्दर्भरेणुका ।
मधुपर्णी विदार्यौ द्वे महाक्षीरा महातपाः ॥१९१॥
धन्वनः सहदेवाह्वा कण्टुकैरण्डकं विषः ।
पर्णी शताह्वा मृद्वीका फल्गुखर्जूरयष्टिकाः ॥१९२॥
शुक्रातिशुक्रकाश्मर्यश्छत्रातिच्छत्रवीरणाः ।
इक्षुरिक्षुविकाराश्च फाणिताद्याश्च सत्तम ! ॥१९३॥
सिंही च सहदेवी च विश्वेदेवाश्वरोधकम् ।
मधुकं पुष्पहंसाख्या शतपुष्पा मधूलिका ॥१९४॥
शतावरीमधूके च पिप्पलं तालमेव च ।
आत्मगुप्ता कट्फलाख्या दार्विका राजशीर्षकी ॥१९५॥
राजसर्षपधान्याकमृष्यप्रोक्ता तथोत्कटा ।
कालशाकं पद्मबीजं गोवल्ली मधुवल्लिका ॥१९६॥
शीतपाकी कुलिङ्गाक्षी काकजिह्वोरुपुष्पिका ।
पर्वतत्रपुसौ चोभौ गुञ्जातकपुनर्नवे ॥१९७॥
कसेरुका तु काश्मीरी बिल्वशालूककेसरम् ।
शूकधान्यानि सर्वाणि शमीधान्यानि चैव हि ॥१९८॥
क्षीरं क्षौद्रं तथा तक्रं तैलं मज्जा वसाघृतम् ।
नीपश्चारिष्टकक्षोडवातामासोमबाणकम् ॥१९९॥
एवमादीनि चान्यानि विज्ञेयो मधुरो गणः ।
राजा संचिनुयात्सर्वं पुरे निरवशेषतः ॥२००॥
दाडिमाम्रातकौ चैव तिन्तिडीकाम्लवेतसम् ।
भव्यकर्कन्धुलकुचकरमर्दकरूपकम् ॥२०१॥
बीजपूरककण्डूरे मालती राजबन्धुकम् ।
कोलकद्वयपर्णानि द्वयोराम्रातयोरपि ॥२०२॥
परावतं नागरकं प्राचीनारुकमेव च ।
कपित्थामलकं चुक्रफलं दन्तशठस्य च ॥२०३॥
जाम्बवं नवनीतञ्च सौवीरकतुषोदके ।
सुरासवं च मद्यानि मण्डतक्रदधीनि च ॥२०४॥
शुक्लानि चैव सर्वाणि ज्ञेयमाम्लगणं द्विज !
एवमादीनि चान्यानि राजा संचिनुयात्पुरे ॥२०५॥

सैन्धवोद्भिद्पाठेयपाक्यसामुद्रलोमकम् ।
कुप्यसौवर्चलाबिल्वं बालकेयं यवाह्वकम् ॥२०६॥
औवं क्षारं कालभस्म विज्ञेयो लवणो गणः ।
एवमादीनि चान्यानि राजा संचिनुयात्पुरे ॥२०७॥
पिप्पली पिप्पलीमूलचव्यचित्रकनागरम् ।
कुबेरकं च मरिचं शिग्रुभल्लातसर्षपाः ॥२०८॥
कुष्ठाजमोदा किणिही हिङ्गुमूलकधान्यकम् ।
कारवी कुञ्चिका याज्या सुमुखा कलमालिका ॥२०९॥
फणिज्झकोऽथ लशुनं भूस्तृणं सुरसं तथा ।
कायस्था च वयःस्था च हरितालं मनःशिला ॥२१०॥
अमृता च रुदन्ती च रोहिषं कुङ्कुमं तथा ।
जया एरण्डकाण्डीरं शल्लकी हञ्जिका तथा । ॥२११॥
सर्वपित्तानि मूत्राणि प्रायो हरितकानि च ।
संगतानि च मूलानि यष्टिश्चातिविषाणि च ॥२१२॥
फलानि चैव हि तथा सूक्ष्मैला हिंगुपत्रिका ॥२१३॥
एवमादीनि चान्यानि गणः कटुकसंज्ञितः ।
राजा संचिनुयाद् दुर्गे प्रयत्नेन नृपोत्तम ! ॥२१४॥
मुस्तं चन्दनह्रीबेरकृतमालकदारवः ।
हरिद्रानलदोशीरनक्तमालकदम्बकम् ॥२१५॥
दूर्वा पटोलकटुका दन्तीत्वक्पत्रकं त्वचा ।
किराततिक्तभूतुम्बी विषा चातिविषा तथा ॥२१६॥
तालीसपत्रतगरं सप्तपर्णविकङ्कताः ।
काकोदुम्बरिका दिव्यास्तथा चैव सुरोद्भवा ॥२१७॥
षड्ग्रन्था रोहिणी मांसी पर्पटश्चाथ दन्तिका ।
रसाञ्जनं भृङ्गराजं पतङ्गी परिपेलवम् ॥२१८॥
दुःस्पर्शा गुरुणी कामा श्यामाकं गन्धनाकुली ।
तुषपर्णी व्याघ्रनखं मञ्जिष्ठा चतुरङ्गुला ॥२१९॥
रम्भा चैवाङ्कुरास्फोता तालास्फोता हरेणुका ।
वेताग्रवेतसस्तुम्बी विषाणी लोध्रपुष्पिणी ॥२२०॥
मालतीकरकृष्णाख्या वृश्चिका जीविता तथा ।

पर्णिका च गुडूची च स गणस्तिक्तसंज्ञकः ॥२२१॥
एवमादीनि चान्यानि राजा संचिनुयात्पुरे ।
अभयामलके चोभे तथैव च बिभीतकम् ॥२२२॥
प्रियङ्गुधातकीपुष्पं मोचाख्या चार्जुनासनाः ।
अनन्ता स्त्री तुवरिका श्योणाकं कट्फलं तथा ॥२२३॥
भूर्जपत्रं शिलापत्रं पाटलापत्रलोमकम् ।
समङ्गात्रिवृतामूलकार्पासगैरिकाञ्जनम् ॥२२४॥
विद्रुमं समधूच्छिष्टं कुम्भिका कुमुदोत्पलम् ।
न्यग्रोधोदुम्बराश्वत्थकिंशुकाः शिंशपा शमी ॥२२५॥
प्रियालपीलुकासारीशिरीषाः पद्मकं तथा ।
बिल्वोऽग्निमन्यः लक्षश्च श्यामाकं च बको घनम् ॥२२६॥
राजादनं करीरं च धान्यकं प्रियकस्तथा ।
कङ्कोलाशोकबदराः कदम्बखदिरद्वयम् ॥२२७॥
एषां पत्राणि साराणि मूलानि कुसुमानि च ।
एवमादीनि चान्यानि कषायाख्यो गणो मतः ॥२२८॥
प्रयत्नेन नृपश्रेष्ठ ! राजा संचिनुयात्पुरे ।
कीटाश्च मारणे योग्या व्यङ्गतायां तथैव च ॥२२९॥
वातधूमाम्बुमार्गाणां दूषणानि तथैव च ।
धार्याणि पार्थिवैर्दुर्गे तानि वक्ष्यामि पार्थिव ! ॥२३०॥
विषाणां धारणं कार्यं प्रयत्नेन महीभुजा ।
विचित्राश्चागदा धार्या विषस्य शमनास्तथा ॥२३१॥
रक्षोभूतपिशाचघ्नाः पापघ्नाः पुष्टिवर्धनाः ।
कलाविदश्च पुरुषाः पुरे धार्याः प्रयत्नतः ॥२३२॥
भीतान्प्रमत्तान्कुपितांस्तथैव च विमानितान् ।
कुभृत्यान्पापशीलांश्च न राजा वासयेत्पुरे ॥२३३॥
यन्त्रायुधाट्टालचयोपपन्नं
समग्रधान्यौषधिसम्प्रयुक्तम् ।
वणिग्जनैश्चावृतमावसेत
दुर्गं सुगुप्तं नृपतिः सदैव ॥२३४॥

इति श्रीमत्स्ये महापुराणे राजधर्मे राज्ञामोषध्यादिसंचयकथनं नाम सप्तदशाधिकद्विशततमोऽध्यायः ॥

अथाष्टादशाधिकद्विशततमोऽध्यायः ।

मनुरुवाच—

रक्षोघ्नानि विषघ्नानि यानि धार्याणि भूभुजा ।
अगदानि समाचक्ष्व तानि धर्मभृतां वर ! ॥२३५॥

मत्स्य उवाच—

बिल्वाटकी यवक्षारं पाटला बाह्लिकोषणा ।
श्रीपर्णी शल्लकीयुक्तो निक्काथः प्रोक्षणं परम् ॥२३६॥
सविषं प्रोक्षितं तेन सद्यो भवति निर्विषम् ।
यवसैन्धवपानीयवस्त्रशय्यासनोदकम् ॥२३७॥
कवचाभरणं छत्रं बालव्यजनवेश्मनाम् ।
शेलुः पाटल्यतिविषा शिग्रुमूर्वा पुनर्नवा ॥२३८॥
समङ्गा वृषमूलं च कपित्थवृषशोषितम् ।
महादन्तशठं तद्वत्प्रोक्षणं विषनाशनम् ॥२३९॥
लाक्षाप्रियङ्गुमञ्जिष्ठाः सममेला हरेणुका ।
यष्ट्याह्वा मधुरा चैव बभ्रुपित्तेन कल्पिताः ॥२४०॥
निखनेद्गोविषाणस्थं सप्तरात्रं महीतले ।
ततः कृत्वा मणिं हेम्ना बद्धं हस्तेन धारयेत् ॥ २४१॥
संसृष्टं सविषं तेन सद्यो भवति निर्विषम् ।
मनोह्वया शमीपत्रं तुम्बिका श्वेतसर्षपाः ॥२४२॥
कपित्थकुष्ठमञ्जिष्ठाः पित्तेन श्लक्ष्णकल्पिताः ।
शुनो गोः कपिलायाश्च सौम्याक्षिप्तोऽपरो गदः ॥२४३॥
विषजित्परमं कार्यं मणिरत्नं च पूर्ववत् ।
मूषिका जतुका चापि हस्ते बद्ध्वा विषापहा ॥२४४॥
हरेणुमांसी मञ्जिष्ठा रजनी मधुका मधु ।
अक्षत्वक्सुरसे लाक्षा श्वपित्तं पूर्ववद्भुवि ॥२४५॥
वादित्राणि पताकाश्च पिष्टैरेतैः प्रलेपिताः ।
श्रुत्वा दृष्ट्वा समाघ्राय सद्यो भवति निर्विषः ॥२४६॥
त्र्यूषणं पञ्चलवणं मञ्जिष्ठा रजनीद्वयम् ।
सूक्ष्मैला त्रिवृतापत्रं विडङ्गानीन्द्रवारुणी ॥२४७॥

मधुकं वेतसं क्षौद्रं विषाणे च निधापयेत् ।
तस्मादुष्णाम्बुना मात्रं प्रागुक्तं योजयेत्ततः ॥२४८॥
विषभुक्तं जरं याति निर्विषं पित्तदोषकृत् ।
शुक्लं सर्जरसोपेतं सर्षपा एलवालुकैः ॥२४९॥
सुवेगा तस्करसुरौ कुसुमैरर्जुनस्य तु ।
धूपो वासगृहे हन्ति विषं स्थावरजङ्गमम् ॥२५०॥
न तत्र कीटा न विषं दर्दुरा न सरीसृपाः ।
न कृत्या कर्मणां चापि धूपोऽयं यत्र दह्यते ॥२५१॥
कल्पितैश्चन्दनक्षीरपलाशद्रुमवल्कलैः ।
मूर्वैलावालुसरसानाकुलीतण्डुलीयकैः ॥२५२॥
क्काथः सर्वोदकार्येपु काकमाचीयुतो हितः ।
रोचनापत्रनेपालीकुङ्कुमैस्तिलकान्वहन् ॥२५३॥
विषैर्न बाध्यतेऽस्माच्च नरनारीनृपप्रियः ।
चूर्णैर्हरिद्रामञ्जिष्ठाकिणिहीकणनिम्बजैः ॥२५४॥
दिग्धं निर्विषतामेति गात्रं सर्वविषार्दितम् ।
शिरीषस्य फलं पत्रं पुष्पं त्वङ्मूलमेव च ॥ २५५॥
गोमूत्रघृष्टो ह्यगदः सर्वकर्मकरः स्मृतः ।
एकवीरमहौषध्यः शृणु चातः परं नृप ! ॥२५६॥
वन्ध्या कर्कोटकी राजन्! विष्णुक्रान्ता तथोत्कटा।
शतमूली सितानन्दा बला मोचा पटोलिका ॥२५७॥
सोमा पिण्डा निशा चैव तथा दग्धरुहा च या ।
स्थले कमलिनी या च विशाली शङ्खमूलिका ॥२५८॥
चाण्डाली हस्तिमगधा गोजापर्णी करम्भिका ।
रक्ता चैव महारक्ता तथा बर्हिशिखा च या ॥२५९॥
कोशातकी नक्तमालं प्रियालं च सुलोचनी ।
वारुणी वसुगन्धा च तथा वै गन्धनाकुली ॥२६०॥
ईश्वरी शिवगन्धा च श्यामला वंशनालिका ।
जतुकाली महाश्वेता श्वेता च मधुयष्टिका ॥२६१॥
वज्रकः पारिभद्रश्च तथा वै सिन्धुवारकाः ।
जीवानन्दा वसुच्छिद्रा नतनागरकण्टका ॥२६२॥

नालं च जाली जाती च तथा च वटपत्रिका ।
कार्तस्वरं महानीला कुन्दुरुर्हंसपादिका ॥२६३॥
मण्डूकपर्णी वाराही द्वे तथा तण्डुलीयके ।
सर्पाक्षी लवली ब्राह्मी विश्वरूपा सुखाकरा ॥२६४॥
रुजापहा वृद्धिकरी तथा चैव तु शल्यदा ।
पत्रिका रोहिणी चैव रक्तमाला महौषधी ॥२६५॥
तथाऽऽमलकवन्दाकं श्यामचित्रफला च या ।
काकोली क्षीरकाकोली पीलुपर्णी तथैव च ॥२६६॥
केशिनी वृश्चिकाली च महानागा शतावरी ।
गरुडी च तथा वेगा जले कुमुदिनी तथा ॥२६७॥
स्थले चोत्पलिनी या च महाभूमिलता च या ।
उन्मादिनी सोमराजी सर्वरत्नानि पार्थिव ! ॥२६८॥
विशिखाऽमरकन्या च कीटपक्षं विशेषतः ।
जीवजाताश्च मणयः सर्वे धार्याः प्रयत्नतः ॥२६९॥
रक्षोघ्नाश्च विषघ्नाश्च कृत्या वैतालनाशनाः ।
विशेषान्नरनागाश्च गोखरोष्ट्रसमुद्भवाः ॥२७०॥
सर्पतित्तिरगोमायुबभ्रमण्डुकजाश्च ये ।
सिंहव्याघ्रर्क्षमार्जारद्वीपिवानरसम्भवाः ॥२७१॥
कपिञ्जला गजा वाजिमहिषैणभवाश्च ये ॥२७२॥
इत्येवमेतैः सकलैरुपेतैर्द्रव्यैः परार्घ्यैः परिरक्षितः स्यात् ।
राजा वसेत्तत्र गृहे सुशुभ्रे गुणान्विते लक्षणसम्प्रयुक्ते ॥२७३॥

इति श्रीमात्स्ये महापुराणेऽगदाध्यायो नामाष्टादशाधिकद्विशततमोऽध्यायः ।

अथैकोनविंशत्यधिकद्विशततमोऽध्यायः ।

मनुरुवाच—

राजरक्षारहस्यानि यानि दुर्गे निधापयेत् ।
कारयेद्वा महीभर्ता ब्रूहि तत्त्वानि तानि मे ॥२७४॥

मत्स्य उवाच—

शिरीषोदुम्बरशमीबीजपूरं घृतप्लुतम् ।
क्षुद्योगः कथितो राजन् ! मासार्धस्य पुरातनैः ॥२७५॥

कशेरुफलमूलानि इक्षुमूलं तथा विषम् ।
दूर्वाक्षीरघृतैर्मण्डः सिद्धोयं मासिकः परः ॥२७६॥
नरं शस्त्रहतं प्राप्तो न तस्य मरणं भवेत् ।
कल्माषवेणुना तत्र जनयेत् तु विभावसुम् ॥२७७॥
गृहे त्रिरपसव्यं तु क्रियते यत्र पार्थिव !
नान्योऽग्निर्ज्वलते तत्र नात्र कार्या विचारणा ॥२७८॥
कार्पासास्थि भुजङ्गस्य तेन निर्मोचनं भवेत् ।
सर्पनिर्वासने धूपः प्रशस्तः सततं गृहे ॥२७९॥
सामुद्रसैन्धवयवा विद्युद्दग्धा च मृत्तिका ।
तयानुलिप्तं यद्वेश्म नाग्निना दह्यते नृप ! ॥२८०॥
दिवा च दुर्गे रक्ष्योऽग्निर्वाति वाते विशेषतः ।
विषाच्च रक्ष्यो नृपतिस्तत्र युक्तिं निबोध मे ॥२८१॥
क्रीडानिमित्तं नृपतिर्धारयेन्मृगपक्षिणः ।
अन्नं वै प्राक् परीक्षेत वह्नौ चान्यतरेषु च ॥२८२॥
वस्त्रं पुष्पमलङ्कारं भोजनाच्छादनं तथा ।
नापरीक्षितपूर्वं तु स्पृशेदपि महीपतिः ॥२८३॥
स्याच्चासौ वक्त्रसंतप्तः सोद्वेगं च निरीक्षते ।
विषदोऽथ विषं दत्तं यच्च तत्र परीक्षते ॥२८४॥
स्रस्तोत्तरीयो विमनाः स्तम्भकुड्यादिभिस्तथा ।
प्रच्छादयति चाऽऽत्मानं लज्जते त्वरते तथा ॥२८५॥
भुवं विलिखति ग्रीवां तथा चालयते नृप !
कण्डूयति च मूर्धानं परिलोड्याननं तथा ॥२८६॥
क्रियासु त्वरितो राजन् ! विपरीतास्वपि ध्रुवम् ।
एवमादीनि चिह्नानि विषदस्य परीक्षयेत् ॥२८७॥
समीपैर्विक्षिपेद्वह्नौ तदन्नं त्वरयान्वितः ।
इन्द्रायुधसवर्णं तु रूक्षं स्फोटसमन्वितम् ॥२८८॥
एकावर्तं तु दुर्गन्धि भृशं चटचटायते ।
तद्धूमसेवनाज्जन्तोः शिरोरोगश्च जायते ॥२८९॥
सविषेऽन्ने विलीयन्ते नच पार्थिव ! मक्षिकाः ।
विलीनाश्च विपद्यन्ते संस्पृष्टे सविषे तथा ॥२९०॥

विरज्यति चकोरस्य दृष्टिः पार्थिवसत्तम !
विकृतिं च स्वरो याति कोकिलस्य तथा नृप !२६१॥
गतिः स्खलति हंसस्य भृङ्गराजश्च कूजति ।
क्रौञ्चो मदमथाभ्येति कृकवाकुर्विरौति च ॥२६२॥
विक्रोशति शुको राजन् ! सारिका वमते ततः ।
चामीकरोऽन्यतो याति मृत्युं कारण्डवस्तथा ॥२६३॥
मेहते वानरो राजन् ! ग्लायते जीवजीवकः ।
हृष्टरोमा भवेद् बभ्रुः पृषतश्चैव रोदिति ॥२६४॥
हर्षमायाति च शिखी विषसन्दर्शनान्नृप !
अन्नं च सविषं राजंश्चिरेण च विपद्यते ॥२६५॥
तदा भवति निःश्राव्यं पक्वपर्युषितोपमम् ।
व्यापन्नरसगन्धं च चन्द्रिकाभिस्तथा युतम् ॥२६६॥
व्यञ्जनानां तु शुष्कत्वं द्रवाणां बुद्बुदोद्भवः ।
ससैन्धवानां द्रव्याणां जायते फेनमालिता ॥२६७॥
सस्यराजिश्च ताम्रा स्यान्नीला च पयसस्तथा ।
कोकिलाभा च मद्यस्य तोयस्य च नृपोत्तम ! ॥२६८॥
धान्याम्लस्य तथा कृष्णा कपिला कोद्रवस्य च ।
मधुश्यामा च तक्रस्य नीला पीता तथैव च ॥२६९॥
घृतस्योदकसंकाशा कपोताभा च मस्तुनः ।
हरिता माक्षिकस्यापि तैलस्य च तथारुणा ॥३००॥
फलानामप्यपक्वानां पाकः क्षिप्रं प्रजायते ।
प्रकोपश्चैव पक्वानां माल्यानां म्लानता तथा ॥३०१॥
मृदुता कठिनानां स्यान्मृदूनां च विपर्ययः ।
सूक्ष्माणां रूपदलनं तथा चैवातिरञ्जता ॥३०२॥
श्याममण्डलता चैव वस्त्राणां वै तथैव च ।
लोहानां च मणीनां च मलपङ्कोपदिग्धता ॥३०३॥
अनुलेपनगन्धानां माल्यानां च नृपोत्तम !
विगन्धता च विज्ञेया वर्णानां म्लानता तथा ॥३०४॥
पीतावभासता ज्ञेया तथा राजञ्जलस्य तु ॥३०५॥
दन्ता ओष्ठौ त्वचः श्यामास्तनुसत्त्वास्तथैव च ।

एवमादीनि चिह्नानि विज्ञेयानि नृपोत्तम ! ॥३०६॥
तस्माद्राजा सदा तिष्ठेन्मणिमन्त्रौषधागदैः ।
उक्तैः संरक्षितो राजा प्रमादपरिवर्जकः ॥३०७॥
प्रजातरोर्मूलमिहावनीश-
स्तद्रक्षणाद्राष्ट्रमुपैति वृद्धिम् ।
तस्मात्प्रयत्नेन नृपस्य रक्षा
सर्वेण कार्या रविवंशचन्द्र ! ॥३०८॥

इति श्रीमात्स्ये महापुराणे राजधर्मे राजरक्षा नामैकोनविंशत्यधिक-
द्विशततमोऽध्यायः ।

अथ विंशत्यधिकद्विशततमोऽध्यायः ।

मत्स्य उवाच—

राजन् ! पुत्रस्य रक्षा च कर्तव्या पृथिवीक्षिता ।
आचार्यश्चात्र कर्तव्यो नित्ययुक्तश्च रक्षिभिः ॥३०९॥
धर्मकामार्थशास्त्राणि धनुर्वेदं च शिक्षयेत् ।
रथे च कुञ्जरे चैनं व्यायामं कारयेत्सदा ॥३१०॥
शिल्पानि शिक्षयेच्चैनं नाप्तैर्मिथ्याप्रियं वदेत् ।
शरीररक्षाव्याजेन रक्षिणोऽस्य नियोजयेत् ॥३११॥
न चास्य सङ्गो दातव्यः क्रुद्धलुब्धावमानितैः ।
तथा च विनयेदेनं यथा यौवनगोचरे ॥३१२॥
इन्द्रियैर्नापकृष्येत सतां मार्गात्सुदुर्गमात् ।
गुणाधानमशक्यं तु यस्य कर्तुं स्वभावतः ॥३१३॥
बन्धनं तस्य कर्तव्यं गुप्तदेशे सुखान्वितम् ।
अविनीतकुमारं हि कुलमाशु विशीर्यते ॥३१४॥
अधिकारेषु सर्वेषु विनीतं विनियोजयेत् ।
आदौ स्वल्पे ततः पश्चात्क्रमेणाथ महत्स्वपि ॥३१५॥
मृगया पानमक्षांश्च वर्जयेत्पृथिवीपतिः ।
एतांस्तु सेवमानास्तु विनष्टाः पृथिवीक्षितः ॥३१६॥
बहवो नृपशार्दूल ! तेषां संख्या न विद्यते ।
वृथाटनं दिवास्वप्नं विशेषेण विवर्जयेत् ॥३१७॥

वाक्पारुष्यं न कर्तव्यं दण्डपारुष्यमेव च ।
परोक्षनिन्दा च तथा वर्जनीया महीक्षिता ॥३१८॥
अर्थस्य दूषणं राजा द्विप्रकारं विवर्जयेत् ।
अर्थानां दूषणं चैकं तथार्थेषु च दूषणम् ॥३१९॥
प्राकाराणां समुच्छेदो दुर्गादीनामसत्क्रिया ।
अर्थानां दूषणं प्रोक्तं विप्रकीर्णत्वमेव च ॥३२०॥
अदेशकाले यद्दानमपात्रे दानमेव च ।
अर्थेषु दूषणं प्रोक्तमसत्कर्मप्रवर्तनम् ॥३२१॥
कामः क्रोधो मदो मानो लोभो हर्षस्तथैव च ।
एते वर्ज्याः प्रयत्नेन सादरं पृथिवीक्षिता ॥३२२॥
एतेषां विजयं कृत्वा कार्यो भृत्यजयस्ततः ।
कृत्वा भृत्यजयं राजा पौराञ्जानपदाञ्जयेत् ॥३२३॥
कृत्वा च विजयं तेषां शत्रून्बाह्यांस्ततो जयेत् ।
बाह्याश्च त्रिविधा ज्ञेयास्तुल्याभ्यन्तरकृत्रिमाः ॥३२४॥
गुरवस्ते यथापूर्वं तेषु यत्नपरो भवेत् ।
पितृपैतामहं मित्रममित्रं च तथा रिपोः ॥३२५॥
कृत्रिमं च महाभाग ! मित्रं त्रिविधमुच्यते ।
तथाऽपि च गुरुः पूर्वं भवेत्तत्रापि चाऽऽदृतः ॥३२६॥
स्वाम्यमात्यो जनपदो दुर्गं दण्डस्तथैव च ।
कोशो मित्रं च धर्मज्ञ ! सप्ताङ्गं राज्यमुच्यते ॥३२७॥
सप्ताङ्गस्यापि राज्यस्य मूलं स्वामी प्रकीर्तितः ।
तन्मूलत्वात्तथाङ्गानां स तु रक्ष्यः प्रयत्नतः ॥३२८॥
षडङ्गरक्षा कर्तव्या तथा तेन प्रयत्नतः ।
अङ्गेभ्यो यस्तथैकस्य द्रोहमाचरतेऽल्पधीः ॥३२९॥
वधस्तस्य तु कर्तव्यः शीघ्रमेव महीक्षिता ।
न राज्ञा मृदुना भाव्यं मृदुर्हि परिभूयते ॥३३०॥
न भाव्यं दारुणेनातितीक्ष्णादुद्विजते जनः ।
काले मृदुर्यो भवति काले भवति दारुणः ॥३३१॥
राजा लोकद्वयापेक्षी तस्य लोकद्वयं भवेत् ।
भृत्यैः सह महीपालः परिहासं विवर्जयेत् ॥३३२॥

भृत्याः परिभवन्तीह नृपं हर्षवशं गतम् ।
व्यसनानि च सर्वाणि भूपतिः परिवर्जयेत् ॥३३३॥
लोकसंग्रहणार्थाय कृतकव्यसनी भवेत् ।
शौण्डीरस्य नरेन्द्रस्य नित्यमुद्रिक्तचेतसः ॥३३४॥
जना विरागमायान्ति सदा दुःसेव्यभावतः ।
स्मितपूर्वाभिभाषी स्यात्सर्वस्यैव महीपतिः ॥३३५॥
वध्येष्वपि महाभाग ! भ्रुकुटिं न समाचरेत् ।
भाव्यं धर्मभृतां श्रेष्ठ ! स्थूललक्ष्येण भूभुजा ॥३३६॥
स्थूललक्ष्यस्य वशगा सर्वा भवति मेदिनी ।
अदीर्घसूत्रश्च भवेत्सर्वकर्मसु पार्थिवः ॥३३७॥
दीर्घसूत्रस्य नृपतेः कर्महानिर्ध्रुवं भवेत् ।
रागे दर्पे च माने च द्रोहे पापे च कर्मणि ॥३३८॥
अप्रिये चैव कर्तव्ये दीर्घसूत्रः प्रशस्यते ।
राज्ञा संवृतमन्त्रेण सदा भाव्यं नृपोत्तम ! ॥३३९॥
तस्यासंवृतमन्त्रस्य राज्ञः सर्वापदो ध्रुवम् ।
कृतान्येव तु कार्याणि ज्ञायन्ते यस्य भूपतेः ॥३४०॥
नारब्धानि महाभाग ! तस्य स्याद्वसुधा वशे ।
मन्त्रमूलं सदा राज्यं तस्मान्मन्त्रः सुरक्षितः ॥३४१॥
कर्तव्यः पृथिवीपालैर्मन्त्रभेदभयात्सदा ।
मन्त्रवित्साधितो मन्त्रः संपत्तीनां सुखावहः ॥३४२॥
मन्त्रच्छलेन बहवो विनष्टाः पृथिवीक्षितः ।
आकारैरिङ्गितैर्गत्या चेष्टया भाषितेन च ॥३४३॥
नेत्रवक्त्रविकारैश्च गृह्यतेऽन्तर्गतं मनः ।
न यस्य कुशलैस्तस्य वशे सर्वा वसुन्धरा ॥३४४॥
भवतीह महीभर्तुः सदा पार्थिवनन्दन !
नैकस्तु मन्त्रयेन्मन्त्रं राजा न बहुभिस्सह ॥३४५॥
नाऽऽरोहेद्विषमां नावमपरीक्षितनाविकाम् ।
ये चास्य भूमिजयिनो भवेयुः परिपन्थिनः ॥३४६॥
तानानयेद्वशे सर्वान् सामादिभिरुपक्रमैः ।
यथा न स्यात्कृशीभावः प्रजानामनवेक्षया ॥३४७॥

तथा राज्ञा प्रकर्तव्यं स्वराष्ट्रं परिरक्षता ।
मोहाद्राजा स्वराष्ट्रं यः कर्शयत्यनवेक्षया ॥३४८॥
सोऽचिराद्भ्रश्यते राज्याज्जीविताच्च सबान्धवः ।
भृतो वत्सो जातबलः कर्मयोग्यो यथा भवेत् ॥३४९॥
तथा राष्ट्रं महाभाग! भृतं कर्मसहं भवेत् ।
यो राष्ट्रमनुगृह्णाति राज्यं स परिरक्षति ॥३५०॥
संजातमुपजीवेत्तु विन्दते स महत्फलम् ।
राष्ट्राद्धिरण्यं धान्यं च महीं राजा सुरक्षिताम् ॥३५१॥
महता तु प्रयत्नेन स्वराष्ट्रस्य च रक्षिता ।
नित्यं स्वेभ्यः परेभ्यश्च यथा माता यथा पिता ॥३५२॥
गोपितानि सदा कुर्यात्संयतानीन्द्रियाणि च ।
अजस्रमुपयोक्तव्यं फलं तेभ्यस्तथैव च ॥३५३॥
सर्वं कर्मेदमायत्तं विधाने दैवमानुषे ।
तयोर्दैवमचिन्त्यं च पौरुषे विद्यते क्रिया ॥३५४॥
एवं महीं पालयतोऽस्य भर्तु-
लोकानुरागः परमो भवेत्तु ।
लोकानुरागप्रभवा च लक्ष्मी-
र्लक्ष्मीवतश्चापि परा च कीर्तिः ॥३५५॥

इति श्रीमात्स्ये महापुराणे राजधर्मानुकीर्तने विंशत्यधिकद्विशततमोऽध्यायः ।

अथैकविंशत्यधिकद्विशततमोऽध्यायः ।

मनुरुवाच—

दैवे पुरुषकारे च किं ज्यायस्तद् ब्रवीहि मे ।
अत्र मे संशयो देव! छेत्तुमर्हस्यशेषतः ॥३५६॥

मत्स्य उवाच—

स्वमेव कर्म दैवाख्यं विद्धि देहान्तरार्जितम् ।
तस्मात्पौरुषमेवेह श्रेष्ठमाहुर्मनीषिणः ॥३५७॥
प्रतिकूलं तथा दैवं पौरुषेण विहन्यते ।
मङ्गलाचारयुक्तानां नित्यमुत्थानशालिनाम् ॥३५८॥

येषां पूर्वकृतं कर्म सात्विकं मनुजोत्तम !
पौरुषेण विना तेषां केषाञ्चिद् दृश्यते फलम् ॥३५९॥
कर्मणः प्राप्यते लोके राजसस्य तथा फलम् ।
कृच्छ्रेण कर्मणा विद्धि तामसस्य तथा फलम् ॥३६०॥
पौरुषेणाप्यते राजन्! प्रार्थितव्यं फलं नरैः ।
दैवमेव विजानन्ति नराः पौरुषवर्जिताः ॥३६१॥
तस्मात् त्रिकालं संयुक्तं दैवं तु सफलं भवेत् ।
पौरुषं दैवसम्पत्त्या काले फलति पार्थिव! ॥३६२॥
दैवं पुरुषकारश्च कालश्च पुरुषोत्तम !
त्रयमेतन्मनुष्यस्य पिण्डितं स्यात्फलावहम् ॥३६३॥
कृषिवृष्टिसमायोगाद् दृश्यन्ते फलसिद्धयः ।
तास्तु काले प्रदृश्यन्ते नैवाकाले कथञ्चन ॥३६४॥
तस्मात्सदैव कर्तव्यं सधर्मं पौरुषं नरैः ।
विपत्तावपि यस्येह परलोके ध्रुवं फलम् ॥३६५॥
नालसाः प्राप्नुवन्त्यर्थान्न च दैवपरायणाः ।
तस्मात्सर्वप्रयत्नेन पौरुषं यत्नमाचरेत् ॥३६६॥
त्यक्त्वाऽलसान्दैवपरान्मनुष्या-
नुत्थानयुक्तान् पुरुषान् हि लक्ष्मीः ।
अन्विष्य यत्नाद् वृणुयान्नृपेन्द्र !
तस्मात्सदोत्थानवता हि भाव्यम् ॥३६७॥

इति श्रीमात्स्ये महापुराणे दैवपुरुषकारवर्णनं नामैकविंशत्यधिकद्विशततमोऽध्यायः ॥

अथ द्वाविंशत्यधिकद्विशततमोऽध्यायः ॥

मनुरुवाच —

उपायांस्त्वं समाचक्ष्व सामपूर्वान्महाद्युते !
लक्षणं च तथा तेषां प्रयोगं च सुरोत्तम ! ॥३६८॥

मत्स्य उवाच —

साम भेदस्तथा दानं दण्डश्च मनुजेश्वर !
उपेक्षा च तथा माया इन्द्रजालं च पार्थिव ! ॥३६९॥

प्रयोगाः कथिताः सप्त तन्मे निगदतः शृणु ।
द्विविधं कथितं साम तथ्यं चातथ्यमेव च ॥३७०॥
तत्राप्यतथ्यं साधूनामाक्रोशायैव जायते ।
तत्र साधुः प्रयत्नेन सामसाध्यो नरोत्तम ! ॥३७१॥
महाकुलीना ऋजवो धर्मनित्या जितेन्द्रियाः ।
सामसाध्या न चातथ्यं तेषु साम प्रयोजयेत् ॥३७२॥
तथ्यं साम च कर्तव्यं कुलशीलादिवर्णनम् ।
तथा तदुपचाराणां कृतानां चैव वर्णनम् ॥३७३॥
अनयैव तथा युक्त्या कृतज्ञाख्यापनं स्वकम् ।
एवं साम्ना च कर्तव्या वशगा धर्मतत्पराः ॥३७४॥
साम्ना यद्यपि रक्षांसि गृह्णन्तीति परा श्रुतिः ।
तथाप्येतदसाधूनां प्रयुक्तं नोपकारकम् ॥३७५॥
अतिशङ्कितमित्येवं पुरुषं सामवादिनम् ।
असाधवो विजानन्ति तस्मात्तत्तेषु वर्जयेत् ॥३७६॥
ये शुद्धवंशा ऋजवः प्रणीता
धर्मे स्थिताः सत्यपरा विनीताः ।
ते सामसाध्याः पुरुषाः प्रदिष्टा
मानोन्नता ये सततं च राजन् ! ॥३७७॥

इति श्रीमात्स्ये महापुराणे राजधर्मे सामबोधो नाम द्वाविंशत्यधिकद्विशततमोऽध्यायः ॥

अथ त्रयोविंशत्यधिकद्विशततमोऽध्यायः ।

मत्स्य उवाच—

परस्परं तु ये दुष्टाः क्रुद्धा भीतावमानिताः ।
तेषां भेदं प्रयुञ्जीत भेदसाध्या हि ते मताः ॥३७८॥
ये तु येनैव दोषेण परस्मान्नापि बिभ्यति ।
ते तु तद्दोषपातेन भेदनीया भृशं ततः ॥३७९॥
आत्मीयां दर्शयेदाशां परस्माद्दर्शयेद्भयम् ।
एवं हि भेदयेद्भिन्नान्यथावद्वशमानयेत् ॥३८०॥

संहता हि विना भेदं शक्रेणापि सुदुःसहाः ।
भेदमेव प्रशंसन्ति तस्मान्नयविशारदाः ॥३८१॥
स्वमुखेनाश्रयेद्भेदं भेदं परमुखेन च ।
परीक्ष्य साधु मन्येत भेदं परमुखाच्छ्रुतम् ॥३८२॥
सद्यः स्वकार्यमुद्दिश्य कुशलैर्ये हि भेदिताः ।
भेदितास्ते विनिर्दिष्टा नैव राज्ञार्थवादिभिः ॥३८३॥
अन्तःकोपो बहिःकोपो यत्र स्यातां महीक्षिताम् ।
अन्तःकोपो महांस्तत्र नाशकः पृथिवीक्षिताम् ॥३८४॥
सामन्तकोपो बाह्यस्तु कोपः प्रोक्तो महीभृतः ।
महिषीयुवराजाभ्यां तथा सेनापतेर्नृप ! ॥३८५॥
अमात्यमन्त्रिणां चैव राजपुत्रे तथैव च ।
अन्तःकोपो विनिर्दिष्टो दारुणः पृथिवीक्षिताम् ॥३८६॥
बाह्यकोपे समुत्पन्ने सुमहत्यपि पार्थिवः ।
शुद्धान्तस्तु महाभाग ! शीघ्रमेव जयी भवेत् ॥३८७॥
अपि शक्रसमो राजा अन्तःकोपेन नश्यति ।
सोऽन्तःकोपः प्रयत्नेन तस्माद्रक्ष्यो महीभृता ॥३८८॥
परतः कोपमुत्पाद्य भेदेन विजिगीषुणा ।
ज्ञातीनां भेदनं कार्यं परेषां विजिगीषुणा ॥३८९॥
रक्ष्यश्चैव प्रयत्नेन ज्ञातिभेदस्तथाऽऽत्मनः ।
ज्ञातयः परितप्यन्ते सततं परितापिताः ॥३९०॥
तथापि तेषां कर्तव्यं सुगम्भीरेण चेतसा ।
ग्रहणं दानमानाभ्यां भेदस्तेभ्यो भयङ्करः ॥३९१॥
न ज्ञातिमनुगृह्णन्ति न ज्ञातिं विश्वसन्ति च ।
ज्ञातिभिर्भेदनीयास्तु रिपवस्तेन पार्थिवैः ॥३९२॥
भिन्ना हि शक्या रिपवः प्रभूताः
स्वल्पेन सैन्येन निहन्तुर्माजौ ।
सुसंहतानां हि तदस्तु भेदः
कार्यो रिपूणां नयशास्त्रविद्भिः ॥३९३॥

इति श्रीमात्स्ये महापुराणे राजधर्मे भेदप्रशंसा नाम त्रयोविंशत्यधिक-द्विशततमोऽध्यायः ॥

अथ चतुर्विंशत्यधिकद्विशततमोऽध्यायः ।

मत्स्य उवाच—

सर्वेषामप्युपायानां दानं श्रेष्ठतमं मतम् ।
सुदत्तेनेह भवति दानेनोभयलोकजित् ॥३९४॥
न सोऽस्ति राजन ! दानेन वशगो यो न जायते ।
दानेन वशगा देवा भवन्तीह सदा नृणाम् ॥३९५॥
दानमेवोपजीवन्ति प्रजाः सर्वा नृपोत्तम !
प्रियो हि दानवाँल्लोके सर्वस्यैवोपजायते ॥३९६॥
दानवानचिरेणैव तथा राजा पराञ्जयेत् ।
दानवानेव शक्नोति संहतान्भेदितुं परान् ॥३९७॥
यद्यप्यलुब्धगम्भीराः पुरुषाः सागरोपमाः ।
न गृह्णन्ति तथाप्येते जायन्ते पक्षपातिनः ॥३९८॥
अन्यत्रापि कृतं दानं करोत्यन्यान्यथा वशे ।
उपायेभ्यः प्रशंसन्ति दानं श्रेष्ठतमं जनाः ॥३९९॥
दानं श्रेयस्करं पुंसां दानं श्रेष्ठतमं परम् ।
दानवानेव लोकेषु पुत्रत्वे ध्रियते सदा ॥४००॥
न केवलं दानपरा जयन्ति भूर्लोकमेकं पुरुषप्रवीराः ।
जयन्ति ते राजसुरेन्द्रलोकं सुदुर्जयं यो विबुधाधिवासः ॥४०१॥

इति श्रीमात्स्ये महापुराणे राजधर्मदानप्रशंसा नाम चतुर्विंशत्यधिक-
द्विशततमोऽध्यायः ।

अथ पञ्चविंशत्यधिकद्विशततमोऽध्यायः ।

मत्स्य उवाच—

न शक्या ये वशे कर्तुमुपायत्रितयेन तु ।
दण्डेन तान्वशीकुर्याद्दण्डो हि वशकृन्नृणाम् ॥४०२॥
सम्यक्प्रणयनं तस्य तथा कार्यं महीक्षिता ।
धर्मशास्त्रानुसारेण सुसहायेन धीमता ॥४०३॥
तस्य सम्यक् प्रणयनं यथा कार्यं महीक्षिता ।
वानप्रस्थांश्च धर्मज्ञान्निर्ममान्निष्परिग्रहान् ॥४०४॥

स्वदेशे परदेशे वा धर्मशास्त्रविशारदान् ।
समीक्ष्य प्रणयेद्दण्डं सर्वं दण्डे प्रतिष्ठितम् ॥४०५॥
आश्रमी यदि वा वर्णी पूज्यो वाऽथ गुरुर्महान् ।
नादण्ड्यो नाम राज्ञोऽस्ति यः स्वधर्मेण तिष्ठति ॥४०६॥
अदण्ड्यान्दण्डयन् राजा दण्ड्यांश्चैवाप्यदण्डयन् ।
इह राज्यात्परिभ्रष्टो नरकं च प्रपद्यते ॥४०७॥
तस्माद्राज्ञा विनीतेन धर्मशास्त्रानुसारतः ।
दण्डप्रणयनं कार्यं लोकानुग्रहकाम्यया ॥४०८॥
यत्र श्यामो लोहिताक्षो दण्डश्चरति निर्भयः ।
प्रजास्तत्र न मुह्यन्ति नेता चेत्साधु पश्यति ॥४०९॥
बालवृद्धातुरयतिद्विजस्त्रीविधवा यतः ।
मात्स्यन्यायेन भक्ष्येरन यदि दण्डं न पातयेत् ॥४१०॥
देवदैत्योरगगणाः सर्वे भूतपतत्त्रिणः ।
उत्क्रामयेयुर्मर्यादां यदि दण्डं न पातयेत् ॥४११॥
एष ब्रह्माभिशापेषु सर्वप्रहरणेषु च ।
सर्वविक्रमकोपेषु व्यवसाये च तिष्ठति ॥४१२॥
पूज्यन्ते दण्डिनो देवैर्न पूज्यन्ते त्वदण्डिनः ।
न ब्रह्माणं विधातारं न पूषार्यमणावपि ॥४१३॥
यजन्ते मानवाः केचित्प्रशान्ताः सर्वकर्मसु ।
रुद्रमग्निं च शक्रं च सूर्याचन्द्रमसौ तथा ॥४१४॥
विष्णुं देवगणांश्चान्यान्दण्डिनः पूजयन्ति च ।
दण्डः शास्ति प्रजाः सर्वा दण्ड एवाभिरक्षति ॥४१५॥
दण्डः सुप्तेषु जागर्ति दण्डं धर्मं विदुर्बुधाः ।
राजदण्डभयादेव पापाः पापं न कुर्वते ॥४१६॥
यमदण्डभयादेके परस्परभयादपि ।
एवं सांसिद्धिके लोके सर्वं दण्डे प्रतिष्ठितम ॥४१७॥
अन्धे तमसि मज्जेयुर्यदि दण्डं न पातयेत् ।
यस्माद्दण्डो दमयति दुर्मदान् दण्डयत्यपि ॥४१८॥
दमनाद्दण्डनाच्चैव तस्माद्दण्डं विदुर्बुधाः ॥४१९॥

दण्डस्य भीतैस्त्रिदशैः समेतै-
भोगो धृतः शूलधरस्य यज्ञे ।
दत्तं कुमारे ध्वजिनीपतित्वं
वरं शिशूनां च भयाद् बलस्थम् ॥४२०॥

इति श्रीमात्स्ये महापुराणे राजधर्मे दण्डप्रशंसा नाम पञ्चविंशत्यधिकद्विशत-
तमोऽध्यायः ।

अथ षड्विंशत्यधिकद्विशततमोऽध्यायः

मत्स्य उवाच—

दण्डप्रणयनार्थाय राजा सृष्टः स्वयम्भुवा ।
देवभागानुपादाय सर्वभूतादिगुप्तये ॥४२१॥
तेजसा यदमुं कश्चिन्नैव शक्नोति वीक्षितुम् ।
ततो भवति लोकेषु राजा भास्करवत्प्रभुः ॥४२२॥
यदाऽस्य दर्शने लोकः प्रसादमुपगच्छति ।
नयनानन्दकारित्वात्तदा भवति चन्द्रमाः ॥४२३॥
यथा यमः प्रियद्वेष्ये प्राप्ते काले प्रयच्छति ।
तथा राज्ञा विधातव्याः प्रजास्तद्धि यमव्रतम् ॥४२४॥
वरुणेन यथा पाशैर्बद्ध एव प्रदृश्यते ।
तथा पापान्निगृह्णीयाद् व्रतमेतद्धि वारुणम् ॥४२५॥
परिपूर्णं यथा चन्द्रं दृष्ट्वा हृष्यति मानवः ।
तथा प्रकृतयो यस्मिन्स चन्द्रप्रतिमो नृपः ॥४२६॥
प्रतापयुक्तस्तेजस्वी नित्यं स्यात्पापकर्मसु ।
दुष्टसामन्तहिंस्रेषु राजाऽऽग्नेयव्रते स्थितः ॥४२७॥
यथा सर्वाणि भूतानि धरा धारयते स्वयम् ।
तथा सर्वाणि भूतानि बिभ्रतः पार्थिवं व्रतम् ॥४२८॥
इन्द्रस्यार्कस्य वातस्य यमस्य वरुणस्य च ।
चन्द्रस्याग्नेः पृथिव्याश्च तेजोव्रतं नृपश्चरेत् ॥४२९॥
वार्षिकांश्चतुरो मासान् यथेन्द्रोऽप्यभिवर्षति ।
तथाभिवर्षेत्स्वं राष्ट्रं काममिन्द्रव्रतं स्मृतम् ॥४३०॥

अष्टौ मासान्यथादित्यस्तोयं हरति रश्मिभिः।
तथा हरेत्करं राष्ट्रान्नित्यमर्कव्रतं हि तत् ॥४३१॥
प्रविश्य सर्वभूतानि यथा चरति मारुतः।
तथा चारैः प्रवेष्टव्यं व्रतमेतद्धि मारुतम् ॥४३२॥
इति श्रीमात्स्ये महापुराणे राजधर्मे लोकपालसाम्यनिर्देशो नाम षड्विंशत्यधिकद्विशततमोऽध्यायः॥

अथ चत्वारिंशदधिकद्विशततमोऽध्यायः

मनुरुवाच—

इदानीं सर्वधर्मज्ञ ! सर्वशास्त्रविशारद !
यात्राकालविधानं मे कथयस्व महीक्षिताम् ॥४३३॥

मत्स्य उवाच—

यदा मन्येत नृपतिराक्रन्देन बलीयसा।
पार्ष्णिग्राहाभिभूतोऽरिस्तदा यात्रां प्रयोजयेत् ॥४३४॥
योधान् मत्वा प्रभूतांश्च प्रभूतं च बलं मम।
मूलरक्षासमर्थोऽस्मि तदा यात्रां प्रयोजयेत् ॥४३५॥
अशुद्धपार्ष्णिर्नृपतिर्नतु यात्रां प्रयोजयेत्।
पार्ष्णिग्राहाधिकं सैन्यं मूले निक्षिप्य च व्रजेत् ॥४३६॥
चैत्र्यां वा मार्गशीर्ष्यां वा यात्रां यायान्नराधिपः।
चैत्र्यां पश्येच्च नैदाघं हन्ति पुष्टिं च शारदीम् ॥४३७॥
एतदेव विपर्यस्तं मार्गशीर्ष्यां नराधिपः।
शत्रोर्वा व्यसने यायात्काल एव सुदुर्लभः ॥४३८॥
दिव्यान्तरिक्षक्षितिजैरुत्पातैः पीडितं परम्।
षड्ऋक्षपीडासन्तप्तं पीडितं च तथा ग्रहैः।४३९॥
ज्वलन्ती च तथैवोल्का दिशं यां च प्रपद्यते।
भूकम्पोल्कादि संयाति यां च केतुः प्रसूयते ॥४४०॥
निर्घातश्च पतेद्यत्र तां यायाद्वसुधाधिपः।
स्वबलव्यसनोपेतं तथा दुर्भिक्षपीडितम् ॥४४१॥
सम्भूतान्तरकोपं च क्षिप्रं यायादरिं नृपः।
यूकामाक्षीकबहुलं बहुपङ्कं तथाऽऽविलम् ॥४४२॥

नास्तिकं भिन्नमर्यादं तथाऽमङ्गलवादिनम् ।
अपेतप्रकृतिं चैव निस्सारं च तथा जयेत् ॥४४३॥
विद्विष्टनायकं सैन्यं तथा भिन्नं परस्परम् ।
व्यसनासक्तनृपतिं बलं राजाऽभियोजयेत् ॥४४४॥
सैनिकानां न शस्त्राणि स्फुरन्त्यङ्गानि यत्र च ।
दुःस्वप्नानि च पश्यन्ति बलं तदभियोजयेत् ॥४४५॥
उत्साहबलसम्पन्नः स्वानुरक्तबलस्तथा ।
तुष्टपुष्टबलो राजा परानभिमुखो व्रजेत् ॥४४६॥
शरीरस्फुरणे धन्ये तथा दुःस्वप्ननाशने ।
निमित्ते शकुने धन्ये जाते शत्रुपुरं व्रजेत् ॥४४७॥
ऋक्षेषु षट्सु शुद्धेषु ग्रहेष्वनुगुणेषु च ।
प्रश्नकाले शुभे जाते परान्यायान्नराधिपः ॥४४८॥
एवं तु दैवसम्पन्नस्तथा पौरुषसंयुतः ।
देशकालोपपन्नां तु यात्रां कुर्यान्नराधिपः ॥४४९॥
स्थले नक्रस्तु नागस्य तस्यापि सजले वशे ।
उलूकस्य निशि ध्वाङ्क्षः स च तस्य दिवा वशे ॥४५०॥
एवं देशं च कालं च ज्ञात्वा यात्रां प्रयोजयेत् ।
पदातिनागबहुलां सेनां प्रावृषि योजयेत् ॥४५१॥
हेमन्ते शिशिरे चैव रथवाजिसमाकुलाम् ।
खरोष्ट्रबहुलां सेनां तथा ग्रीष्मे नराधिपः ॥४५२॥
चतुरङ्गबलोपेतां वसन्ते वा शरद्यथ ।
सेना पदातिबहुला यस्य स्यात्पृथिवीपतेः ॥४५३॥
अभियोज्यो भवेत्तेन शत्रुर्विषममाश्रितः ।
गम्ये वृक्षावृते देशे स्थितं शत्रुं तथैव च ॥४५४॥
किञ्चित्पङ्के तथा यायाद् बहुनागो नराधिपः ।
रथाश्वबहुलो यायाच्छत्रुं समपथस्थितम् ॥४५५॥
तमाश्रयन्तो बहुलास्तांस्तु राजा प्रपूजयेत् ।
खरोष्ट्रबहुलो राजा शत्रुर्बन्धेन संस्थितः ॥४५६॥
बन्धनस्थोऽभियोज्योऽरिस्तथा प्रावृषि भूभुजा ।
हिमपातयुते देशे स्थितं ग्रीष्मेऽभियोजयेत् ॥४५७॥

यवसेन्धनसंयुक्तः कालः पार्थिव! हैमनः ।
शरद्वसन्तौ धर्मज्ञ! कालौ साधारणौ स्मृतौ ॥४५८॥
विज्ञाय राजा द्विजदेशकालौ
दैवं त्रिकालं च तथैव बुद्ध्वा ।
यायात्परं कालविदां मतेन
सञ्चिन्त्य सार्धं द्विजमन्त्रविद्भिः ॥४५९॥

इति श्रीमात्स्ये महापुराणे यात्रानिमित्तकालयोऽयचिन्ता नाम चत्वारिंशदधिकद्विशततमोऽध्यायः ।

अग्निपुराणान्तर्गतं राजनीतिप्रकरणम्

अथाष्टादशाधिकद्विशततमोऽध्यायः ।

राजाभिषेककथनम् ।

अग्निरुवाच—

पुष्करेण च रामाय राजधर्मं हि पृच्छते ।
यथादौ कथितं तद्वद्वसिष्ठ! कथयामि ते ॥ १ ॥

पुष्कर उवाच—

राजधर्मं प्रवक्ष्यामि सर्वस्माद् राजधर्मतः ।
राजा भवेच्छत्रुहन्ता प्रजापालः सुदण्डवान् ॥ २ ॥
पालयिष्यति वः सर्वान् धर्मस्थान् व्रतमाचरेत् ।
संवत्सरं स वृणुयात् पुरोहितमथ द्विजम् ॥ ३ ॥
मन्त्रिणश्चाखिलात्मज्ञान्महिषीं धर्मलक्षणाम् ।
संवत्सरं नृपः काले ससम्भारोऽभिषेचनम् ॥ ४ ॥
कुर्यान्मृते नृपे नात्र कालस्य नियमः स्मृतः ।
तिलैः सिद्धार्थकैः स्नानं सांवत्सरपुरोहितौ ॥ ५ ॥
घोषयित्वा जयं राज्ञो राजा भद्रासने स्थितः ।
अभयं घोषयेद् दुर्गान्मोचयेद्राज्यपालके ॥ ६ ॥
पुरोधसाऽभिषेकात् प्राक् कार्यैन्द्री शान्तिरेव च ।
उपवास्याभिषेकाहे वेद्यग्नौ जुहुयान्मनून् ॥ ७ ॥

वैष्णवानैन्द्रमन्त्रांस्तु सावित्रान्वैश्वदैवतान ।
सौम्यान् स्वस्त्ययनं शर्म आयुष्याभयदानमनून ॥ ८ ॥
अपराजिताञ्च कलसं वह्नेर्दक्षिणपार्श्वगम् ।
सम्पातवन्तं हैमञ्च पूजयेद्गन्धपुष्पकैः ॥ ९ ॥
प्रदक्षिणावर्तशिखस्तप्तजाम्बूनदप्रभः ।
रथौघमेघनिर्घोषो विधूमश्च हुताशनः ॥१०॥
अनुलोमः सुगन्धश्च स्वस्तिकाकारसन्निभः ।
प्रसन्नार्चिर्महाज्वालः स्फुलिङ्गरहितो हितः ॥११॥
न व्रजेयुश्च मध्येन मार्जारमृगपक्षिणः ।
पर्वताग्रमृदा तावन्मूर्द्धानं शोधयेन्नृपः ॥१२॥
वल्मीकाग्रमृदा कर्णौ वदनं केशवालयात् ।
इन्द्रालयमृदा ग्रीवा हृदयन्तु नृपाजिरात् ॥१३॥
करिदन्तोद्धृतमृदा दक्षिणन्तु तथा भुजम् ।
वृषशृङ्गोद्धृतमृदा वामञ्चैव तथा भुजम् ॥१४॥
सरोमृदा तथा पृष्ठमुदरं सङ्गमान्मृदा ।
नदीतटद्वयमृदा पार्श्वे संशोधयेत्तथा ॥१५॥
वेश्याद्वारमृदा राज्ञः कटिशौचं विधीयते ।
यज्ञस्थानात्तथैवोरू गोस्थानाज्जानुनी तथा ॥१६॥
अश्वस्थानात्तथा जङ्घे रथचक्रमृदाङ्घ्रिके ।
मूर्धानं पञ्चगव्येन भद्रासनगतं नृपम् ॥१७॥
अभिषिञ्चेदमात्यानां चतुष्टयमथो घटैः ।
पूर्वतो हेमकुम्भेन घृतपूर्णेन ब्राह्मणः ॥१८॥
रूप्यकुम्भेन याम्ये च क्षीरपूर्णेन क्षत्रियः ।
दध्ना च ताम्रकुम्भेन वैश्यः पश्चिमगेन च ॥१९॥
मृण्मयेन जलेनोदक् शूद्रामात्योऽभिषेचयेत् ।
ततोऽभिषेकं नृपतेर्बह्वृचप्रवरो द्विजः ॥२०॥
कुर्वीत मधुना विप्रश्छन्दोगश्च कुशोदकैः ।
सम्पातवन्तं कलशं तथा गत्वा पुरोहितः ॥२१॥
विधाय वह्निरक्षान्तु सदस्येषु यथाविधि ।
राजश्रियाभिषेके च ये मन्त्राः परिकीर्तिताः ॥२२॥

तैस्तु दद्यान्महाभाग ! ब्राह्मणानां स्वनैस्तथा ।
ततो पुरोहितो गच्छेद्वेदिमूलन्तदेव तु ॥२३॥
शतच्छिद्रेण पात्रेण सौवर्णेनाभिषेचयेत् ।
या ओषधीत्योषधीभीरथेत्युक्त्वेति गन्धकैः ॥२४॥
पुष्पैः पुष्पवतीत्येव ब्राह्मणेति च बीजकैः ।
रत्नैराशुः शिशानश्च ये देवाश्च कुशोदकैः ॥२५॥
यजुर्वेद्यथर्ववेदी गन्धद्वारेति संस्पृशेत् ।
शिरः कण्ठं रोचनया सर्वतीर्थोदकैर्द्विजाः ॥२६॥
गीतवाद्यादिनिर्घोषैश्चामरव्यजनादिभिः ।
सर्वौषधिमयं कुम्भं धारयेयुर्नृपाग्रतः ॥२७॥
तं पश्येद्दर्पणं राजा घृतं वै मङ्गलादिकम् ।
अभ्यर्च्य विष्णुं ब्रह्माणमिन्द्रादींश्च ग्रहेश्वरान् ॥२८॥
व्याघ्रचर्मोत्तरां शय्यामुपविष्टः पुरोहितः ।
मधुपर्कादिकं दत्त्वा पट्टबन्धं प्रकारयेत् ॥२९॥
राज्ञो मुकुटबन्धश्च पञ्चचर्मासनं ददेत् ।
ध्रुवाद्यैरिति च विशेद् वृषजं वृषदंशजम् ॥३०॥
द्वीपिजं सिंहजं व्याघ्रजातञ्चर्म तदासने ।
अमात्यसचिवादींश्च प्रतीहारः प्रदर्शयेत् ॥३१॥
गोजाविगृहदानाद्यैः सांवत्सरपुरोहितौ ।
पूजयित्वा द्विजान् प्राच्र्य ह्यन्यभूगोन्नमुख्यकैः ॥३२॥
वह्निं प्रदक्षिणीकृत्य गुरुं नत्वाथ पृष्ठतः ।
वृषमालभ्य गां वत्सां पूजयित्वाथ मन्त्रितम् ॥३३॥
अश्वमारुह्य नागञ्च पूजयेत्तं समारुहेत् ।
परिभ्रमेद्राजमार्गे बलयुक्तः प्रदक्षिणम् ॥३४॥
पुरं विशेच्च दानाद्यैः प्राच्र्य सर्वान् विसर्जयेत् ॥३५॥

इत्याग्नेये महापुराणे राजाभिषेको नाम अष्टादशाधिक-
द्विशततमोऽध्यायः ।

अथैकोनविंशत्यधिकद्विशततमोऽध्यायः ।

सहायसम्पत्तिः ।

पुष्कर उवाच—

सोऽभिषिक्तः सहामात्यो जयेच्छत्रून्नृपोत्तमः ।
राज्ञः सेनापतिः कार्यो ब्राह्मणः क्षत्रियोऽथ वा ॥३६॥
कुलीनो नीतिशास्त्रज्ञः प्रतीहारश्च नीतिवित् ।
दूतश्च प्रियवादी स्यादक्षीणोऽतिबलान्वितः ॥३७॥
ताम्बूलधारी ना स्त्री वा भक्तः क्लेशसहप्रियः ।
सान्धिविग्रहिकः कार्यः षाड्गुण्यादिविशारदः ॥३८॥
खड्गधारी रक्षकः स्यात्सारथिः स्याद्बलादिवित् ।
सूदाध्यक्षो हितो विज्ञो महानसगतो हि सः ॥३९॥
सभासदस्तु धर्मज्ञा लेखकोऽक्षरविद्धितः ।
आह्वानकालविज्ञाः स्युर्हिता दौवारिका जनाः ॥४०॥
रत्नादिज्ञो धनाध्यक्षः अनुद्वारे हितो नरः ।
स्यादायुर्वेदविद् वैद्यो गजाध्यक्षोऽथ हस्तिवित् ॥४१॥
जितश्रमो गजारोहो हयाध्यक्षो हयादिवित् ।
दुर्गाध्यक्षो हितो धीमान स्थपतिर्वास्तुवेदवित् ॥४२॥
यन्त्रमुक्ते पाणिमुक्ते अमुक्ते मुक्तधारिते ।
अस्त्राचार्यो नियुद्धे च कुशलो नृपतेर्हितः ॥४३॥
वृद्धश्चान्तःपुराध्यक्षः पञ्चाशद्वार्षिकाः स्त्रियः ।
सप्तत्यब्दास्तु पुरुषाश्चरेयुः सर्वकर्मसु ॥४४॥
जाग्रत्स्यादायुधागारे ज्ञात्वा वृत्तिर्विधीयते ।
उत्तमाधममध्यानि बुद्ध्वा कर्माणि पार्थिवः ॥४५॥
उत्तमाधममध्यानि पुरुषाणि नियोजयेत् ।
जयेच्छुः पृथिवीं राजा सहायानानयेद्धितान् ॥४६॥
धर्मिष्ठान् धर्मकार्येषु शूरान् सङ्ग्रामकर्मसु ।
निपुणानर्थकृत्येषु सर्वत्र च तथा शुचीन् ॥४७॥
स्त्रीषु षण्डान्नियुञ्जीत तीक्ष्णान दारुणकर्मसु ।
यो यत्र विदितो राज्ञा शुचित्वेन तु तं नरम् ॥४८॥

धर्मे चार्थे च कामे च नियुञ्जीताधमेऽधमान् ।
राजा यथार्हं कुर्याच्च उपधाभिः परीक्षितान् ॥४६॥
समन्त्री च यथान्यायात् कुर्याद्धस्तिवनेचरान् ।
तत्पदान्वेषणे यत्तानध्यक्षांस्तत्र कारयेत् ॥५०॥
यस्मिन्कर्मणि कौशल्यं यस्य तस्मिन् नियोजयेत् ।
पितृपैतामहान्भृत्यान् सर्वकर्मसु योजयेत् ॥५१॥
विना दायादकृत्येषु तत्र ते हि समागताः ।
परराजगृहात् प्राप्तान् जनान् संश्रयकाम्यया ॥५२॥
दुष्टानप्यथ वाऽदुष्टान् संश्रयेत प्रयत्नतः ।
दुष्टं ज्ञात्वा विश्वसेन्न तद्वृत्तिं वर्त्तयेद्वशे ॥५३॥
देशान्तरागतान् पार्श्वे चारैर्ज्ञात्वा हि पूजयेत् ।
शत्रवोऽग्निर्विषं सर्पो निस्त्रिंशमपि चैकतः ॥५४॥
भृत्या वसिष्ठ ! विज्ञेया कुभृत्याश्च तथैकतः ।
चारचक्षुर्भवेद्राजा नियुञ्जीत सदा चरान ॥५५॥
जनस्याविहितान् सौम्यांस्तथाज्ञातान् परस्परम् ।
वणिजो मन्त्रकुशलान सांवत्सरचिकित्सकान् ॥५६॥
तथा प्रव्रजिताकारान् बलाबलविवेकिनः ।
नैकस्य राजा श्रद्दध्याच्छ्रद्दध्याद् बहुवाक्यतः ॥५७॥
रागापरागौ भृत्यानां जनस्य च गुणागुणान् ।
शुभानामशुभानाञ्च ज्ञानं कुर्याद्वशाय च ॥५८॥
अनुरागकरं कर्म चरेज्जह्याद्विरागजम् ।
जनानुरागया लक्ष्म्या राजा स्याज्जनरञ्जनात् ॥५६॥

इत्याग्नेये महापुराणे सहायसम्पत्तिर्नामैकोनविंशत्यधिकद्विशततमोऽध्यायः ॥

अथ विंशाधिकद्विशततमोऽध्यायः ।

पुष्कर उवाच—

भृत्यः कुर्यात्तु राजाज्ञां शिष्यवत्सच्छ्रियः पतेः ।
न क्षिपेद्वचनं राज्ञः अनुकूलं प्रियं वदेत् ॥६०॥
रहोगतस्य वक्तव्यमप्रियं यद्धितं भवेत् ।
न नियुक्तो हरेद्वित्तं नोपेक्षेत्तस्य मानकम् ॥६१॥

राज्ञश्च न तथाकार्यं वेशभाषाविचेष्टितम् ।
अन्तःपुरचराध्यक्षो वैरभूतैर्निराकृतैः ॥६२॥
संसर्गं न व्रजेद् भृत्यो राज्ञो गुह्यञ्च गोपयेत ।
प्रदर्श्य कौशलं किञ्चिद्राजानन्तु विशेषयेत् ॥६३॥
राज्ञा यच्छ्रावितं गुह्यं न तल्लोके प्रकाशयेत ।
आज्ञाप्यमाने वान्यस्मिन किङ्करोमीति वा वदेत् ॥६४॥
वस्त्रं रत्नमलङ्कारं राज्ञा दत्तं च धारयेत ।
नानिर्दिष्टो द्वारि विशेन्नायोग्ये भुवि राजदृक् ॥६५॥
जृम्भान्निष्ठीवनं कासं कोपं पर्यन्तिकाश्रयम् ।
भृकुटीं वातमुद्गारं तत्समीपे विसर्जयेत ॥६६॥
स्वगुणाख्यापने युक्त्या परानेव प्रयोजयेत ।
शाठ्यं लौल्यं सपैशुन्यं नास्तिक्यं क्षुद्रता तथा ॥६७॥
चापल्यञ्च परित्याज्यं नित्यं राजानुजीविना ।
श्रुतेन विद्याशिल्पैश्च संयोज्यात्मानमात्मना ॥६८॥
राजसेवां ततः कुर्याद् भूतये भूतिवर्द्धनः ।
नमस्कार्याः सदा चास्य पुत्रवल्लभमन्त्रिणः ॥६९॥
सचिवैर्नास्य विश्वासो राजचित्तप्रियञ्चरेत् ।
त्यजेद्विरक्तं रक्तात्तु वृत्तिमीहेत राजवित् ॥७०॥
अपृष्टश्चास्य न ब्रूयात् कामं कुर्यात्तथापदि ।
प्रसन्नो वाक्यसङ्ग्राही रहस्ये नच शङ्कते ॥७१॥
कुशलादिपरिप्रश्नं सम्प्रयच्छति चासनम् ।
तत्कथाश्रवणाद् धृष्टः अप्रियाण्यपि नन्दते ॥७२॥
अल्पं दत्तं प्रगृह्णाति स्मरेत् कथान्तरेष्वपि ।
इति रक्तस्य कर्त्तव्यं सेवामन्यस्य वर्जयेत् ॥७३॥

इत्याग्नेये महापुराणे अनुजीविवृत्तं नाम विंशत्यधिकद्विशततमोऽध्यायः ।

अथैकविंशत्यधिकद्विशततमोऽध्यायः ।

दुर्गसम्पत्तिः ।

पुष्कर उवाच —

दुर्गसम्पत्तिमाख्यास्ये दुर्गदेशे वसेन्नृपः ।
वैश्यशूद्रजनप्रायो ह्यनाहार्यस्तथाऽपरैः ॥७४॥
किञ्चिद्ब्राह्मणसंयुक्तो बहुकर्मकरस्तथा ।
अदेवमातृको भक्तजलो देशः प्रशस्यते ॥७५॥
परैरपीडितः पुष्पफलधान्यसमन्वितः ।
अगम्यः परचक्राणां व्यालतस्करवर्जितः ॥७६॥
षण्णामेकतमं दुर्गं तत्र कृत्वा वसेद् बली ।
धनुर्दुर्गं महीदुर्गं नरदुर्गं तथैव च ॥७७॥
वार्क्षञ्चैवाम्बुदुर्गञ्च गिरिदुर्गञ्च भार्गव !
सर्वोत्तमं शैलदुर्गमभेद्यं चान्यभेदनम् ॥७८॥
पुरन्तत्र च हट्टाद्यदेवतायतनादिकम् ।
अनुयन्त्रायुधोपेतं सोदकं दुर्गमुत्तमम् ॥७९॥
राजरक्षां प्रवक्ष्यामि रक्ष्यो भूपो विषादितः ।
पञ्चाङ्गस्तु शिरीषः स्यान्मूत्रपिष्टो विषार्दनः ॥८०॥
शतावरी छिन्नरुहा विषघ्नी तण्डुलीयकम् ।
कोषातकी च कल्हारी ब्राह्मी चित्रपटोलिका ॥८१॥
मण्डूकपर्णी वाराही धात्र्यानन्दकमेव च ।
उन्मादिनी सोमराजी विषघ्नं रत्नमेव च ॥८२॥
वास्तुलक्षणसंयुक्ते वसन्दुर्गे सुरान्यजेत् ।
प्रजाश्च पालयेद् दुष्टाञ्जयेद् दानानि दापयेत् ॥८३॥
देवद्रव्यादिहरणात्कल्पन्तु नरकं वसेत् ।
देवालयानि कुर्वीत देवपूजारतो नृपः ॥८४॥
सुरालयाः पालनीयाः स्थापनीयाश्च देवताः ।
मृण्मयाद्दारुजं पुण्यं दारुजादिष्टकामयम् ॥८५॥
ऐष्टकाच्छैलजं पुण्यं शैलजात् स्वर्णरत्नजम् ।
क्रीडन् सुरगृहं कुर्वन् भुक्तिमुक्तिमवाप्नुयात् ॥८६॥

चित्रकृद् गीतवाद्यादिप्रेक्षणीयादिदानकृत् ।
तैलाज्यमधुदुग्धाद्यैः स्नाप्य देवं दिवं व्रजेत् ॥८७॥
पूजयेत् पालयेद्विप्रान् द्विजस्वं न हरेन्नृपः ।
सुवर्णमेकं गामेकां भूमेरप्येकमङ्गुलम् ॥८८॥
हरन्नरकमाप्नोति यावदाभूतसंप्लवम् ।
दुराचारन्न द्विषेच्च सर्वपापेष्वपि स्थितम् ॥८९॥
नैवास्ति ब्राह्मणवधात् पापं गुरुतरं क्वचित् ।
अदैवं दैवतं कुर्युः कुर्युर्दैवमदैवतम् ॥९०॥
ब्राह्मणा हि महाभागास्तान्नमस्येत्सदैव तु ।
ब्राह्मणी रुदती हन्ति कुलं राज्यं प्रजास्तथा ॥९१॥
साध्वीस्त्रीणां पालनञ्च राजा कुर्याच्च धार्मिकः ।
स्त्रिया प्रहृष्टया भाव्यं गृहकार्यैकदक्षया ॥९२॥
सुसंस्कृतोपस्करया व्यये चामुक्तहस्तया ।
यस्मै दद्यात्पिता त्वेनां शुश्रूषेत्तं पतिं सदा ॥९३॥
मृते भर्तरि स्वर्यायाद् ब्रह्मचर्ये स्थिताङ्गना ।
परवेश्मरुचिर्न स्यान्न स्यात्कलहशालिनी ॥९४॥
मण्डनं वर्जयेन्नारी तथा प्रोषितभर्तृका ।
देवताराधनपरा तिष्ठेद्भर्तृहिते रता ॥९५॥
धारयेन्मङ्गलार्थाय किञ्चिदाभरणान्तथा ।
भर्त्राग्निं या विशेन्नारी सापि स्वर्गमवाप्नुयात् ॥९६॥
श्रियः सम्पूजनं कार्यं गृहसम्मार्जनादिकम् ।
द्वादश्यां कार्त्तिके विष्णुं गां सवत्सां ददेत्तथा ॥९७॥
सावित्र्या रक्षितो भर्ता सत्याचारव्रतेन च ।
सप्तम्यां मार्गशीर्षे तु सितेऽभ्यर्च्य दिवाकरम् ॥९८॥
पुत्रानाप्नोति च स्त्रीह नात्र कार्या विचारणा ॥९९॥

इत्याग्नेये महापुराणे राजधर्मो नामैकविंशत्यधिकद्विशततमोऽध्यायः ।

अथ द्वाविंशत्यधिकद्विशततमोऽध्यायः ।

राजधर्माः ।

पुष्कर उवाच—

ग्रामस्याधिपतिं कुर्याद्दशग्रामाधिपं नृपम् ।
शतग्रामाधिपञ्चान्यं तथैव विषयेश्वरम् ॥१००॥
तेषां भोगविभागश्च भवेत्कर्मानुरूपतः ।
नित्यमेव तथा कार्यं तेषाञ्चारैः परीक्षणम् ॥१०१॥
ग्रामे दोषान् समुत्पन्नान ग्रामेशः प्रशमं नयेत् ।
अशक्तो दशपालस्य स तु गत्वा निवेदयेत् ॥१०२॥
श्रुत्वापि दशपालोऽपि तत्र युक्तिमुपाचरेत ।
वित्ताद्याप्नोति राजा वै विषयात्तु सुरक्षितात् ॥१०३॥
धनवान्धर्ममाप्नोति धनवान् काममश्नुते ।
उच्छिद्यन्ते विना ह्यर्थैः क्रिया ग्रीष्मे सरिद्यथा ॥१०४॥
विशेषो नास्ति लोकेषु पतितस्याधनस्य च ।
पतितान्न तु गृह्णन्ति दरिद्रो न प्रयच्छति ॥१०५॥
धनहीनस्य भार्यापि नैका स्यादुपवर्त्तिनी ।
राष्ट्रपीडाकरो राजा नरके वसते चिरम् ॥१०६॥
नित्यं राज्ञा तथा भाव्यं गर्भिणी सहधर्मिणी ।
यथा स्वं सुखमुत्सृज्य गर्भस्य सुखमावहेत् ॥१०७॥
किं यज्ञैस्तपसा तस्य प्रजा यस्य न रक्षिताः ।
सुरक्षिताः प्रजा यस्य स्वर्गस्तस्य गृहोपमः ॥१०८॥
अरक्षिताः प्रजा यस्य नरकं तस्य मन्दिरम् ।
राजा षड्भागमादत्ते सुकृताद् दुष्कृतादपि ॥१०९॥
धर्मागमो रक्षणाच्च पापमाप्नोत्यरक्षणात् ।
सुभगा विटभीतेव राजवल्लभतस्करैः ॥११०॥
भक्ष्यमाणाः प्रजा रक्ष्याः कायस्थैश्च विशेषतः ।
रक्षिता तद्भयेभ्यस्तु राज्ञो भवति सा प्रजा ॥१११॥
अरक्षिता सा भवति तेषामेवेह भोजनम् ।
दुष्टसम्मर्दनं कुर्याच्छास्त्रोक्तं करमाददेत् ॥११२॥

कोषे प्रवेशयेदर्द्धं नित्यञ्चार्द्धं द्विजे ददेत् ।
निधिं द्विजोत्तमः प्राप्य गृह्णीयात्सकलं तथा ॥११३॥
चतुर्थमष्टमं भागं तथा षोडशमं द्विजः ।
वर्णक्रमेण दद्याच्च निधिं पात्रे तु धर्मतः ॥११४॥
अनृतन्तु वदन् दण्ड्यः सुवित्तस्यांशमष्टमम् ।
प्रणष्टस्वामिकमृक्थं राजा त्र्यब्दं निधापयेत् ॥११५॥
अर्वाक् त्र्यब्दाद्धरेत् स्वामी परेण नृपतिर्हरेत् ।
ममेदमिति यो ब्रूयात् सोऽर्थयुक्तो यथाविधि ॥११६॥
सम्पाद्य रूपसङ्ख्यादीन् स्वामी तद् द्रव्यमर्हति ।
बालदायादिकमृक्थं तावद्राजानुपालयेत् ॥११७॥
यावत्स्यात्स समावृत्तो यावद्वातीतशैशवः ।
बालपुत्रासु चैवं स्याद्रक्षणं निष्कुलासु च ॥११८॥
पतिव्रतासु च स्त्रीषु विधवास्वातुरासु च ।
जीवन्तीनां तु तासां ये संहरेयुः स्वबान्धवाः ॥११९॥
तान्छिष्याच्चौरदण्डेन धार्मिकः पृथिवीपतिः ।
सामान्यतो हृतञ्चौरैस्तद्वै दद्यात् स्वयं नृपः ॥१२०॥
चौररक्षाधिकारिभ्यो राजापि हृतमाप्नुयात् ।
अहृते यो हृतं ब्रूयान्निस्सार्यो दण्ड्य एव सः ॥१२१॥
न तद्राज्ञा प्रदातव्यं गृहे यद् गृहगैर्हृतम् ।
स्वराष्ट्रपण्यादादद्याद्राजा विंशतिमं द्विज ! ॥१२२॥
शुल्कांशं परदेशाच्च क्षयव्ययप्रकाशकम् ।
ज्ञात्वा सङ्कल्पयेच्छुल्कं लाभं वणिग्यथाप्नुयात् ॥१२३॥
विंशांशं लाभमादद्याद्दण्डनीयस्ततोऽन्यथा ।
स्त्रीणां प्रव्रजितानाञ्च तरशुल्कं विवर्जयेत् ॥१२४॥
तरेषु दासदोषेण नष्टं दासांस्तु दापयेत् ।
शूकधान्येषु षड्भागं शिम्बिधान्ये तथाष्टमम् ॥१२५॥
राजा वन्यार्थमादद्याद्देशकालानुरूपकम् ।
पञ्च षड्भागमादद्यात् राजा पशुहिरण्ययोः ॥१२६॥
गन्धौषधिरसानाञ्च पुष्पमूलफलस्य च ।
पत्रशाकतृणानाञ्च वंशवैणवचर्मणाम् ॥१२७॥

वैदलानाञ्च भाण्डानां सर्वस्याश्ममयस्य च ।
षड्भागमेव चादद्यान्मधुमांसस्य सर्पिषः ॥१२८॥
म्रियन्नपि न चाददद्याद् ब्राह्मणेभ्यस्तथा करम् ।
यस्य राज्ञस्तु विषये श्रोत्रियः सीदति क्षुधा ॥१२६॥
तस्य सीदति तद्राष्ट्रं व्याधिदुर्भिक्षतस्करैः ।
श्रुतं वृत्तं तु विज्ञाय वृत्तिं तस्य प्रकल्पयेत् ॥१३०॥
रक्षेच्च सर्वतस्त्वेनं पिता पुत्रमिवौरसम् ।
संरक्ष्यमाणो राज्ञा यः कुरुते धर्ममन्वहम् ॥१३१॥
तेनायुर्वर्धते राज्ञो द्रविणं राष्ट्रमेव च ।
कर्म कुर्युर्नरेन्द्रस्य मासेनैकञ्च शिल्पिनः ॥१३२॥
भुक्तमात्रेण ये चान्ये स्वशरीरोपजीविनः ॥१३३॥

इत्याग्नेये महापुराणे राजधर्मो नाम द्वाविंशत्यधिकद्विशततमोऽध्यायः ।

अथ त्रयोविंशत्यधिकद्विशततमोऽध्यायः ।

राजधर्माः ।

पुष्कर उवाच—

वक्ष्येऽन्तःपुरचिन्तां च धर्माद्याः पुरुषार्थकाः ।
अन्योऽन्यरक्षया तेषां सेवा कार्या स्त्रिया नृपैः ॥१३४॥
धर्ममूलोऽर्थविटपस्तथा कर्मफलो महान् ।
त्रिवर्गपादपस्तत्र रक्षया फलभाग् भवेत् ॥१३५॥
कामाधीनाः स्त्रियो राम ! तदर्थं रत्नसङ्ग्रहः ।
सेव्यास्ता नातिसेव्याश्च भूभुजा विषयैषिणा ॥१३६॥
आहारो मैथुनं निद्रा सेव्या नाति हि रुग् भवेत् ।
मञ्चाधिकारे कर्तव्याः स्त्रियः सेव्याः स्वरामिकाः ॥१३७॥
दुष्टान्याचरते या तु नाभिनन्दति तत्कथाम् ।
ऐक्यं द्विषद्भिर्व्रजति गर्वं वहति चोद्धता ॥१३८॥
चुम्बिता मार्ष्टि वदनं दत्तञ्च बहु मन्यते ।
स्वपित्यादौ प्रसुप्तापि तथा पश्चाद्विबुध्यते ॥१३९॥

स्पृष्टा धुनोति गात्राणि गात्रं च विरुणद्धि या ।
ईषच्छृणोति वाक्यानि प्रियाण्यपि पराङ्मुखी ॥१४०॥
न पश्यत्यप्रदत्तन्तु जघनञ्च निगूहति ।
दृष्टे विवर्णवदना मित्रेष्वथ पराङ्मुखी ॥१४१॥
तत्कामितासु च स्त्रीषु मध्यस्थेव च लक्ष्यते ।
ज्ञातमण्डनकालापि न करोति च मण्डनम् ॥१४२॥
या सा विरक्ता तान्त्यक्त्वा सानुरागां स्त्रियम्भजेत् ।
दृष्ट्वैव हृष्टा भवति वीक्षिते च पराङ्मुखी ॥१४३॥
दृश्यमाना तथाऽन्यत्र दृष्टिं क्षिपति चञ्चलाम् ।
तथाप्युपावर्तयितुं नैव शक्नोत्यशेषतः ॥१४४॥
विवृणोति तथाङ्गानि स्वस्या गुह्यानि भार्गव !
गर्हितञ्च तथैवाङ्गं प्रयत्नेन निगूहति ॥१४५॥
तद्दर्शने च कुरुते बालालिङ्गनचुम्बनम् ।
आभाष्यमाणा भवति सत्यवाक्या तथैव च ॥१४६॥
स्पृष्टा पुलकितैरङ्गैः स्वेदेनैव च भज्यते ।
करोति च तथा राम ! सुलभद्रव्ययाचनम् ॥१४७॥
ततः स्वल्पमपि प्राप्य करोति परमां मुदम् ।
नामसङ्कीर्तनादेव मुदिता बहु मन्यते ॥१४८॥
करजाङ्काङ्कितान्यस्य फलानि प्रेषयत्यपि ।
तत्प्रेषितञ्च हृदये विन्यसत्यपि चादरात् ॥१४९॥
आलिङ्गनैश्च गात्राणि लिम्पतीवामृतेन या ।
सुप्ते स्वपित्यथादौ च तथा तस्य विबुध्यते ॥१५०॥
ऊरू स्पृशति चात्यर्थं सुप्तश्चैनं विबुध्यते ।
कपित्थचूर्णयोगेन तथा दध्नः स्रजा तथा ॥१५१॥
घृतं सुगन्धि भवति दुग्धैः क्षिप्तैस्तथा यवैः ।
भोज्यस्य कल्पनैवं स्याद्गन्धमुक्तिः प्रदर्श्यते ॥१५२॥
शौचमाचमनं राम ! तथैव च विरेचनम् ।
भावना चैव पाकश्च बोधनं धूपनन्तथा ॥१५३॥
वासनं चैव निर्दिष्टं कर्माष्टकमिदं स्मृतम् ।
कपित्थबिल्वजम्बाम्रकरवीरकपल्लवैः ॥१५४॥

कृत्वोदकन्तु यद्द्रव्यं शौचितं शौचनन्तु तत् ।
तेषामभावे शौचन्तु मृगदर्पाम्भसा भवेत् ॥१५५॥
नखं कुष्ठं घनं मांसी स्पृक्कशैलेयजं जलम् ।
तथैव कुंकुमं लाक्षा चन्दनागुरुनीरदम् ॥१५६॥
सरलं देवकाष्ठञ्च कर्पूरं कान्तया सह ।
बालः कुन्दुरुकश्चैव गुग्गुलुः श्रीनिवासकः ॥१५७॥
सह सर्जरसेनैवं धूपद्रव्यैकविंशतिः ।
धूपद्रव्यगणादस्मादेकविंशाद्यथेच्छया ॥१५८॥
द्वे द्वे द्रव्ये समादाय सर्जभागैर्नियोजयेत् ।
नखपिण्याकमलयैः संयोज्य मधुना तथा ॥१५९॥
धूपयोगा भवन्तीह यथावत्स्वेच्छया कृताः ।
त्वचन्नाडीं फलन्तैलं कुंकुमं ग्रन्थि पर्वकम् ॥१६०॥
शैलेयन्तगरं क्रान्तां चोलकर्पूरमेव च ।
मांसीं सुराञ्च कुष्ठञ्च स्नानद्रव्याणि निर्दिशेत् ॥१६१॥
एतेभ्यस्तु समादाय द्रव्यत्रयमथेच्छया ।
मृगदर्पयुतं स्नानं कार्यं कन्दर्पवर्द्धनम् ॥१६२॥
त्वङ्मुरानलदैस्तुल्यैर्वालकार्द्धसमायुतैः ।
स्नानमुत्पलगन्धि स्यात् सतैलं कुङ्कुमायते ॥१६३॥
जातीपुष्पसुगन्धि स्यात् तगरार्द्धेन योजितम् ।
सद्‌व्यामकं स्याद्बकुलैस्तुल्यगन्धि मनोहरम् ॥१६४॥
मञ्जिष्ठातगरं चोलं त्वचं व्याघ्रनखं नखम् ।
गन्धपत्रञ्च विन्यस्य गन्धतैलं भवेच्छुभम् ॥१६५॥
तैलं निपीडितं राम ! तिलैः पुष्पाधिवासितैः ।
वासनात् पुष्पसदृशं गन्धेन तु भवेद् ध्रुवम् ॥१६६॥
एलालवङ्गकक्कोलजातीफलनिशाकराः ।
जातीपत्रिकया सार्द्धं स्वतन्त्रा मुखवासकाः ॥१६७॥
कर्पूरं कुङ्कुमं कान्ता मृगदर्पं हरेणुकम् ।
कक्कोलैलालवङ्गञ्च जाती कोशकमेव च ॥१६८॥
त्वक्पत्रं त्रुटिमुस्तौ च लतां कस्तूरिकं तथा ।
कण्टकानि लवङ्गस्य फलपत्रे च जातितः ॥१६९॥

कटुकञ्च फलं राम ! कार्षिकाण्युपकल्पयेत् ।
तच्चूर्णे खादिरं सारं दद्यात्तुर्य तु वासितम् ॥१७०॥
सहकाररसेनास्मात् कर्तव्या गुटिकाः शुभाः ।
मुखन्यस्ता सुगन्धास्ता मुखरोगविनाशनाः ॥१७१॥
पूगं प्रक्षालितं सम्यक् पञ्चपल्लववारिणा ।
शक्त्या तु गुटिकाद्रव्यैर्वासितं मुखवासकम् ॥१७२॥
कटुकं दन्तकाष्ठञ्च गोमूत्रे वासितं त्र्यहम् ।
कृतञ्च पूगवद्राम ! मुखसौगन्धिकारकम् ॥१७३॥
त्वक्पथ्ययोः समावंशौ शशिभागार्द्धसंयुतौ ।
नागवल्लीसमो भाति मुखवासो मनोहरः ॥१७४॥
एवं कुर्यात् सदा स्त्रीणां रक्षणं पृथिवीपतिः ।
न चासां विश्वसेज्जातु पुत्रमातुर्विशेषतः ॥१७५॥
न स्वपेत् स्त्रीगृहे रात्रौ विश्वासः कृत्रिमो भवेत् ॥१७६॥
इत्याग्नेये महापुराणे स्त्रीरक्षादिकामशास्त्रं नाम त्रयोविंशत्यधिक-द्विशततमोऽध्यायः ॥

अथ चतुर्विंशत्यधिकद्विशततमोऽध्यायः ।

राजधर्माः ।

पुष्कर उवाच—

राजपुत्रस्य रक्षा च कर्तव्या पृथिवीक्षिता ।
धर्मार्थकामशास्त्राणि धनुर्वेदञ्च शिक्षयेत् ॥१७७॥
शिल्पानि शिक्षयेच्चैवमाप्तैर्मिथ्याप्रियंवदैः ।
शरीररक्षाव्याजेन रक्षिणोऽस्य नियोजयेत् ॥१७८॥
न चास्य सङ्गो दातव्यः क्रुद्धलुब्धविमानितैः ।
अशक्यन्तु गुणाधानं कर्तुं तं बन्धयेत् सुखैः ॥१७९॥
अधिकारेषु सर्वेषु विनीतं विनियोजयेत् ।
मृगयां पानमक्षांश्च राज्यनाशांस्त्यजेत् नृपः ॥१८०॥
दिवास्वप्नं वृथाट्याञ्च वाक्पारुष्यं विवर्जयेत् ।
निन्दाञ्च दण्डपारुष्यमर्थदूषणमुत्सृजेत् ॥१८१॥

आकाराणां समुच्छेदो दुर्गादीनामसत्क्रिया ।
अर्थानां दूषणं प्रोक्तं विप्रकीर्णत्वमेव च ॥१८२॥
अदेशकाले यद्दानमपात्रे दानमेव च ।
अर्थेषु दूषणं प्रोक्तमसत्कर्मप्रवर्तनम् ॥१८३॥
कामं क्रोधं मदं मानं लोभं दर्पञ्च वर्जयेत् ।
ततो भृत्यजयं कृत्वा पौरजानपदं जयेत् ॥१८४॥
जयेद्बाह्यानरीन् पश्चाद्बाह्याश्च त्रिविधारयः ।
गुरवस्ते यथापूर्वं कुल्यानन्तरकृत्रिमाः ॥१८५॥
पितृपैतामहं मित्रं सामन्तश्च तथा रिपोः ।
कृत्रिमं च महाभाग ! मित्रन्त्रिविधमुच्यते ॥१८६॥
स्वाम्यमात्यजनपदा दुर्गं दण्डस्तथैव च ।
कोषो मित्रश्च धर्मज्ञ ! सप्ताङ्गं राज्यमुच्यते ॥१८७॥
मूलं स्वामी स वै रक्ष्यस्तस्माद्राज्यं विशेषतः ।
राज्याङ्गद्रोहिणं हन्यात् काले तीक्ष्णो मृदुर्भवेत् ॥१८८॥
एवं लोकद्वयं राज्ञो भृत्यैर्हासं विवर्जयेत् ।
भृत्याः परिभवन्तीह नृपं हर्षणसत्कथम् ॥१८९॥
लोकसंग्रहणार्थाय कृतकव्यसनो भवेत् ।
स्मितपूर्वाभिभाषी स्यात् लोकानां रञ्जनं चरेत् ॥१९०॥
दीर्घसूत्रस्य नृपतेः कर्महानिर्ध्रुवं भवेत् ।
रागे दर्पे च माने च द्रोहे पापे च कर्मणि ॥१९१॥
अप्रिये चैव वक्तव्ये दीर्घसूत्रः प्रशस्यते ।
गुप्तमन्त्रो भवेद्राजा नापदो गुप्तमन्त्रतः ॥१९२॥
ज्ञायते हि कृतं कर्म नारब्धं तस्य राज्यकम् ।
आकारैरिङ्गितैर्गत्या चेष्टया भाषितेन च ॥१९३॥
नेत्रवक्त्रविकाराभ्यां गृह्यतेऽन्तर्गतं मनः ।
नैकस्तु मन्त्रयेन्मन्त्रं न राजा बहुभिः सह ॥१९४॥
बहुभिर्मन्त्रयेत्कामं राजा मन्त्रान् पृथक् पृथक् ।
मन्त्रिणामपि नो कुर्यान्मन्त्री मन्त्रप्रकाशनम् ॥१९५॥
क्वापि कस्यापि विश्वासो भवतीह सदा नृणाम् ।
निश्चयश्च तथा मन्त्रे कार्य एकेन सूरिणा ॥१९६॥

नश्येदविनयाद्राजा राज्यञ्च विनयाल्लभेत् ।
त्रैविद्येभ्यस्त्रयीं विद्यां दण्डनीतिञ्च शाश्वतीम् ॥१६७॥
आन्वीक्षिकीञ्चार्थविद्यां वार्तारम्भांश्च लोकतः ।
जितेन्द्रियो हि शक्नोति वशे स्थापयितुं प्रजाः ॥१६८॥
पूज्या देवा द्विजाः सर्वे दद्याद्दानानि तेषु च ।
द्विजे दानञ्चाक्षयोऽयं निधिः कैश्चिन्न नाश्यते ॥१६६॥
संग्रामेष्वनिवर्तित्वं प्रजानां परिपालनम् ।
दानानि ब्राह्मणानाञ्च राज्ञो निःश्रेयसस्परम् ॥२००॥
कृपणानाथवृद्धानां विधवानां च योषिताम् ।
योगक्षेमञ्च वृत्तिञ्च तथैव परिकल्पयेत् ॥२०१॥
वर्णाश्रमव्यवस्थानं कार्यं तापसपूजनम् ।
न विश्वसेच्च सर्वत्र तापसेषु च विश्वसेत् ॥२०२॥
विश्वासयेच्चापि परं तत्त्वभूतेन हेतुना ।
वकवच्चिन्तयेदर्थं सिंहवच्च पराक्रमेत ॥२०३॥
वृकवच्चावलुम्पेत शशवच्च विनिष्पतेत् ।
दृढप्रहारी च भवेत् तथा शूकरवन्नृपः ॥२०४॥
चित्राकारश्च शिखिवद् दृढभक्तिस्तथाश्ववत् ।
भवेच्च मधुराभाषी तथा कोकिलवन्नृपः ॥२०५॥
काकशङ्की भवेन्नित्यमज्ञातां वसतिं वसेत् ।
नापरीक्षितपूर्वञ्च भोजनं शयनं स्पृशेत् ॥२०६॥
नाविज्ञातां स्त्रियं गच्छेन्नाज्ञातां नावमारुहेत् ।
राष्ट्रकर्षी भ्रश्यते च राज्यार्थाच्चैव जीवितात् ॥२०७॥
भृतो वत्सो जातबलः कर्मयोग्यो यथा भवेत् ।
तथा राष्ट्रं महाभाग ! भृतं कर्मसहं भवेत् ॥२०८॥
सर्वं कर्मेदमायत्तं विधाने दैवपौरुषे ।
तयोर्दैवमचिन्त्यं हि पौरुषे विद्यते क्रिया ॥२०९॥
जनानुरागप्रभवा राज्ञो राज्यमहीश्रियः ॥२१०॥

इत्याग्नेये महापुराणे राजधर्मो नाम चतुर्विंशत्यधिकद्विशततमोऽध्यायः ॥

अथ पञ्चविंशत्यधिकद्विशततमोऽध्यायः ॥

राजधर्माः ।

पुष्कर उवाच—

स्वमेव कर्म दैवाख्यं विद्धि देहान्तरार्जितम् ।
तस्मात्पौरुषमेवेह श्रेष्ठमाहुर्मनीषिणः ॥२११॥
प्रतिकूलं तथा दैवं पौरुषेण विहन्यते ।
सात्त्विकात्कर्मणः पूर्वात्सिद्धिः स्यात्पौरुषं विना ॥२१२॥
पौरुषं दैवसम्पत्त्या काले फलति भार्गव !
दैवं पुरुषकारश्च द्वयं पुंसः फलावहम् ॥२१३॥
कृषेर्वृष्टिसमायोगात् काले स्युः फलसिद्धयः ।
सधर्मं पौरुषं कुर्यान्नालसो नच दैववान् ॥२१४॥
सामादिभिरुपायैस्तु सर्वे सिद्ध्यन्त्युपक्रमाः ।
सामं चोपप्रदानञ्च भेददण्डौ तथापरौ ॥२१५॥
मायोपेक्षेन्द्रजालञ्च उपायाः सप्त ताञ्छृणु ।
द्विविधं कथितं साम तथ्यञ्चातथ्यमेव च ॥२१६॥
तत्राप्यतथ्यं साधूनामाक्रोशायैव जायते ।
महाकुलीना ह्यृजवो धर्मनित्या जितेन्द्रियाः ॥२१७॥
सामसाध्या अतथ्यैश्च गृह्यन्ते राक्षसा अपि ।
तथा तदुपकाराणां कृतानाञ्चैव वर्णनम् ॥२१८॥
परस्परन्तु ये द्विष्टाः क्रुद्धभीतावमानिताः ।
तेषां भेदं प्रयुञ्जीत परमं दर्शयेद्भयम् ॥२१९॥
आत्मीयां दर्शयेदाशां येन दोषेण बिभ्यति ।
परास्तेनैव ते भेद्या रक्ष्यो वै ज्ञातिभेदकः ॥२२०॥
सामन्तकोपो बाह्यस्तु मन्त्रामात्यात्मजादिकः ।
अन्तःकोपश्चोपशाम्यं कुर्वन् शत्रोश्च तं जयेत् ॥२२१॥
उपायश्रेष्ठं दानं स्याद्दानादुभयलोकभाक् ।
न सोऽस्ति नाम दानेन वशगो यो न जायते ॥२२२॥
दानवानेव शक्नोति संहतान भेदितुं परान् ।
त्रयासाध्यं साधयेत् तं दण्डेन च कृतेन च ॥२२३॥

दण्डे सर्वं स्थितं दण्डो नाशयेद् दुष्प्रणीकृतः ।
अदण्ड्यान दण्डयन्नश्येद्दण्ड्यान राजाप्यदण्डयन ॥२२४॥
देवदैत्योरगनराः सिद्धा भूताः पतत्त्रिणः ।
उत्क्रमेयुः स्वमर्यादां यदि दण्डान्न पालयेत् ॥२२५॥
यस्माददान्तान दमयत्यदण्ड्यान्दण्डयत्यपि ।
दमनाद्दण्डनाच्चैव तस्माद्दण्डं विदुर्बुधाः ॥२२६॥
तेजसा दुर्निरीक्ष्यो हि राजा भास्करवत्ततः ।
लोकप्रसादं गच्छेत दर्शनाच्चन्द्रवत्ततः ॥२२७॥
जगद् व्याप्नोति वै चारैरतो राजा समीरणः ।
दोषनिग्रहकारित्वाद्राजा वैवस्वतः प्रभुः ॥२२८॥
यदा दहति दुर्बुद्धिं तदा भवति पावकः ।
यदा दानं द्विजातिभ्यो दद्यात्तस्माद्धनेश्वरः ॥२२९॥
धनधाराप्रवर्षित्वाद्देवादौ वरुणः स्मृतः ।
क्षमया धारयंल्लोकान पार्थिवः पार्थिवो भवेत ॥२३०॥
उत्साहमन्त्रशक्त्याद्यै रक्षेद् यस्माद्धरिस्ततः ॥२३१॥

इत्याग्नेये महापुराणे सामाद्युपायो नाम पञ्चविंशत्यधिकद्विशततमोऽध्यायः ॥

अथ सप्तविंशत्यधिकद्विशततमोऽध्यायः ।

युद्धयात्रा ।

पुष्कर उवाच—

यदा मन्येत नृपतिराक्रन्देन बलीयसा ।
पार्ष्णिग्राहोऽभिभूतो मे तदा यात्रां प्रयोजयेत् ॥२३२॥
पुष्टा योधा भृता भृत्याः प्रभूतञ्च बलं मम ।
मूलरक्षासमर्थोऽस्मि तैर्गत्वा शिबिरं व्रजेत् ॥२३३॥
शत्रोर्वा व्यसने यायाद् दैवाद्यैः पीडितं परम् ।
भूकम्पो यां दिशं याति याञ्च केतुर्व्यदूषयत् ॥२३४॥
विद्विष्टनाशकं सैन्यं सम्भूतान्तःप्रकोपनम् ।
शरीरस्फुरणे धन्ये तथा सुस्वप्नदर्शने ॥२३५॥
निमित्ते शकुने धन्ये जाते शत्रुपुरं व्रजेत् ।

पदातिनागबहुलां सेनां प्रावृषि योजयेत् ॥२३६॥
हेमन्ते शिशिरे चैव रथवाजिसमाकुलाम् ।
चतुरङ्गबलोपेतां वसन्ते वा शरन्मुखे ॥२३७॥
सेना पदातिबहुला शत्रून जयति सर्वदा ।
अङ्गदक्षिणभागे तु शस्तं प्रस्फुरणं भवेत् ॥२३८॥
न शस्तं तु तथा वामे पृष्ठस्य हृदयस्य च ।
लाञ्छनं पिटकञ्चैव विज्ञेयं स्फुरणं तथा ॥२३९॥
विपर्ययेणाभिहितं सव्ये स्त्रीणां शुभं भवेत् ॥२४०॥
इत्याग्नेये महापुराणे यात्रा नाम सप्तविंशत्यधिकद्विशततमोऽध्यायः ।

अथ द्वात्रिंशदधिकद्विशततमोऽध्यायः ।

यात्रामण्डलचिन्तादिः ।

पुष्कर उवाच—

सर्वयात्रां प्रवक्ष्यामि राजधर्मसमाश्रयात् ।
अस्तङ्गते नीचगते विकले रिपुराशिगे ॥२४१॥
प्रतिलोमे च विध्वस्ते शुक्रे यात्रां विसर्जयेत् ।
प्रतिलोमे बुधे यात्रां दिक्पतौ च तथा ग्रहे ॥२४२॥
वैधृतौ च व्यतीपाते नागे च शकुनौ तथा ।
चतुष्पादे च किन्तुघ्ने तथा यात्रां विवर्जयेत् ॥२४३॥
विपत्तारे नैधने च प्रत्यरौ चाथ जन्मनि ।
गण्डे विवर्जयेद् यात्रां रिक्तायाञ्च तिथावपि ॥२४४॥
उदीची च तथा प्राची तयोरैक्यं प्रकीर्तितम् ।
पश्चिमा दक्षिणा या दिक् तयोरैक्यं तथैव च ॥२४५॥
वाय्वग्निदिक्समुद्भूतं परिघन्तु लङ्घयेत् ।
आदित्यचन्द्रशौरास्तु दिवसाश्च न शोभनाः ॥२४६॥
कृत्तिकाद्यानि पूर्वेण मघाद्यानि च याम्यतः ।
मैत्राद्यान्यपरे चाथ वासवाद्यानि चाप्युदक् ॥२४७॥
सर्वद्वाराणि शस्तानि छायामानं वदामि ते ।
आदित्ये विंशतिर्ज्ञेयाश्चन्द्रे षोडश कीर्तिताः ॥२४८॥

भौमे पञ्चदशैवोक्ताश्चतुर्दश तथा बुधे ।
त्रयोदश तथा जीवे शुक्रे द्वादश कीर्तिताः ॥२४९॥
एकादश तथा सौरे सर्वकर्मसु कीर्तिताः ।
जन्मलग्ने शक्रचापे सम्मुखे न व्रजेन्नरः ॥२५०॥
शकुनादौ शुभे यायाज्जयाय हरिमास्मरन् ।
वक्ष्ये मण्डलचिन्तान्ते कर्तव्यं राजलक्षणम् ॥२५१॥
स्वाम्यमात्यं तथा दुर्गं कोषो दण्डस्तथैव च ।
मित्रं जनपदश्चैव राज्यं सप्ताङ्गमुच्यते ॥२५२॥
सप्ताङ्गस्य तु राज्यस्य विघ्नकर्तॄन् विनाशयेत् ।
मण्डलेषु च सर्वेषु वृद्धिः कार्या महीक्षिता ॥२५३॥
आत्ममण्डलमेवात्र प्रथमं मण्डलं भवेत् ।
सामन्तास्तस्य विज्ञेया रिपवो मण्डलस्य तु ॥२५४॥
उपेतस्तु सुहृज् ज्ञेयः शत्रुमित्रमतः परम् ।
मित्रमित्रं ततो ज्ञेयं मित्रमित्ररिपुस्ततः ॥२५५॥
एतत्पुरस्तात्कथितं पश्चादपि निबोध मे ।
पार्ष्णिग्राहस्ततः पश्चात्ततस्त्वाक्रन्द उच्यते ॥२५६॥
आसारस्तु ततोऽन्यः स्यादाक्रन्दासार उच्यते ।
जिगीषोः शत्रुयुक्तस्य विमुक्तस्य तथा द्विज ! ॥२५७॥
नात्रापि निश्चयः शक्यो वक्तुं मनुजपुङ्गव !
निग्रहानुग्रहे शक्तो मध्यस्थः परिकीर्तितः ॥२५८॥
निग्रहानुग्रहे शक्तः सर्वेषामपि यो भवेत् ।
उदासीनः स कथितो बलवान् पृथिवीपतिः ॥२५९॥
न कस्यचिद् रिपुर्मित्रं कारणाच्छत्रुमित्रके ।
मण्डलं तव सम्प्रोक्तमेतद् द्वादशराजकम् ॥२६०॥
त्रिविधा रिपवो ज्ञेयाः कुल्यानन्तरकृत्त्रिमाः ।
पूर्वपूर्वो गुरुस्तेषां दुश्चिकित्स्यतमो मतः ॥२६१॥
अनन्तरोऽपि यः शत्रुः सोऽपि मे कृत्त्रिमो मतः ।
पार्ष्णिग्राहो भवेच्छत्रोर्मित्राणि रिपवस्तथा ॥२६२॥
पार्ष्णिग्राहमुपायैश्च शमयेच्च तथा स्वकम् ।
मित्रेण शत्रोरुच्छेदं प्रशंसन्ति पुरातनाः ॥२६३॥

मित्रश्च शत्रुतामेति सामन्तत्वादनन्तरम् ।
शत्रुं जिगीषुरुच्छिन्द्यात् स्वयं शक्नोति चेद्यदि ॥२६४॥
प्रतापवृद्धौ तेनापि नामित्राज्जायते भयम् ।
यथास्य नोद्विजेल्लोको विश्वासश्च यथा भवेत् ॥२६५॥
जिगीषुर्धर्मविजयी तथा लोकं वशन्नयेत् ॥२६६॥

इत्याग्नेये महापुराणे यात्रामण्डलचिन्तादिर्नाम द्वात्रिंशदधिक-द्विशततमोऽध्यायः ।

अथ त्रयस्त्रिंशदधिकद्विशततमोऽध्यायः ।

षाड्गुण्यम् ।

पुष्कर उवाच—

सामभेदौ मया प्रोक्तौ दानदण्डौ तथैव च ।
दण्डः स्वदेशे कथितः परदेशे ब्रवीमि ते ॥२६७॥
प्रकाशश्चाप्रकाशश्च द्विविधो दण्ड उच्यते ।
लुण्ठनं ग्रामघातश्च शस्यघातोऽग्निदीपनम् ॥२६८॥
प्रकाशोऽथ विषं वाह्नर्विविधैः पुरुषैर्वधः ।
दूषणञ्चैव साधूनामुदकानाञ्च दूषणम् ॥२६९॥
दण्डप्रणयनं प्रोक्तमुपेक्षां शृणु भार्गव !
यदा मन्येत नृपतो रणे न मम विग्रहः ॥२७०॥
अनर्थायानुबन्धः स्यात् सन्धिना च तथा भवेत् ।
साम लब्धास्पदञ्चात्र दानञ्चार्थक्षयङ्करम् ॥२७१॥
भेदो दण्डानुबन्धः स्यात्तदोपेक्षां समाश्रयेत् ।
नचायं मम शक्नोति किञ्चित् कर्तुमुपद्रवम् ॥२७२॥
न चाहमस्य शक्नोमि तत्रोपेक्षां समाश्रयेत् ।
अवज्ञोपहतस्तत्र राज्ञा कार्यो रिपुर्भवेत् ॥२७३॥
मायोपायं प्रवक्ष्यामि उत्पातैरनृतैश्चरन् ।
शत्रोरुद्वेजनं शत्रोः शिविरस्थस्य पक्षिणः ॥२७४॥
स्थूलस्य तस्य पुच्छस्थां कृत्वोल्कां विपुलां द्विज!
विसृजेच्च ततश्चैवमुल्कापातं प्रदर्शयेत् ॥२७५॥

एवमन्ये दर्शनीया उत्पाता बहवोऽपि च ।
उद्वेजनं तथा कुर्यात् कुहकैर्विविधैर्द्विषाम् ॥२७६॥
सांवत्सरास्तापसाश्च नाशं ब्रूयुः परस्य च ।
जिगीषुः पृथिवीं राजा तेन चोद्वेजयेत् परान् ॥२७७॥
देवतानां प्रसादश्च कीर्तनीयः परस्य तु ।
आगतं नोऽमित्रबलं प्रहरध्वमभीतवत् ॥२७८॥
एवं ब्रूयाद्रणे प्राप्ते भग्नाः सर्वे परे इति ।
क्ष्वेडाः किलकिलाः कार्या वाच्यः शत्रुर्हतस्तथा ॥२७९॥
देवाज्ञाबृंहितो राजा सन्नद्धः समरं प्रति ।
इन्द्रजालं प्रवक्ष्यामि इन्द्रं कालेन दर्शयेत् ॥२८०॥
चतुरङ्गं बलं राजा सहायार्थं दिवौकसाम् ।
बलन्तु दर्शयेत्प्राप्तं रक्तवृष्टिञ्चरेद्रिपौ ॥२८१॥
छिन्नानि रिपुशीर्षाणि प्रासादाग्रेषु दर्शयेत् ।
षाड्गुण्यं सम्प्रवक्ष्यामि तद्वरौ सन्धिविग्रहौ ॥२८२॥
सन्धिश्च विग्रहश्चैव यानमासनमेव च ।
द्वैधीभावः संशयश्च षड्गुणाः परिकीर्त्तिताः ॥२८३॥
पणाबन्धः स्मृतः सन्धिरपकारस्तु विग्रहः ।
जिगीषोः शत्रुविषये यानं यात्राऽभिधीयते ॥२८४॥
विग्रहेण स्वके देशे स्थितिरासनमुच्यते ।
बलार्द्धेन प्रयाणन्तु द्वैधीभावः स उच्यते ॥२८५॥
उदासीनो मध्यमो वा संश्रयात्संश्रयः स्मृतः ।
समेन सन्धिरन्वेष्योऽहीनेन च बलीयसा ॥२८६॥
हीनेन विग्रहः कार्यः स्वयं राज्ञा बलीयसा ।
तत्रापि शुद्धपार्ष्णिस्तु बलीयांसं समाश्रयेत् ॥२८७॥
आसीनः कर्मविच्छेदं शक्तः कर्तुं रिपोर्यदा ।
अशुद्धपार्ष्णिश्चासीत विगृह्य वसुधाधिपः ॥२८८॥
अशुद्धपार्ष्णिर्बलवान् द्वैधीभावं समाश्रयेत् ।
बलिना विगृहीतस्तु योऽसन्देहेन पार्थिवः ॥२८९॥
संश्रयस्तेन वक्तव्यो गुणानामधमो गुणः ।
बहुक्षयव्ययायासं तेषां यानं प्रकीर्तितम् ॥२९०॥

बहुलाभकरं पश्चात्तदा राजा समाश्रयेत् ।
सर्वशक्तिविहीनस्तु तदा कुर्यात्तु संश्रयम् ॥२६१॥
इत्याग्नेये महापुराणे उपायषड्गुणादिर्नाम त्रयस्त्रिंशदधिक-
द्विशततमोऽध्यायः ।

अथ चतुस्त्रिंशदधिकद्विशततमोऽध्यायः ।

दैनिकं राजकर्म ।

पुष्कर उवाच—

अजस्रं कर्म वक्ष्यामि दिनं प्रति यदाचरेत् ।
द्विमुहूर्त्तावशेषायां रात्रौ निद्रान्त्यजेन्नृपः ॥२६२॥
वाद्यवन्दिस्वनैर्गीतैः पश्येद् गूढांस्ततो नरान् ।
विज्ञायते न ये लोकास्तदीया इति केनचित् ॥२६३॥
आयव्ययस्य श्रवणं ततः कार्यं यथाविधि ।
वेगोत्सर्गं ततः कृत्वा राजा स्नानगृहं व्रजेत् ॥२६४॥
स्नानं कुर्यान्नृपः पश्चाद्दन्तधावनपूर्वकम् ।
कृत्वा सन्ध्यान्ततो जप्यं वासुदेवं प्रपूजयेत् ॥२६५॥
वह्नौ पवित्रान् जुहुयात्तर्पयेदुदकैः पितॄन् ।
दद्यात्सकाञ्चनीं धेनुं द्विजाशीर्वादसंयुतः ॥२६६॥
अनुलिप्तोऽलङ्कृतश्च मुखं पश्येच्च दर्पणे ।
ससुवर्णे घृते राजा शृणुयाद्दिवसादिकम् ॥२६७॥
औषधं भिषजोक्तं च मङ्गलालम्भनञ्चरेत् ।
पश्येद् गुरुं तेन दत्ताशीर्वादोऽथ व्रजेत्सभाम ॥२६८॥
तत्रस्थो ब्राह्मणान पश्येदमात्यान्मन्त्रिणस्तथा ।
प्रकृतीश्च महाभाग ! प्रतीहारनिवेदिताः ॥२६९॥
श्रुत्वेतिहासं कार्याणि कार्याणां कार्यनिर्णयम् ।
व्यवहारन्ततः पश्येन्मन्त्रं कुर्यात्तु मन्त्रिभिः ॥३००॥
नैकेन सहितः कुर्यान्न कुर्याद् बहुभिः सह ।
नच मूर्खैर्नचानाप्तैर्गुप्तं न प्रकटं चरेत् ॥३०१॥
मन्त्रं स्वधिष्ठितं कुर्याद्येन राष्ट्रं न बाधते ॥

आकारग्रहणे राज्ञो मन्त्ररक्षा परा मता ॥३०२॥
आकारैरिङ्गितैः प्राज्ञा मन्त्रं गृह्णन्ति पण्डिताः ।
सांवत्सराणां वैद्यानां मन्त्रिणां वचने रतः ॥३०३॥
राजा विभूतिमाप्नोति धारयन्ति नृपं हि ते ।
मन्त्रं कृत्वाथ व्यायामञ्चक्रे याने च शस्त्रके ॥३०४॥
निःसत्वादौ नृपः स्नातः पश्येद्विष्णुं सुपूजितम् ।
हुतञ्च पावकं पश्येद्विप्रान्पश्येत् सुपूजितान् ॥३०५॥
भूषितो भोजनं कुर्याद् दानाद्यैः सुपरीक्षितम् ।
भुक्त्वा गृहीतताम्बूलो वामपार्श्वेन संस्थितः ॥३०६॥
शास्त्राणि चिन्तयेद् दृष्ट्वा योधान् कोष्ठायुधं गृहम् ।
अन्वास्य पश्चिमां सन्ध्यां कार्याणि च विचिन्त्य तु॥३०७॥
चरान् सम्प्रेष्य भुक्तान्नमन्तःपुरचरो भवेत् ।
वाद्यगीतै रक्षितोऽन्यैरेवं नित्यञ्चरेन्नृपः ॥३०८॥

इत्याग्नेये महापुराणे आजस्रिकं नाम चतुस्त्रिंशदधिकद्विशततमोऽध्यायः ।

अथ पञ्चत्रिंशदधिकद्विशततमोऽध्यायः ।

रणदीक्षा ।

पुष्कर उवाच—

यात्राविधानपूर्वन्तु वक्ष्ये साङ्ग्रामिकं विधिम् ।
सप्ताहेन यदा यात्रा भविष्यति महीपतेः ॥३०९॥
पूजनीयो हरिः शम्भुर्मोदकाद्यैर्विनायकः ।
द्वितीयेऽहनि दिक्पालान् सम्पूज्य शयनञ्चरेत् ॥३१०॥
शय्यायां वा तदग्रेऽथ देवान् प्रार्च्य मनुं स्मरेत् ।
नमः शम्भो ! त्रिनेत्राय रुद्राय वरदाय च ॥३११॥
वामनाय विरूपाय स्वप्नाधिपतये नमः ।
भगवन्देवदेवेश ! शूलभृद्वृषवाहन ! ॥३१२॥
इष्टानिष्टे ममाचक्ष्व स्वप्ने सुप्तस्य शाश्वत !
यज्जाग्रतो दूरमिति पुरोधा मन्त्रमुच्चरेत् ॥३१३॥
तृतीयेऽहनि दिक्पालान् रुद्रांस्तान् दिक्पतीन् यजेत् ।

ग्रहान् यजेच्चतुर्थेऽह्नि पञ्चमे चाश्विनौ यजेत् ॥३१४॥
मार्गे या देवतास्तासां नद्यादीनाञ्च पूजनम् ।
दिव्यान्तरीक्षभौमस्थदेवानाञ्च तथा बलिः ॥३१५॥
रात्रौ भूतगणानां च वासुदेवादिपूजनम् ।
भद्रकाल्याः श्रियः कुर्यात् प्रार्थयेत् सर्वदेवताः ॥३१६॥
वासुदेवः सङ्कर्षणः प्रद्युम्नश्चानिरुद्धकः ।
नारायणोऽब्जजो विष्णुर्नारसिंहो वराहकः ॥३१७॥
शिव ईशस्तत्पुरुषो ह्यघोरो राम ! सत्यजः ।
सूर्यः सोमः कुजश्चान्द्रिजीवशुक्रशनैश्चराः ॥३१८।
राहुः केतुर्गणपतिः सेनानी चण्डिका ह्युमा ।
लक्ष्मीः सरस्वती दुर्गा ब्रह्माणीप्रमुखा गणाः ॥३१९॥
रुद्रा इन्द्रादयो वह्निर्नागास्ताक्ष्योऽपरे सुराः ।
दिव्यान्तरीक्षभूमिष्ठा विजयाय भवन्तु मे ॥३२०॥
मर्दयन्तु रणे शत्रून् सम्प्रगृह्योपहारकम् ।
सपुत्रमातृभृत्योऽहं देवाः ! वः शरणङ्गतः ॥३२१॥
चमूनां पृष्ठतो गत्वा रिपुनाशाः ! नमोऽस्तु वः ।
विनिवृत्तः प्रदास्यामि दत्तादभ्यधिकं बलिम् ॥३२२॥
षष्ठेऽह्नि विजयस्नानं कर्तव्यं चाभिषेकवत् ।
यात्रादिने सप्तमे च पूजयेच्च त्रिविक्रमम् ॥३२३॥
नीराजनोक्तमन्त्रैश्च आयुधं वाहनं यजेत् ।
पुण्याहजयशब्देन मन्त्रमेतन्निशामयेत् ॥३२४॥
दिव्यान्तरीक्षभूमिष्ठाः सन्त्वायुर्दाः सुराश्च ते ।
देवसिद्धिं प्राप्नुहि त्वं देवयात्रास्तु सा तव ॥३२५॥
रक्षन्तु देवताः सर्वा इति श्रुत्वा नृपो व्रजेत् ।
गृहीत्वा सशरञ्चापं धनुर्नागेति मन्त्रतः ॥३२६॥
तद्विष्णोरिति जप्त्वाथ दद्याद् रिपुमुखे पदम् ।
दक्षिणं पदं द्वात्रिंशद् दिक्षु प्राच्यादिषु क्रमात् ॥३२७॥
नागं रथं हयञ्चैव धुर्यांश्चैवारुहेत् क्रमात् ।
आरुह्य वाद्यैर्गच्छेत पृष्ठतो नावलोकयेत् ॥३२८॥

क्रोशमात्रं गतस्तिष्ठेत् पूजयेद्देवताद्विजान ।
परदेशं व्रजेत् पश्चादात्मसैन्यं हि पालयन ॥३२६॥
राजा प्राप्य विदेशन्तु देशपालन्तु पालयेत् ।
देवानां पूजनं कुर्यान्न छिन्द्यादायमत्र तु ॥३३०॥
नावमानयेत्तद्देश्यानागत्य स्वपुरं पुनः ।
जयं प्राप्यार्चयेद्देवान् दद्याद्दानानि पार्थिवः ॥३३१॥
द्वितीयेऽहनि सङ्ग्रामो भविष्यति यदा तदा ।
स्नापयेद् गजमश्वादि यजेद्देवं नृसिंहकम् ॥३३२॥
छत्रादिराजलिङ्गानि शस्त्राणि निशि वै गणान् ।
प्रातर्नृसिंहकं पूज्य वाहनाद्यमशेषतः ॥३३३॥
पुरोधसा हुतं पश्येद्वह्निं हुत्वा द्विजान्यजेत ।
गृहीत्वा सशरश्चापं गजाद्यारुह्य वै व्रजेत् ॥३३४॥
देशे त्वदृश्यः शत्रूणां कुर्यात्प्रकृतिकल्पनाम् ।
संहतान् योधयेदल्पान् कामं विस्तारयेद् बहून् ॥३३५॥
सूचीमुखमनीकं स्यादल्पानां बहुभिः सह ।
व्यूहाः प्राण्यङ्गरूपाश्च द्रव्यरूपाश्च कीर्तिताः ॥३३६॥
गरुडो मकरव्यूहश्चक्रः श्येनस्तथैव च ।
अर्द्धचन्द्रश्च वज्रश्च शकटव्यूह एव च ॥३३७॥
मण्डलः सर्वतोभद्रः सूचीव्यूहश्च ते नराः ।
व्यूहानामथ सर्वेषां पञ्चधा सैन्यकल्पना ॥३३८॥
द्वौ पक्षावनुपक्षौ द्वाववश्यं पञ्चमं भवेत् ।
एकेन यदि वा द्वाभ्यां भागाभ्यां युद्धमाचरेत ॥३३९॥
भागत्रयं स्थापयेत्तु तेषां रक्षार्थमेव च ।
न व्यूहकल्पना कार्या राज्ञो भवति कर्हिचित ॥३४०॥
मूलच्छेदे विनाशः स्यान्न युध्येत स्वयं नृपः ।
सैन्यस्य पश्चात्तिष्ठेत्तु क्रोशमात्रे महीपतिः ॥३४१॥
भग्नसन्धारणं तत्र योधानां परिकीर्तितम् ।
प्रधानभङ्गे सैन्यस्य नावस्थानं विधीयते ॥३४२॥
न संहतान्न विरलान्योधान् व्यूहे प्रकल्पयेत ।
आयुधानान्तु सम्मर्दो यथा न स्यात्परस्परम् ॥३४३॥

भेत्तुकाम: परानीकं संहतैरेव भेदयेत् ।
भेदरक्ष्या: परेणापि कर्तव्या: संहतास्तथा ॥३४४॥
व्यूहं भेदावहं कुर्यात परव्यूहेषु चेच्छया ।
गजस्य पादरक्षार्थाश्चत्वारस्तु तथा द्विज ! ॥३४५॥
रथस्य चाश्वाश्चत्वार: समास्तस्य च चर्मिण: ।
धन्विनश्चर्मिभिस्तुल्या: पुरस्ताच्चर्मिणो रणे ॥३४६॥
पृष्ठतो धन्विन: पश्चाद्धन्विनान्तुरगा रथा: ।
रथानां कुञ्जरा: पश्चाद्दातव्या: पृथिवीक्षिता ॥३४७॥
पदातिकुञ्जराश्वानां धर्मकार्यं प्रयत्नत: ।
शूरा: प्रमुखतो देया: स्कन्धमात्रप्रदर्शनम् ॥३४८॥
कर्तव्यं भीरुसङ्घेन शत्रुविद्रावकारकम् ।
दारयन्ति पुरस्तात्तु न देया भीरव: पुर: ॥३४९॥
प्रोत्साहयन्त्येव रणे भीरून् शूरा: पुरस्थिता: ।
प्रांशव: शुकनासाश्च ये चाजिह्मेक्षणा नरा: ॥३५०॥
संहतभ्रूयुगाश्चैव क्रोधना: कलहप्रिया: ।
नित्यहृष्टा: प्रहृष्टाश्च शूरा ज्ञेयाश्च कामिन: ॥३५१॥
संहतानां हतानाञ्च रणापनयनक्रिया ।
प्रतियुद्धं गजानाञ्च तोयदानादिकञ्च यत् ॥३५२॥
आयुधानयनं चैव पत्तिकर्म विधीयते ।
रिपूणां भेत्तुकामानां स्वसैन्यस्य तु रक्षणम् ॥३५३॥
भेदनं संहतानाञ्च चर्मिणां कर्म कीर्तितम् ।
विमुखीकरणं युद्धे धन्विनां च तथोच्यते ॥३५४॥
दूरापसरणं यानं सुहतस्य तथोच्यते ।
त्रासनं रिपुसैन्यानां रथकर्म तथोच्यते ॥३५५॥
भेदनं संहतानाञ्च भेदानामपि संहति: ।
प्राकारतोरणाट्टालद्रुमभङ्गश्च सद्गजे ॥३५६॥
पत्तिभूर्विषमा ज्ञेया रथाश्वस्य तथा समा ।
सकर्दमा च नागानां युद्धभूमिरुदाहृता ॥३५७॥
एवं विरचितव्यूह: कृतपृष्ठदिवाकर: ।
तथानुलोमशुक्रार्किदिकपालमृदुमारुता: ॥३५८॥

योधानुत्तेजयेत्सर्वान्नामगोत्रावदानतः ।
भोगप्राप्त्या च विजये स्वर्गप्राप्त्या मृतस्य च ॥३५९॥
जित्वारीन् भोगसम्प्राप्तिर्मृतस्य च परा गतिः ।
निष्कृतिः स्वामिपिण्डस्य नास्ति युद्धसमा गतिः ॥३६०॥
शूराणां रक्तमायाति तेन पापं त्यजन्ति ते ।
घातादिदुःखसहनं रणे तत्परमं तपः ॥३६१॥
वराप्सरःसहस्राणि यान्ति शूरं रणे मृतम् ।
स्वामी सुकृतमादत्ते भग्नानां विनिवर्त्तिनाम् ॥३६२॥
ब्रह्महत्याफलं तेषां तथा प्रोक्तं पदे पदे ।
त्यक्त्वा सहायान् यो गच्छेद्देवास्तस्य विनष्टये ॥३६३॥
अश्वमेधफलं प्रोक्तं शूराणामनिवर्तिनाम् ।
धर्मनिष्ठे जयो राज्ञि योद्धव्याश्च समाः समैः ॥३६४॥
गजाद्यैश्च गजाद्याश्च न हन्तव्याः पलायिनः ।
न प्रेक्षकाः प्रविष्टाश्च अशस्त्राः पतितादयः ॥४६५॥
शान्ते निद्राभिभूते च अर्द्धोत्तीर्णे नदीवने ।
दुर्दिने कूटयुद्धानि शत्रुनाशार्थमाचरेत् ॥३६६॥
बाहू प्रगृह्य विक्रोशेद्भग्ना भग्नाः परे इति ।
प्राप्तं मित्रं बलं भूरि नायकोऽत्र निपातितः ॥३६७॥
सेनानीर्निहतश्चायं भूपतिश्चापि विप्लुतः ।
विद्रुतानान्तु योधानां सुखं घातो विधीयते ॥३६८॥
धूपाश्च देया धर्मज्ञ ! तथा च परमोहनाः ।
पताकाश्चैव सम्भारो वादित्राणां भयावहः ॥३६९॥
सम्प्राप्य विजयं युद्धे देवान्विप्रांश्च संयजेत् ।
रत्नानि राजगामीनि अमात्येन कृते रणे ॥३७०॥
तस्य स्त्रियो न कस्यापि रक्ष्यास्ताश्च परस्य च ।
शत्रुं प्राप्य रणे मुक्तं पुत्रवत्परिपालयेत् ॥३७१॥
पुनस्तेन न योद्धव्यं देशाचारादि पालयेत् ।
ततश्च स्वपुरं प्राप्य ध्रुवे भे प्रविशेद् गृहम् ॥३७२॥
देवादिपूजनं कुर्याद्रक्षेद्योधकुटुम्बकम् ।

संविभागं परावाप्तैः कुर्याद् भृत्यजनस्य च ॥३७३॥
रणदीक्षा मयोक्ता ते जयाय नृपतेर्ध्रुवा ॥३७४॥
इत्याग्नेये महापुराणे रणदीक्षा नाम पञ्चत्रिंशदधिकद्विशततमोऽध्यायः ॥

अथ सप्तत्रिंशदधिकद्विशततमोऽध्यायः ।

रामोक्तनीतिः ।

अग्निरुवाच —

नीतिस्ते पुष्करोक्ता तु रामोक्ता लक्ष्मणाय या ।
जयाय तां प्रवक्ष्यामि शृणु धर्मादिवर्द्धनीम् ॥३७५॥

राम उवाच —

न्यायेनार्जनमर्थस्य वर्द्धनं रक्षणं चरेत् ।
सत्पात्रप्रतिपत्तिश्च राजवृत्तं चतुर्विधम् ॥३७६॥
नयस्य विनयो मूलं विनयः शास्त्रनिश्चयात् ।
विनयो हीन्द्रियजयस्तैर्युक्तः पालयेन्महीम् ॥३७७॥
शास्त्रं प्रज्ञा धृतिर्दाक्ष्यं प्रागल्भ्यं धारयिष्णुता ।
उत्साहो वाग्मितौदार्यमापत्कालसहिष्णुता ॥३७८॥
प्रभावः शुचिता मैत्री त्यागः सत्यं कृतज्ञता ।
कुलं शीलं दमश्चेति गुणाः सम्पत्तिहेतवः ॥३७९॥
प्रकीर्णविषयारण्ये धावन्तं विप्रमाथिनम् ।
ज्ञानाङ्कुशेन कुर्वीत वश्यमिन्द्रियदन्तिनम् ॥३८०॥
कामः क्रोधस्तथा लोभो हर्षो मानो मदस्तथा ।
षड्वर्गमुत्सृजेदेनमस्मिंस्त्यक्ते सुखी नृपः ॥३८१॥
आन्वीक्षिकीं त्रयीं वार्त्तां दण्डनीतिं च पार्थिवः ।
तद्विद्यैस्तत्क्रियोपेतैश्चिन्तयेद् विनयान्वितः ॥३८२॥
आन्वीक्षिक्यार्थविज्ञानं धर्माधर्मौ त्रयीस्थितौ ।
अर्थानर्थौ तु वार्त्तायां दण्डनीत्यां नयानयौ ॥३८३॥
अहिंसा सूनृता वाणी सत्यं शौचं दया क्षमा ।
वर्णिनां लिङ्गिनां चैव सामान्यो धर्म उच्यते ॥३८४॥
प्रजाः समनुगृह्णीयात् कुर्यादाचारसंस्थितिम् ।

वाक् सूनृता दया दानं दीनोपगतरक्षणम् ॥३८५॥
इति वृत्तं सतां साधुहितं सत्पुरुषव्रतम् ।
आधिव्याधिपरीताय अद्य श्वो वा विनाशिने ॥३८६॥
को हि राजा शरीराय धर्मापेतं समाचरेत् ।
न हि स्वसुखमन्विच्छन् पीडयेत्कृपणं जनम् ॥३८७॥
कृपणः पीड्यमानो हि मन्युना हन्ति पार्थिवम् ।
क्रियतेऽभ्यर्हणीयाय स्वजनाय यथाञ्जलिः ॥३८८॥
ततः साधुतरः कार्यो दुर्जनाय शिवार्थिना ।
प्रियमेवाभिधातव्यं सत्सु नित्यं द्विषत्सु च ॥३८९॥
देवास्ते प्रियवक्तारः पशवः क्रूरवादिनः ।
शुचिरास्तिक्यपूतात्मा पूजयेद्देवताः सदा ॥३९०॥
देवतावद् गुरुजनमात्मवच्च सुहृज्जनम् ।
प्रणिपातेन हि गुरुं सतोऽमृषानुचेष्टितैः ॥३९१॥
कुर्वीताभिमुखान् भृत्यैर्देवान् सुकृतकर्मणा ।
सद्भावेन हरेन्मित्रं सम्भ्रमेण च बान्धवान् ॥३९२॥
स्त्रीभृत्यान् प्रेमदानाभ्यां दाक्षिण्येनेतरं जनम् ।
अनिन्दा परकृत्येषु स्वधर्मपरिपालनम् ॥३९३॥
कृपणेषु दयालुत्वं सर्वत्र मधुरा गिरः ।
प्राणैरप्युपकारित्वं मित्रायाव्यभिचारिणे ॥३९४॥
गृहागते परिष्वङ्गः शक्त्या दानं सहिष्णुता ।
स्वसमृद्धिष्वनुत्सेकः परवृद्धिष्वमत्सरः ॥३९५॥
अपरोपतापि वचनं मौनव्रतचरिष्णुता ।
बन्धुभिर्बद्धसंयोगः स्वजने चतुरस्रता ।
उचितानुविधायित्वमिति वृत्तं महात्मनाम् ॥३९६॥

इत्याग्नेये महापुराणे रामोक्तनीतिर्नाम सप्तत्रिंशदधिक-
द्विशततमोऽध्यायः ॥

अथाष्टत्रिंशदधिकद्विशततमोऽध्यायः ।

राजधर्माः ।

राम उवाच—

स्वाम्यमात्यं च राष्ट्रं च दुर्गं कोषो बलं सुहृत् ।
परस्परोपकारीदं सप्ताङ्गं राज्यमुच्यते ॥३९७॥
राज्याङ्गानां वरं राष्ट्रं साधनं पालयेत् सदा ।
कुलं शीलं वयः सत्त्वं दाक्षिण्यं क्षिप्रकारिता ॥३९८॥
अविसंवादिता सत्यं वृद्धसेवा कृतज्ञता ।
दैवसम्पन्नता बुद्धिरक्षुद्रपरिवारता ॥३९९॥
शक्यसामन्तता चैव तथा च दृढभक्तिता ।
दीर्घदर्शित्वमुत्साहः शुचिता स्थूललक्षिता ॥४००॥
विनीतत्वं धार्मिकता साधोश्च नृपतेर्गुणाः ।
प्रख्यातवंशमक्रूरं लोकसङ्ग्राहिणं शुचिम् ॥४०१॥
कुर्वीतात्महिताकाङ्क्षी परिचारं महीपतिः ।
वाग्मी प्रगल्भः स्मृतिमानुदग्रो बलवान् वशी ॥४०२॥
नेता दण्डस्य निपुणः कृतशिल्पपरिग्रहः ।
पराभियोगप्रसहः सर्वदुष्टप्रतिक्रियः ॥४०३॥
परवृत्तान्ववेक्षी च सन्धिविग्रहतत्त्ववित् ।
गूढमन्त्रप्रचारज्ञो देशकालविभागवित् ॥४०४॥
आदाता सम्यगर्थानां विनियोक्ता च पात्रवित् ।
क्रोधलोभभयद्रोहदम्भचापलवर्जितः ॥४०५॥
परोपतापपैशुन्यमात्सर्येर्ष्यानृतातिगः ।
वृद्धोपदेशसम्पन्नः शक्तो मधुरदर्शनः ॥४०६॥
गुणानुरागस्थितिमानात्मसम्पद्गुणाः स्मृताः ।
कुलीनाः शुचयः शूराः श्रुतवन्तोऽनुरागिणः ॥४०७॥
दण्डनीतेः प्रयोक्तारः सचिवाः स्युर्महीपतेः ।
सुविग्रहो जानपदः कुलशीलकलान्वितः ॥४०८॥
वाग्मी प्रगल्भश्चक्षुष्मानुत्साही प्रतिपत्तिमान ।
दम्भचापलहीनश्च मैत्रः क्लेशसहः शुचिः ॥४०९॥

सत्यसत्त्वधृतिस्थैर्यप्रभावारोग्यसंयुतः ।
कृतशिल्पश्च दक्षश्च प्रज्ञावान् धारणान्वितः ॥४१०॥
दृढभक्तिरकर्त्ता च वैराणां सचिवो भवेत् ।
स्मृतिस्तत्परतार्थेषु चित्तज्ञो ज्ञाननिश्चयः ॥४११॥
दृढता मन्त्रगुप्तिश्च मन्त्रिसम्पत् प्रकीर्त्तिता ।
त्रय्यां च दण्डनीत्याञ्च कुशलः स्यात्पुरोहितः ॥४१२॥
अथर्ववेदविहितं कुर्याच्छान्तिकपौष्टिकम् ।
साधुतैषाममात्यानां तद्विद्यैः सह बुद्धिमान् ॥४१३॥
चक्षुष्मत्तां च शिल्पञ्च परीक्षेत गुणाद्वयम् ।
स्वजनेभ्यो विजानीयात् कुलं स्थानमवग्रहम् ॥४१४॥
परिकर्मसु दक्षञ्च विज्ञानं धारयिष्णुताम् ।
गुणत्रयं परीक्षेत प्रागल्भ्यं प्रीतितां तथा ॥४१५॥
कथायोगेषु बुध्येत वाग्मित्वं सत्यवादिताम् ।
उत्साहं च प्रभावं च तथा क्लेशसहिष्णुताम् ॥४१६॥
धृतिं चैवानुरागं च स्थैर्यञ्चापदि लक्षयेत् ।
भक्तिं मैत्रीं च शौचं च जानीयाद् व्यवहारतः ॥४१७॥
संवासिभ्यो बलं सत्त्वमारोग्यं शीलमेव च ।
अस्तब्धतामचापल्यं वैराणां चाप्यकीर्तनम् ॥४१८॥
प्रत्यक्षतो विजानीयाद् भद्रतां क्षुद्रतामपि ।
फलानुमेयाः सर्वत्र परोक्षगुणवृत्तयः ॥४१९॥
सस्याकरवती पुण्या खनिद्रव्यसमन्विता ।
गोहिता भूरिसलिला पुण्यैर्जनपदैर्युता ॥४२०॥
रम्या सकुञ्जरबला वारिस्थलपथान्विता ।
अदेवमातृका चेति शस्यते भूरिभूतये ॥४२१॥
शूद्रकारुवणिक्प्रायो महारम्भः कृषीबलः ।
सानुरागो रिपुद्वेषी पीडासहकरः पृथुः ॥४२२॥
नानादेश्यैः समाकीर्णो धार्मिकः पशुमान् बली ।
ईदृक् जनपदः शस्तोऽमूर्खव्यसनिनायकः ॥४२३॥
पृथुसीमं महाखातमुच्चप्राकारतोरणम् ।
पुरं समावसेच्छैलसरिन्मरुवनाश्रयम् ॥४२४॥

जलवद्धान्यधनवद् दुर्गं कालसहं महत् ।
औदकं पार्वतं वार्क्षमैरिणं धन्विनं च षट् ॥४२५॥
ईप्सितद्रव्यसम्पूर्णः पितृपैतामहोचितः ।
धर्मार्जितो व्ययसहः कोषो धर्मादिवृद्धये ॥४२६॥
पितृपैतामहो वश्यः संहतो दत्तवेतनः ।
विख्यातपौरुषो जन्यः कुशलः शकुनैर्वृतः ॥४२७॥
नानाप्रहरणोपेतो नानायुद्धविशारदः ।
नानायोधसमाकीर्णो नीराजितहयद्विपः ॥४२८॥
प्रवासायासदुःखेषु युद्धेषु च कृतश्रमः ।
अद्वैधक्षत्रियप्रायो दण्डो दण्डवतां मतः ॥४२९॥
योगविज्ञानसत्त्वाढ्यं महापक्षं प्रियम्वदम् ।
आयतिक्षममद्वैधं मित्रं कुर्वीत सत्क्रियम् ॥४३०॥
दूरादेवाभिगमनं स्पष्टार्थहृदयानुगा ।
वाक् सत्कृत्य प्रदानञ्च त्रिविधो मित्रसंग्रहः ॥४३१॥
धर्मकामार्थसंयोगो मित्रात्तु त्रिविधं फलम् ।
औरसं तत्र सम्बद्धं तथा वंशक्रमागतम् ॥४३२॥
रक्षितं व्यसनेभ्यश्च मित्रं ज्ञेयं चतुर्विधम् ।
मित्रे गुणाः सत्यताद्याः समानसुखदुःखता ॥४३३॥
वक्ष्येऽनुजीविनां वृत्तं सेवी सेवेत भूपतिम् ।
दक्षता भद्रता दार्ढ्यं क्षान्तिः क्लेशसहिष्णुता ॥४३४॥
सन्तोषः शीलमुत्साहो मण्डयत्यनुजीविनम् ।
यथाकालमुपासीत राजानं सेवको नयात् ॥४३५॥
परस्थानगमं क्रौर्यमौद्धत्यं मत्सरं त्यजेत् ।
विगृह्य कथनं भृत्यो न कुर्याज्ज्यायसा सह ॥४३६॥
गुह्यं मर्म च मन्त्रञ्च नच भर्तुः प्रकाशयेत् ।
रक्ताद् वृत्तिं समीहेत विरक्तं सन्त्यजेन्नृपम् ॥४३७॥
अकार्ये प्रतिषेधश्च कार्ये चापि प्रवर्त्तनम् ।
सङ्क्षेपादिति सद्वृत्तं बन्धुमित्रानुजीविनाम् ॥४३८॥
आजीव्यः सर्वसत्त्वानां राजा पर्जन्यवद्भवेत् ।
आयद्वारेषु चाप्यर्थं करमेवाददीत च ॥४३९॥

कुर्यादुद्योगसम्पन्नानध्यक्षान् सर्वकर्मसु ।
कृषिर्वणिक्पथो दुर्गं सेतुः कुञ्जरबन्धनम् ॥४४०॥
खन्याकरबलादानं शून्यानां च निवेशनम् ।
अष्टवर्गमिमं राजा साधुवृत्तोऽनुपालयेत् ॥४४१॥
आयुक्तिकेभ्यश्चौरेभ्यः पौरेभ्यो राजवल्लभात् ।
पृथिवीपतिलोभाच्च प्रजानां पञ्चधा भयम् ॥४४२॥
अवेक्ष्यैतद्भयं काल आददीत करं नृपः ।
आभ्यन्तरं शरीरं स्वं बाह्यं राष्ट्रञ्च रक्षयेत् ॥४४३॥
दण्ड्यांस्तु दण्डयेद्राजा स्वं रक्षेच्च विषादितः ।
स्त्रियः पुत्रांश्च शत्रुभ्यो विश्वसेन्न कदाचन ॥४४४॥
इत्याग्नेये महापुराणे राजधर्मो नामाष्टत्रिंशदधिकद्विशततमोऽध्यायः ॥

अथोनचत्वारिंशदधिकद्विशततमोऽध्यायः ।

षाड्गुण्यम् ।

राम उवाच—

मण्डलं चिन्तयेन्मुख्यं राजा द्वादशराजकम् ।
अरिर्मित्रमरेर्मित्रं मित्रमित्रमतः परम् ॥४४५॥
तथारिमित्रमित्रञ्च विजिगीषोः पुरः स्मृताः ।
पार्ष्णिग्राहः स्मृतः पश्चादाक्रन्दस्तदनन्तरम् ॥४४६॥
आसारावनयोश्चैवं विजिगीषोश्च मण्डलम् ।
अरेश्च विजिगीषोश्च मध्यमो भूम्यनन्तरः ॥४४७॥
अनुग्रहे संहतयोर्निग्रहे व्यस्तयोः प्रभुः ।
मण्डलाद् बहिरेतेषामुदासीनो बलाधिकः ॥४४८॥
अनुग्रहे संहतानां व्यस्तानां च वधे प्रभुः ।
सन्धिञ्च विग्रहं यानमासनादि वदामि ते ॥४४९॥
बलवद्विगृहीतेन सन्धिं कुर्याच्छिवाय च ।
कपाल उपहारश्च सन्तानः सङ्गतस्तथा ॥४५०॥
उपन्यासः प्रतीकारः संयोगः पुरुषान्तरः ।
अदृष्टनर आदिष्ट आत्मापि स उपग्रहः ॥४५१॥

परिक्रमस्तथा छिन्नस्तथा च परदूषणम् ।
स्कन्धोपनेयः सन्धिश्च सन्धयः षोडशेरिताः ॥४५२॥
परस्परोपकारश्च मैत्रः सम्बन्धकस्तथा ।
उपहारश्च चत्वारस्तेषु मुख्याश्च सन्धयः ॥४५३॥
बालो वृद्धो दीर्घरोगस्तथा बन्धुबहिष्कृतः ।
भीरुको भीरुकजनो लुब्धो लुब्धजनस्तथा ॥४५४॥
विरक्तप्रकृतिश्चैव विषयेष्वतिशक्तिमान् ।
अनेकचित्तमन्त्रश्च देवब्राह्मणनिन्दकः ॥४५५॥
दैवोपहतकश्चैव दैवनिन्दक एव च ।
दुर्भिक्षव्यसनोपेतो बलव्यसनसंकुलः ॥४५६॥
स्वदेशस्थो बहुरिपुर्मुक्तः कालेन यश्च ह ।
सत्यधर्मव्यपेतश्च विंशतिः पुरुषा अमी ॥४५७॥
एतैः सन्धिं न कुर्वीत विगृह्णीयात्तु केवलम् ।
परस्परापकारेण पुंसां भवति विग्रहः ॥४५८॥
आत्मनोऽभ्युदयाकांक्षी पीड्यमानः परेण वा ।
देशकालबलोपेतः प्रारभेतेह विग्रहम् ॥४५९॥
राज्यस्त्रीस्थानदेशानां ज्ञानस्य च बलस्य च ।
अपहारो मदो मानः पीडा वैषयिकी तथा ॥४६०॥
ज्ञानात्मशक्तिधर्माणां विघातो दैवमेव च ।
मित्रार्थश्चापमानश्च तथा बन्धुविनाशनम् ॥४६१॥
भूतानुग्रहविच्छेदस्तथा मण्डलदूषणम् ।
एकार्थाभिनिवेशित्वमिति विग्रहयोनयः ॥४६२॥
सापत्न्यं वास्तुजं स्त्रीजं वाग्जातमपराधजम् ।
वैरं पञ्चविधं प्रोक्तं साधनैः प्रशमं नयेत् ॥४६३॥
किञ्चित्फलं निष्फलं वा सन्दिग्धफलमेव च ।
तदात्वे दोषजननमायत्याञ्चैव निष्फलम् ॥४६४॥
आयत्याञ्च तदात्वे च दोषसञ्जननं तथा ।
अपरिज्ञातवीर्येण परेण स्तोभितोऽपि वा ॥४६५॥
परार्थं स्त्रीनिमित्तञ्च दीर्घकालं द्विजैः सह ।
अकालदैवयुक्तेन बलोद्धतसखेन च ॥४६६॥

तदात्वे फलसंयुक्तमायत्यां फलवर्जितम् ।
आयत्यां फलसंयुक्तं तदात्वे निष्फलं तथा ॥४६७॥
इतीमं षोडशविधन्न कुर्यादेव विग्रहम् ।
तदात्वायतिसंशुद्धं कर्म राजा सदाचरेत् ॥४६८॥
हृष्टं पुष्टं बलं मत्वा गृह्णीयाद्विपरीतकम् ।
मित्रमाक्रन्द आसारो यदा स्युर्दृढभक्तयः ॥४६९॥
परस्य विपरीतश्च तदा विग्रहमाचरेत् ।
विगृह्य सन्धाय तथा सम्भूयाथ प्रसङ्गतः ॥४७०॥
उपेक्षया च निपुणैर्यानं पञ्चविधं स्मृतम् ।
परस्परस्य सामर्थ्यविघातादासनं स्मृतम् ॥४७१॥
अरेश्च विजिगीषोश्च यानवत् पञ्चधा स्मृतम् ।
बलिनोर्द्विषतोर्मध्ये वाचात्मानं समर्पयन् ॥४७२॥
द्वैधीभावेन तिष्ठेत काकाक्षिवदलक्षितः ।
उभयोरपि सम्पाते सेवेत बलवत्तरम् ॥४७३॥
यदा द्वावपि नेच्छेतां संश्लेषं जातसंविदौ ।
तदोपसर्पेत्तच्छत्रुमधिकं वा स्वयं व्रजेत् ॥४७४॥
उच्छिद्यमानो बलिना निरुपायप्रतिक्रियः ।
कुलोद्भवं सत्यमार्यमासेवेत बलोत्कटम् ॥४७५॥
तद्दर्शनोपास्तिकता नित्यन्तद्भावभाविता ।
तत्कारितप्रश्रयिता वृत्तं संश्रयिणः श्रुतम् ॥४७६॥
इत्याग्नेये महापुराणे षाड्गुण्यं नामैकोनचत्वारिंशदधिक-
द्विशततमोऽध्यायः ॥

अथ चत्वारिंशदधिकद्विशततमोऽध्यायः।

सामादिः ।

राम उवाच—

प्रभावोत्साहशक्तिभ्यां मन्त्रशक्तिः प्रशस्यते ।
प्रभावोत्साहवान् काव्यो जितो देवपुरोधसा ॥४७७॥
मन्त्रयेतेह कार्याणि नानाप्तैर्नाविपश्चिता ।

अशक्यारम्भवृत्तीनां कुतः क्लेशादृते फलम् ॥४७८॥
अविज्ञातस्य विज्ञानं विज्ञातस्य च निश्चयः ।
अर्थद्वैधस्य सन्देहच्छेदनं शेषदर्शनम् ॥४७९॥
सहायाः साधनोपाया विभागो देशकालयोः ।
विपत्तेश्च प्रतीकारः पञ्चाङ्गो मन्त्र इष्यते ॥४८०॥
मनःप्रसादः श्रद्धा च तथा करणपाटवम् ।
सहायोत्थानसम्पच्च कर्मणां सिद्धिलक्षणम् ॥४८१॥
मनःप्रमादः कामश्च सुप्तप्रलपितानि च ।
भिन्दन्ति मन्त्रं प्रच्छन्नाः कामिन्यो रमतां तथा ॥४८२॥
प्रगल्भः स्मृतिमान्वाग्मी शस्त्रे शास्त्रे च निष्ठितः ।
अभ्यस्तकर्मा नृपतेर्दूतो भवितुमर्हति ॥४८३॥
निसृष्टार्थो मितार्थश्च तथा शासनहारकः ।
सामर्थ्यात् पादतो हीनो दूतस्तु त्रिविधः स्मृतः ॥४८४॥
नाविज्ञातं पुरं शत्रोः प्रविशेच्च न संसदम् ।
कालमीक्षेत कार्यार्थमनुज्ञातश्च निष्पतेत् ॥४८५॥
छिद्रं च शत्रोर्जानीयात् कोषमित्रबलानि च ।
रागापरागौ जानीयाद् दृष्टिगात्रविचेष्टितैः ॥४८६॥
कुर्याच्चतुर्विधं स्तोत्रं पक्षयोरुभयोरपि ।
तपस्विव्यञ्जनोपेतैः सुचरैः सह संवसेत् ॥४८७॥
चरः प्रकाशो दूतः स्यादप्रकाशश्चरो द्विधा ।
वणिक् कृषीवलो लिङ्गी भिक्षुकाद्यात्मकाश्चराः ॥४८८॥
यायादरिं व्यसनिनं निष्फले दूतचेष्टिते ।
प्रकृतिव्यसनं यत्स्यात्तत् समीक्ष्य समुत्पतेत् ॥४८९॥
अनयाद् व्यस्यति श्रेयस्तस्मात्तद् व्यसनं स्मृतम् ।
हुताशनो जलं व्याधिर्दुर्भिक्षं मरकं तथा ॥४९०॥
इति पञ्चविधं दैवं व्यसनं मानुषं परम् ।
दैवं पुरुषकारेण शान्त्या च प्रशमं नयेत् ॥४९१॥
उत्थापितेन नीत्या च मानुषं व्यसनं हरेत् ।
मन्त्रो मन्त्रफलावाप्तिः कार्यानुष्ठानमायतिः ॥४९२॥
आयव्ययौ दण्डनीतिरमित्रप्रतिषेधनम् ।

व्यसनस्य प्रतीकारो राज्यराजाभिरक्षणम् ॥४९३॥
इत्यमात्यस्य कर्मेदं हन्ति स व्यसनान्वितः ।
हिरण्यधान्यवस्त्राणि वाहनं प्रजया भवेत् ॥४९४॥
तथान्ये द्रव्यनिचया हन्ति सव्यसना प्रजा ।
प्रजानामापदिस्थानां रक्षणं कोषदण्डयोः ॥४९५॥
पौराणाश्चोपकुर्वन्ति संश्रयादिह दुर्दिनम् ।
तूष्णीं युद्धं जनत्राणं मित्रामित्रपरिग्रहः ॥४९६॥
सामन्तादिकृते दोषे नश्येत्तद् व्यसनाच्च तत् ।
भृत्यानां भरणं दानं प्रजामित्रपरिग्रहः ॥४९७॥
धर्मकामादिभेदश्च दुर्गसंस्कारभूषणम् ।
कोषात्तद् व्यसनाद् हन्ति कोषमूलो हि भूपतिः ॥४९८॥
मित्रामित्रावनीहेमसाधनं रिपुमर्दनम् ।
दूरकार्याशुकारित्वं दण्डात्तद् व्यसनाद् हरेत् ॥४९९॥
राजा सव्यसनी हन्याद्राजकार्याणि यानि च ।
वाग्दण्डयोश्च पारुष्यमर्थदूषणमेव च ॥५००॥
पानं स्त्री मृगया द्यूतं व्यसनानि महीपतेः ।
आलस्यं स्तब्धता दर्पः प्रमादो द्वैधकारिता ॥५०१॥
इति पूर्वोपदिष्टश्च सचिवव्यसनं स्मृतम् ।
अनावृष्टिश्च पीडादी राष्ट्रव्यसनमुच्यते ॥५०२॥
विशीर्णयन्त्रप्राकारपरिखात्वमशस्त्रता ।
क्षीणया सेनया नद्धं दुर्गव्यसनमुच्यते ॥५०३॥
व्ययीकृतः परिक्षिप्तोऽप्रजितोऽसञ्चितस्तथा ।
दूषितो दूरसंस्थश्च कोषव्यसनमुच्यते ॥५०४॥
उपरुद्धं परिक्षिप्तममानितविमानितम् ।
अभृतं व्याधितं श्रान्तं दूरायातं नवागतम् ॥५०५॥
परिक्षीणं प्रतिहतं प्रहताग्रतरं तथा ।
आशानिर्वेदभूयिष्ठमनृतप्राप्तमेव च ॥५०६॥
कलत्रगर्भं निक्षिप्तमन्तःशल्यं तथैव च ।
विच्छिन्नवीवधासारं शून्यमूलं तथैव च ॥५०७॥
अस्वाम्यसंहतं वापि भिन्नकूटं तथैव च ।

दुष्पार्ष्णिग्राहमर्थश्च बलव्यसनमुच्यते ॥५०८॥
दैवोपपीडितं मित्रं ग्रस्तं शत्रुबलेन च ।
कामक्रोधादिसंयुक्तमुत्साहादरिभिर्भवेत् ॥५०९
अर्थस्य दूषणं क्रोधात् पारुष्यं वाक्यदण्डयोः ।
कामजं मृगया द्यूतं व्यसनं पानकं स्त्रियः ॥५१०॥
वाक्पारुष्यं परं लोके उद्वेजनमनर्थकम् ।
असिद्धसाधनं दण्डस्तं युक्त्याऽवनयेन्नृपः ॥५११॥
उद्वेजयति भूतानि दण्डपारुष्यवान् नृपः ।
भूतान्युद्वेज्यमानानि द्विषतां यान्ति संश्रयम् ॥५१२॥
विवृद्धाः शत्रवश्चैव विनाशाय भवन्ति ते ।
दूष्यस्य दूषणार्थश्च परित्यागो महीयसः ॥५१३॥
अर्थस्य नीतितत्त्वज्ञैरर्थदूषणमुच्यते ।
पानात्कार्यादिनो ज्ञानं मृगयातोऽरितः क्षयः ॥५१४॥
जितश्रमार्थं मृगयां विचरेद्रक्षिते वने ।
धर्मार्थप्राणनाशादि द्यूते स्यात्कलहादिकम् ॥५१५॥
कालातिपातो धर्मार्थपीडा स्त्रीव्यसनाद्भवेत् ।
पानदोषात् प्राणनाशः कार्याकार्याविनिश्चयः ॥५१६॥
स्कन्धावारनिवेशज्ञो निमित्तज्ञो रिपुं जयेत् ।
स्कन्धावारस्य मध्ये तु सकोषं नृपतेर्गृहम् ॥५१७॥
मौलिभूतं श्रेणिसुहृद् द्विषदाटविकं बलम् ।
राजहर्म्यं समावृत्य क्रमेण विनिवेशयेत् ॥५१८॥
सैन्यैकदेशः सन्नद्धः सेनापतिपुरस्सरः ।
परिभ्रमेच्चत्वरांश्च मण्डलेन बहिर्निशि ॥५१९॥
वार्ताः स्वका विजानीयाद् दूरसीमान्तचारिणः ।
निर्गच्छेत्प्रविशेच्चैव सर्व एवोपलक्षितः ॥५२०॥
सामदानं च भेदश्च दण्डोपेक्षेन्द्रजालकम् ।
मायोपायाः सप्त परे निक्षिपेत्साधनाय तान् ॥५२१॥
चतुर्विधं स्मृतं साम उपकारानुकीर्तनात् ।
मिथःसम्बन्धकथनं मृदुपूर्वं च भाषणम् ॥५२२॥
आयाते दर्शनं वाचा तवाहमिति चार्पणम् ।

यः सम्प्राप्रधनोत्सर्ग उत्तमाधममध्यमः ॥५२३॥
प्रतिदानं तदा तस्य गृहीतस्यानुमोदनम् ।
द्रव्यदानमपूर्वं च स्वयंग्राहप्रवर्तनम् ॥५२४॥
देयश्च प्रतिमोक्षश्च दानं पञ्चविधं स्मृतम् ।
स्नेहरागापनयनसंहर्षोत्पादनं तथा ॥५२५॥
मिथो भेदश्च भेदज्ञैर्भेदश्च त्रिविधः स्मृतः ।
वधोऽर्थहरणं चैव परिक्लेशस्त्रिधा दमः ॥५२६॥
प्रकाशश्चाप्रकाशश्च लोकद्विष्टान् प्रकाशतः ।
उद्विजेत हतैर्लोकस्तेषु पिण्डः प्रशस्यते ॥५२७॥
विशेषोपनिषद्योगैर्हन्याच्छस्त्रादिना द्विषः ।
जातिमात्रं द्विजं नैव हन्यात्सामोत्तरं वशे ॥५२८॥
प्रलिम्पन्निव चेतांसि दृष्ट्वा साधु पिबन्निव ।
प्रसन्निवामृतं साम प्रयुञ्जीत प्रियं वचः ॥५२९॥
मिथ्याभिशस्तः श्रीकाम आहूयाप्रतिमानितः ।
राजद्वेषी चातिकर आत्मसम्भावितस्तथा ॥५३०॥
विच्छिन्नधर्मकामार्थः क्रुद्धो मानी विमानितः ।
अकारणात्परित्यक्तः कृतवैरोऽपि सान्त्वितः ॥५३१॥
हृतद्रव्यकलत्रश्च पूजार्होऽप्रतिपूजितः ।
एतांस्तु भेदयेच्छत्रौ स्थितान्नित्यान सुशङ्कितान ॥५३२॥
आगतान् पूजयेत कामैर्निजांश्च प्रशमं नयेत् ।
सामदृष्टानुसन्धानमत्युग्रभयदर्शनम् ॥५३३॥
प्रधानदानमानं च भेदोपायाः प्रकीर्तिताः ।
मित्रं हतं काष्ठमिव घुणजग्धं विशीर्यते ॥५३४॥
त्रिशक्तिर्देशकालज्ञो दण्डेनास्तं नयेदरीन् ।
मैत्रीप्रधानं कल्याणबुद्धिं सान्त्वेन साधयेत ॥५३५॥
लुब्धं क्षीणञ्च दानेन मित्रानन्योन्यशङ्कया ।
दण्डस्य दर्शनाद् दुष्टान् भ्रातृपुत्रादिकांस्तथा ॥५३६॥
दानभेदैश्चमूमुख्यान् योधान् जनपदादिकान् ।
सामन्ताटविकान भेददण्डाभ्यामपराद्धकान् ॥५३७॥
देवताप्रतिमानां तु पूजया नर्तनैर्नरैः ।

पुमान् स्त्रीवस्त्रसंवीतो निशि चाद्भुतदर्शनः ॥५३८॥
वेतालोल्कापिशाचानां शिवानां च स्वरूपिकी ।
कामतो रूपधारित्वं शस्त्राग्न्यश्माम्बुवर्षणम् ५३९॥
तमोऽनिलोऽनलो मेघ इति माया ह्यमानुषी ।
जघान कीचकं भीम आस्थितः स्त्रीस्वरूपताम् ॥५४०॥
अन्याये व्यसने युद्धे प्रवृत्तस्यानिवारणम् ।
उपेक्षेयं स्मृता भ्रातोपेक्षितश्च हिडिम्बया ॥५४१॥
मेघान्धकारवृष्ट्यग्निपर्वताद्भुतदर्शनम् ।
दूरस्थानं च सैन्यानां दर्शनं ध्वजशालिनाम् ॥५४२॥
छिन्नपाटितभिन्नानां संसृतानां च दर्शनम् ।
इतीन्द्रजालं द्विषतां भीत्यर्थमुपकल्पयेत् ॥५४३॥
इत्याग्नेये महापुराणे सामादिर्नाम चत्वारिंशदधिकद्विशततमोऽध्यायः ॥

अथैकचत्वारिंशदधिकद्विशततमोऽध्यायः।

राजनीतिः ।

राम उवाच—

षड्विधं तु बलं व्यूह्य देवान् प्रार्च्य रिपुं व्रजेत ।
मौलं भूतं श्रेणिसुहृद्द्विषदाटविकं बलम् ॥५४४॥
पूर्वं पूर्वं गरीयस्तु बलानां व्यसनं तथा ।
षडङ्गं मन्त्रकोषाभ्यां पदात्यश्वरथद्विपैः ॥५४५॥
नद्यद्रिवनदुर्गेषु यत्र यत्र भयं भवेत् ।
सेनापतिस्तत्र तत्र गच्छेद् व्यूहीकृतैर्बलैः ॥५४६॥
नायकः पुरतो यायात्प्रवीरपुरुषावृतः ।
मध्ये कलत्रं स्वामी च कोषः फल्गु च यद् बलम् ॥५४७॥
पार्श्वयोरुभयोरश्वा वाजिनां पार्श्वयो रथाः ।
रथानां पार्श्वयोर्नागा नागानां चाटवीबलम् ॥५४८॥
पश्चात्सेनापतिः सर्वं पुरस्कृत्य कृती स्वयम् ।
यायात्सन्नद्धसैन्यौघः खिन्नानाश्वासयञ्छनैः ॥५४९॥
यायाद् व्यूहेन महता मकरेण पुरोभये ।

श्येनेनोद्धृतपक्षेण सूच्या वा वीरवक्त्रया ॥५५०॥
पश्चाद्भये तु शकटं पार्श्वयोर्वज्रसंज्ञितम् ।
सर्वतः सर्वतोभद्रं भये व्यूहं प्रकल्पयेत् ॥५५१॥
कन्दरे शैलगहने निम्नगावनसङ्कटे ।
दीर्घाध्वनि परिश्रान्तं क्षुत्पिपासाहितक्लमम् ॥५५२॥
व्याधिदुर्भिक्षमरकपीडितं दस्युविद्रुतम् ।
पङ्कपांसुजलस्कन्धं व्यस्तं पुञ्जीकृतं पथि ॥५५३॥
प्रसुप्तं भोजनव्यग्रमभूमिष्ठमसुस्थितम् ।
चौराग्निभयवित्रस्तं वृष्टिवातसमाहतम् ॥५५४॥
इत्यादौ स्वचमूं रक्षेत परसैन्यं च घातयेत् ।
विशिष्टो देशकालाभ्यां भिन्नविप्रकृतिर्बली ॥५५५॥
कुर्यात्प्रकाशयुद्धं हि कूटयुद्धं विपर्यये ।
तेष्ववस्कन्दकालेषु परं हन्यात्समाकुलम् ॥५५६॥
अभूमिष्ठं स्वभूमिष्ठः स्वभूमौ चोपजायतः ।
प्रकृतिप्रग्रहाकृष्टं पाशैर्वनचरादिभिः ॥५५७॥
हन्यात् पश्चात्प्रवीरेण बलेनोपेत्य वेगिना ।
पश्चाद्वा संकुलीकृत्य हन्याच्छूरेण पूर्वतः ॥५५८॥
आभ्यां पार्श्वाभिघातौ तु व्याख्यातौ कूटयोधने ।
पुरस्ताद्विषमे देशे पश्चाद्धन्यात्तु वेगवान् ॥५५९॥
पुरः पश्चात्तु विषमे एवमेव तु पार्श्वयोः ।
प्रथमं योधयित्वा तु दूष्यामित्राटवीबलैः ॥५६०॥
श्रान्तं मन्दं निराक्रन्दं हन्यादश्रान्तवाहनम् ।
दूष्यामित्रबलैर्वापि भङ्गं दत्त्वा प्रयत्नवान् ॥५६१॥
जितमित्येव विश्वस्तं हन्यान्मन्त्रव्यपाश्रयः ।
स्कन्धावारपुरग्रामशस्यस्वामिप्रजादिषु ॥५६२॥
विश्रम्यन्तं परानीकमप्रमत्तो विनाशयेत् ।
अथवा गोग्रहाकृष्टं तल्लक्ष्यं मार्गबन्धनात् ॥५६३॥
अवस्कन्दभयाद्रात्रिप्रजागरकृतश्रमम् ।
दिवा सुप्तं समाहन्यान्निद्राव्याकुलसैनिकम् ॥५६४॥
निशि विश्रब्धसंसुप्तं नागैर्वा खड्गपाणिभिः ।

प्रयाणे पूर्वयायित्वं वनदुर्गप्रवेशनम् ॥५६५॥
अभिन्नानामनीकानां भेदनं भिन्नसङ्ग्रहः ।
विभीषिकाद्वारघातं कोषरक्षेभकर्म च ॥५६६॥
अभिन्नभेदनं मित्रसन्धानं रथकर्म च ।
वनदिङ्मार्गविचये वीवधासारलक्षणम् ॥५६७॥
अनुयानापसरणे शीघ्रकार्योपपादनम् ।
दीनानुसरणं घातः कोटीनां जघनस्य च ॥५६८॥
अश्वकर्माथ पत्तेश्च सर्वदा शस्त्रधारणम् ।
शिविरस्य च मार्गादेः शोधनं वस्तिकर्म च ॥५६९॥
संस्थूलस्थाणुवल्मीकवृक्षगुल्मापकण्टकम् ।
सापसारा पदातीनां भूर्नातिविषमा मता ॥५७०॥
स्वल्पवृक्षोपला क्षिप्रलङ्घनीयनगा स्थिरा ।
निःशर्करा विपङ्का च सापसारा च वाजिभूः ॥५७१॥
निस्थाणुवृक्षकेदारा रथभूमिरकर्दमा ।
मर्दनीयतरुच्छेद्यव्रततीपङ्कवर्जिता ॥५७२॥
निर्झरागम्यशैला च विषमा गजमेदिनी ।
उरस्यादीनि भिन्नानि प्रतिगृह्णन् बलानि हि ॥५७३॥
प्रतिग्रह इति ख्यातो राजकार्यान्तरक्षमः ।
तेन शून्यस्तु यो व्यूहः स भिन्न इव लक्ष्यते ॥५७४॥
जयार्थी नच युद्ध्येत मतिमानप्रतिग्रहः ।
यत्र राजा तत्र कोषः कोषाधीना हि राजता ॥५७५॥
योधेभ्यस्तु ततो दद्यात् किञ्चिद्दातुं न युज्यते ।
द्रव्यलक्षं राजघाते तदर्द्धं तत्सुतार्दने ॥५७६॥
सेनापतिवधे तद्वद्दद्याद्धस्त्यादिमर्दने ।
अथवा खलु युध्येरन् पत्त्यश्वरथदन्तिनः ॥५७७॥
यथा भवेदसम्बाधो व्यायामविनिवर्तने ।
असङ्करेण युद्धेरन् सङ्करः सङ्कुलावहः ॥५७८॥
महासङ्कुलयुद्धेषु संश्रयेरन्मतङ्गजम् ।
अश्वस्य प्रतियोद्धारो भवेयुः पुरुषास्त्रयः ॥५७९॥
इति कल्प्यास्त्रयश्चाश्वा विधेयाः कुञ्जरस्य तु ।

पादगोपा भवेयुश्च पुरुषा दश पञ्च च ॥५८०॥
विधानमिति नागस्य विहितं स्यन्दनस्य च ।
अनीकमिति विज्ञेयमिति कल्प्या नव द्विपाः ॥५८१॥
तथानीकस्य रन्ध्रन्तु पञ्चधा च प्रचक्षते ।
इत्यनीकविभागेन स्थापयेद् व्यूहसम्पदः ॥५८२॥
उरस्यकक्षपक्षांस्तु कल्प्यानेतान प्रचक्षते ।
उरःकक्षौ च पक्षौ च मध्यं पृष्ठं प्रतिग्रहः ॥५८३॥
कोटी च व्यूहशास्त्रज्ञैः सप्ताङ्गो व्यूह उच्यते ।
उरस्यकक्षपक्षास्तु व्यूहोऽयं सप्रतिग्रहः ॥५८४॥
गुरोरेष च शुक्रस्य कक्षाभ्यां परिवर्जितः ।
तिष्ठेयुः सेनापतयः प्रवीरैः पुरुषैर्वृताः ॥५८५॥
अभेदेन च युध्येरन् रक्षेयुश्च परस्परम् ।
मध्यव्यूहे फल्गु सैन्यं युद्धवस्तु जघन्यतः ॥५८६॥
युद्धं हि नायकप्राणं हन्यते तदनायकम् ।
उरसि स्थापयेन्नागान् प्रचण्डान् कक्षयो रथान् ॥५८७॥
हयांश्च पक्षयोर्व्यूहो मध्यभेदी प्रकीर्तितः ।
मध्यदेशे हयानीकं रथानीकञ्च कक्षयोः ॥५८८॥
पक्षयोश्च गजानीकं व्यूहोऽन्तर्भेद्ययं स्मृतः ।
रथस्थाने हयान् दद्यात् पदातींश्च हयाश्रये ॥५८९॥
रथाभावे तु द्विरदान् व्यूहे सर्वत्र दापयेत् ।
यदि स्याद्दण्डबाहुल्यमाबाधः सम्प्रकीर्तितः ॥५९०॥
मण्डलासंहतो भोगो दण्डस्ते बहुधा शृणु ।
तिर्यग् वृत्तिस्तु दण्डः स्याद् भोगोऽन्यावृत्तिरेव च ।५९१॥
मण्डलः सर्वतोवृत्तिः पृथग्वृत्तिरसंहतः ।
प्रदरो दृढकोऽसह्यः चापो वै कुक्षिरेव च ॥५९२॥
प्रतिष्ठः सुप्रतिष्ठश्च श्येनो विजयसञ्जयौ ।
विशालो विजयः शूली स्थूणाकर्णचमूमुखौ ॥५९३॥
सर्पास्यो वलयश्चैव दण्डभेदाश्च दुर्जयाः ।
अतिक्रान्तः प्रतिक्रान्तः कक्षाभ्याञ्चैकपक्षतः ॥५९४॥
अतिक्रान्तस्तु पक्षाभ्यां त्रयोऽन्ये तद्विपर्यये ।

पक्षोरस्यैरतिक्रान्तः प्रतिष्ठोऽन्यो विपर्ययः ॥५९५॥
स्थूणापक्षो धनुःपक्षो द्विस्थूणो दण्ड ऊर्ध्वगः ।
द्विगुणोऽन्तस्त्वतिक्रान्तपक्षोऽन्यस्य विपर्ययः ॥५९६॥
द्विचतुर्दण्ड इत्येते ज्ञेया लक्षणतः क्रमात् ।
गोमूत्रिकाहिसञ्चारी शकटो मकरस्तथा ॥५९७॥
भोगभेदाः समाख्यातास्तथा पारिप्लवङ्गकः ।
दण्डपक्षौ युगोरस्यः शकटस्तद्विपर्यये ॥५९८॥
मकरो व्यतिकीर्णश्च शेषः कुञ्जरराजिभिः ।
मण्डलव्यूहभेदौ तु सर्वतोभद्रदुर्जयौ ॥५९९॥
अष्टानीको द्वितीयस्तु प्रथमः सर्वतोमुखः ।
अर्द्धचन्द्रक ऊर्ध्वाङ्गो वज्रभेदास्तु संहतेः ॥६००॥
तत: कर्कटशृङ्गी च काकपादी च गोधिका ।
त्रिचतुःपञ्चसैन्यानां ज्ञेया आकारभेदतः ॥६०१॥
दण्डस्य स्युः सप्तदश व्यूहा द्वौ मण्डलस्य च ।
असङ्घातस्य षट् पञ्च भोगस्यैव तु सङ्गरे ॥६०२॥
पक्षादीनामथैकेन हत्वा शेषैः परिक्षिपेत् ।
उरसा वा समाहत्य कोटिभ्यां परिवेष्टयेत् ॥६०३॥
परे कोटी समाक्रम्य पक्षाभ्यामप्रतिग्रहात् ।
कोटिभ्याञ्जघनं हन्यादुरसा च प्रपीडयेत् ॥६०४॥
यतः फल्गु यतो भिन्नं यतश्चान्यैरधिष्ठितम् ।
ततश्चारिबलं हन्यादात्मनश्चोपबृंहयेत् ॥६०५॥
सारं द्विगुणसारेण फल्गुसारेण पीडयेत् ।
संहतञ्च गजानीकैः प्रचण्डैर्दारयेद् बलम् ॥६०६॥
स्यात्कक्षपक्षोरस्यैश्च वर्तमानस्तु दण्डकः ।
तत्र प्रयोगो दण्डस्य स्थानं तुर्येण दर्शयेत् ॥६०७॥
स्याद्दण्डसमपक्षाभ्यामतिक्रान्तः प्रदारकः ।
भवेत्स पक्षकक्षाभ्यामतिक्रान्तो दृढः स्मृतः ॥६०८॥
कक्षाभ्याञ्च प्रतिक्रान्तव्यूहोऽसह्यः स्मृतो यथा ।
कक्षपक्षावधः स्थाप्योरस्यैः क्रान्तश्च खातकः ॥६०९॥
द्वौ दण्डौ वलयः प्रोक्तो व्यूहो रिपुविदारणः ।

दुर्जयश्चतुर्वलयः शत्रोर्बलविमर्दनः ॥६१०॥
कक्षपक्षोरस्यैर्भोगो विषयं परिवर्तयन् ।
सर्पचारी गोमूत्रिका शकटः शकटाकृतिः ॥६११॥
विपर्ययोऽमरः प्रोक्तः सर्वशत्रुविमर्दकः ।
स्यात्कक्षपक्षोरस्यानामेकीभावस्तु मण्डलः ।६१२॥
चक्रपद्मादयो भेदा मण्डलस्य प्रभेदकाः ।
एवञ्च सर्वतोभद्रो वज्राक्षवरकाकवत् ॥६१३॥
अर्द्धचन्द्रश्च शृङ्गाटो ह्यचलो नामरूपतः ।
व्यूहा यथासुखं कार्याः शत्रूणां बलवारणाः ॥६१४॥

अग्निरुवाच—

रामस्तु रावणं हत्वा अयोध्यां प्राप्तवान् द्विज !
रामोक्तनीत्येन्द्रजितं हतवांल्लक्ष्मणः पुरा ॥६१५॥

इत्याग्नेये महापुराणे रामोक्तराजनीतिर्नामैकचत्वारिंशदधिक-द्विशततमोऽध्यायः ॥

मार्कण्डेयपुराणान्तर्गतं राजनीतिप्रकरणम् ॥

अथ सप्तविंशतितमोऽध्यायः ।

मदालसोवाच—

वत्स ! राज्याभिषिक्तेन प्रजारञ्जनमादितः ।
कर्तव्यमविरोधेन स्वधर्मश्च महीभृताम् ॥ १ ॥
व्यसनानि परित्यज्य सप्तमूलहराणि वै ।
आत्मा रिपुभिः संरक्ष्यो बहिर्मन्त्रविनिर्गमात् ॥ २ ॥
दुष्टादुष्टांश्च जानीयादमात्यानरिदोषतः ।
अष्टधा नाशमाप्नोति स्वचक्रात् स्यन्दनाद्यथा ॥ ३ ॥
तथा राजाप्यसन्दिग्धं बहिर्मन्त्रविनिर्गमात् ।
चरैश्चारास्तथा शत्रोरन्वेष्टव्याः प्रयत्नतः ॥ ४ ॥
विश्वासो नतु कर्तव्यो राज्ञा मित्राप्तबन्धुषु ।
कार्ययोगादमित्रेषु विश्वसीत नराधिपः ॥ ५ ॥
स्थानवृद्धिक्षयज्ञेन षाड्गुण्यविदितात्मना ।
भवितव्यं नरेन्द्रेण न कामवशवर्तिना ॥ ६ ॥

प्रागात्ममन्त्रिणश्चैव ततो भृत्या महीभृता ।
ज्ञेयाश्चानन्तरं पौरा विरुध्येत ततोऽरिभिः ॥ ७ ॥
यस्त्वेतानविजित्यैव वैरिणो विजिगीषते ।
सोऽजितात्मा जितामात्यः शत्रुवर्गेण बाध्यते ॥ ८ ॥
तस्मात्कामादयः पूर्वं जेयाः पुत्र ! महीभृता ।
तज्जये हि जयो राज्ञो राजा नश्यति तैर्जितः ॥ ९ ॥
कामः क्रोधश्च लोभश्च मदो मानस्तथैव च ।
हर्षश्च शत्रवो ह्येते नाशाय कुमहीभृताम् ॥१०॥
कामप्रसक्तमात्मानं स्मृत्वा पाण्डुं निपातितम् ।
निवर्तयेत्तथा क्रोधादनुह्रादं हतात्मजम् ॥११॥
हतमैलं तथा लोभान्मदाद्वेनं द्विजैर्हतम् ।
मानादनायुषः पुत्रं हतं हर्षात्पुरञ्जयम् ॥१२॥
एभिर्जितैर्जितं सर्वं मरुत्तेन महात्मना ।
स्मृत्वा विवर्जयेदेतान् षड् दोषांश्च महीपतिः ॥१३॥
काककोकिलभृङ्गाणां बकव्यालशिखण्डिनाम् ।
हंसकुक्कुटलोहानां शिक्षेत चरितं नृपः ॥१४॥
कौशिकस्य क्रियां कुर्याद्विपक्षे मनुजेश्वरः ।
चेष्टां पिपीलिकानां च काले भूपः प्रदर्शयेत् ॥१५॥
ज्ञेयाग्निविस्फुलिङ्गानां बीजचेष्टा च शाल्मलेः ।
चन्द्रसूर्यस्वरूपं च नीत्यर्थे पृथिवीक्षिता ॥१६॥
बन्धकीपद्मशरभशूलिकागुर्विणीस्तनात् ।
एवं साम्ना च भेदेन प्रदानेन च पार्थिव ! ॥१७॥
दण्डेन च प्रकुर्वीत नीत्यर्थं पृथिवीक्षिता ।
प्रज्ञा नृपेण वादेया तथा चण्डालयोषितः ॥१८॥
शक्रार्कयमसोमानां तद्वद्वायोर्महीपतिः ।
रूपाणि पञ्च कुर्वीत महीपालनकर्मणि ॥१९॥
यथेन्द्रश्चतुरो मासान्वार्योघेणैव भूतलम् ।
आप्याययेत्तथा लोकान् परिचारैर्महीपतिः ॥२०॥
मासानष्टौ यथा सूर्यस्तोयं हरति रश्मिभिः ।
सूक्ष्मेणैवाभ्युपायेन तथा शुल्कादिना नृपः ॥२१॥

यथा यमः प्रियद्वेष्यौ प्राप्ते काले नियच्छति ।
तथा प्रियाप्रिये राजा दुष्टादुष्टे समो भवेत् ॥२२॥
पूर्णेन्दुमालोक्य यथा प्रीतिमाञ्जायते नरः ।
एवं यत्र प्रजाः सर्वा निर्वृतास्तच्छशिव्रतम् ॥२३॥
मारुतः सर्वभूतेषु निगूढश्चरते यथा ।
एवं चरेन्नृपश्चारैः पौरामात्यारिबन्धुषु ॥२४॥
न लोभार्थैर्न कामार्थैर्नार्थार्थैर्यस्य मानसम् ।
पदार्थैः कृष्यते धर्मात्स राजा स्वर्गमृच्छति ॥२५॥
उत्पथग्राहिणो मूढान्स्वधर्माच्चलितान्नरान् ।
यः करोति निजे धर्मे स राजा स्वर्गमृच्छति ॥२६॥
वर्णधर्मा न सीदन्ति यस्य राष्ट्रे तथाऽऽश्रमाः ।
राज्ञस्तस्य सुखं तात ! परत्रेह च शाश्वतम् ॥२७॥
एतद्राज्ञः परं कृत्यं तथैतद्वृद्धिकारणम् ।
स्वधर्मे स्थापनं नृणां चाल्यते न कुबुद्धिभिः ॥२८॥
पालनेनैव भूतानां कृतकृत्यो महीपतिः ।
सम्यक् पालयिता भागं धर्मस्याप्नोति वै यतः ॥२९॥
एवमाचरते राजा चातुर्वर्ण्यस्य रक्षणम् ।
ससुखी विहरत्येष शक्रस्यैति सलोकताम् ॥३०॥
इति मार्कण्डेयपुराणे मदालसोपाख्याने चतुर्विंशोऽध्यायः ।

अथ गरुडपुराणान्तर्गतं नीतिप्रकरणम् ॥

अथाष्टाधिकशततमोऽध्यायः ।

सूत उवाच—

नीतिसारं प्रवक्ष्यामि अर्थशास्त्रादिसंश्रितम् ।
राजादिभ्यो हितं पुण्यमायुःस्वर्गादिदायकम् ॥ १ ॥
सद्भिः सङ्गं प्रकुर्वीत सिद्धिकामः सदा नरः ।
नासद्भिरिहलोकाय परलोकाय वा हितम् ॥ २ ॥
वर्जयेत् क्षुद्रसंवादं दुष्टस्य चैव दर्शनम् ।
विरोधं सह मित्रेण सम्प्रीतिं शत्रुसेविना ॥ ३ ॥

मूर्खशिष्योपदेशेन दुष्टस्त्रीभरणेन च ।
दुष्टानां सम्प्रयोगेण पण्डितोऽप्यवसीदति ॥ ४ ॥
ब्राह्मणं बालिशं क्षत्रमयोद्धारं विशं जडम् ।
शूद्रमक्षरसंयुक्तं दूरतः परिवर्जयेत् ॥ ५ ॥
कालेन रिपुणा सन्धिः काले मित्रेण विग्रहः ।
कार्यकारणमाश्रित्य कालं क्षिपति पण्डितः ॥ ६ ॥
कालः पचति भूतानि कालः संहरते प्रजाः ।
कालः सुप्तेषु जागर्त्ति कालो हि दुरतिक्रमः ॥ ७ ॥
कालेषु चरते वीर्यं काले गर्भं च वर्द्धते ।
कालो जनयते सृष्टिं पुनः कालोऽपि संहरेत् ॥ ८ ॥
कालः सूक्ष्मगतिर्नित्यं द्विविधश्चेह भाव्यते ।
स्थूलसंग्रहचारेण सूक्ष्मचारान्तरेण च ॥ ९ ॥
नीतिसारं सुरेन्द्राय इममूचे बृहस्पतिः ।
सर्वज्ञो येन चेन्द्रोऽभूद् दैत्यान् हत्वाप्नुयाद्दिवम् ॥१०॥
राजर्षिब्राह्मणैः कार्यं देवविप्रादिपूजनम् ।
अश्वमेधेन यष्टव्यं महापातकनाशनम् ॥११॥
उत्तमैः सह साङ्गत्यं पण्डितैः सह सत्कथाम् ।
अलुब्धैः सह मित्रत्वं कुर्वाणो नावसीदति ॥१२॥
परदारं परार्थञ्च परिहासं परस्त्रियाः ।
परवेश्मनि वासञ्च न कुर्वीत कदाचन ॥१३॥
परोऽपि हितवान् बन्धुर्बन्धुरप्यहितः परः ।
अहितो देहजो व्याधिर्हितमारण्यमौषधम् ॥१४॥
स बन्धुर्यो हिते युक्तः स पिता यस्तु पोषकः ।
तन्मित्रं यत्र विश्वासः स देशो यत्र जीव्यते ॥१५॥
स भृत्यो यो विधेयस्तु तद् बीजं यत्प्ररोहति ।
सा भार्या या प्रियं ब्रूते स पुत्रो यस्तु जीवति ॥१६॥
स जीवति गुणा यस्य धर्मो यस्य स जीवति ।
गुणधर्मविहीनो यो निष्फलन्तस्य जीवनम् ॥१७॥
सा भार्या या गृहे दक्षा सा भार्या या प्रियंवदा ।
सा भार्या या पतिप्राणा सा भार्या या पतिव्रता ॥१८॥

हिता स्नाता सुगन्धा च नित्यञ्च प्रियवादिनी ।
अल्पभक्ताल्पभाषिणी सततं मङ्गलैर्युता ॥१९॥
सततं धर्मबहुला सततञ्च पतिप्रिया ।
सततं प्रियवक्त्री च सततमृतुकामिनी ॥२०॥
एतदादिक्रियायुक्ता सर्वसौभाग्यवर्द्धिनी ।
यस्येदृशी भवेद्भार्या देवेन्द्रो न स मानुषः ॥२१॥
यस्य भार्या विरूपाक्षी कश्मला कलहप्रिया ।
उत्तरोत्तरवादास्या सा जरा न जरा जरा ॥२२॥
यस्य भार्याश्रितान्यत्र परवेश्माभिकाङ्क्षिणी ।
कुक्रिया त्यक्तलज्जा च सा जरा न जरा जरा ॥२३॥
यस्य भार्या गुणज्ञा च भर्तारमनुगामिनी ।
अल्पाल्पेन तु सन्तुष्टा सा प्रिया न प्रिया प्रिया ॥२४॥
दुष्टा भार्या शठं मित्रं भृत्यश्चोत्तरदायकः ।
ससर्पे च गृहे वासो मृत्युरेव न संशयः ॥२५॥
त्यज दुर्जनसंसर्गं भज साधुसमागमम् ।
कुरु पुण्यमहोरात्रं स्मर नित्यमनित्यताम् ॥२६॥
व्याली कण्ठप्रदेशादपि च फणभृतो भीषणा या च रौद्री
या कृष्णा व्याकुलाङ्गी रुधिरनयनसंव्याकुला व्याघ्रकल्पा ।
क्रोधे यैवोग्रवक्त्रा स्फुरदनलशिखा काकजिह्वा करालाा
सेव्या न स्त्री विदग्धा परपुरगमना भ्रान्तचित्ता विरक्ता ॥२७॥
भुजङ्गमे वेश्मनि दृष्टदुष्टे
व्याधौ चिकित्साविनिवर्त्तिते च ।
देहे च बाल्यादिवयोऽन्विते च
कालावृतोऽसौ लभते धृतिं कः ॥२८॥

इति गारुडे महापुराणे नीतिसारे अष्टाधिकशततमोऽध्यायः ॥

अथ नवाधिकशततमोऽध्यायः ।

सूत उवाच—

आपदर्थे धनं रक्षेद् दारान् रक्षेद्धनैरपि ।
आत्मानं सततं रक्षेद्दारैरपि धनैरपि ॥२९॥
त्यजेदेकं कुलस्यार्थे ग्रामस्यार्थे कुलं त्यजेत् ।
ग्रामं जनपदस्यार्थे आत्मार्थे पृथिवीं त्यजेत् ॥३०॥
वरं हि नरके वासो नतु दुश्चरिते गृहे ।
नरकात् क्षीयते पापं कुगृहान्न निवर्त्तते ॥३१॥
चलत्येकेन पादेन तिष्ठत्येकेन बुद्धिमान् ।
न परीक्ष्य परं स्थानं पूर्वमायतनं त्यजेत ॥३२॥
त्यजेद्देशमसद्वृत्तं वासं सोपद्रवं त्यजेत ।
त्यजेत्कृपणराजानं मित्रं मायामयं त्यजेत ॥३३॥
अर्थेन किं कृपणहस्तगतेन पुंसां
ज्ञानेन किं बहुशठकुलसंकुलेन ।
रूपेण किं गुणपराक्रमवर्जितेन
मित्रेण किं व्यसनकालपराङ्मुखेन ॥३४॥
अदृष्टपूर्वा बहवः सहायाः
सर्वे पदस्थस्य भवन्ति मित्राः ।
अर्थैर्विहीनस्य पदच्युतस्य
भवत्यकाले स्वजनोऽपि शत्रुः ॥३५॥
आपत्सु मित्रं जानीयाद् रणे शूरं रहः शुचिम् ।
भार्याञ्च विभवे क्षीणे दुर्भिक्षे च प्रियातिथिम् ॥३६॥
वृक्षं क्षीणफलं त्यजन्ति विहगाः शुष्कं सरः सारसा-
निर्द्रव्यं पुरुषं त्यजन्ति गणिका भ्रष्टं नृपं मन्त्रिणः
पुष्पं पर्युषितं त्यजन्ति मधुपा दग्धं वनान्तं मृगाः
सर्वः कार्यवशाज्जनो हि रमते कस्यास्ति को वल्लभः ॥३७॥
लुब्धमर्थप्रदानेन श्लाघ्यमञ्जलिकर्मणा ।
मूर्खं छन्दानुवृत्त्या च याथातथ्येन पण्डितम् ॥३८॥
सद्भावेन हि तुष्यन्ति देवाः सत्पुरुषा द्विजाः ।
इतराः खाद्यपानेन मानदानेन पण्डिताः ॥३९॥

उत्तमं प्रणिपातेन शठं भेदेन योजयेत् ।
नीचं स्वल्पप्रदानेन समं तुल्यपराक्रमैः ॥४०॥
यस्य यस्य हि यो भावस्तस्य तस्य हि तं वदन् ।
अनुप्रविश्य मेधावी क्षिप्रमात्मवशं नयेत् ॥४१॥
नखिनाञ्च नदीनाञ्च शृङ्गिणां शस्त्रपाणिनाम् ।
विश्वासो नैव गन्तव्यः स्त्रीषु राजकुलेषु च ॥४२॥
अर्थनाशं मनस्तापं गृहे दुश्चरितानि च ।
वञ्चनञ्चापमानञ्च मतिमान्न प्रकाशयेत् ॥४३॥
हीनदुर्जनसंसर्गमत्यन्तविरहादरः ।
स्नेहोऽन्यगेहवासश्च नारीसच्छीलनाशनम् ॥४४॥
कस्य दोषः कुले नास्ति व्याधिना को न पीडितः ?
केन न व्यसनं प्राप्तं श्रियः कस्य निरन्तराः ? ॥४५।
कोऽर्थं प्राप्य न गर्वितो भुवि नरः ? कस्यापदो नागताः ?
स्त्रीभिः कस्य न खण्डितं भुवि मनः ? को नाम राज्ञां प्रियः ?
कः कालस्य न गोचरान्तरगतः ? कोऽर्थी गतो गौरवम् ?
को वा दुर्जनवागुरानिपतितः क्षेमेण यातः पुमान् ? ॥४६॥
सुहृत् स्वजनबन्धुर्न बुद्धिर्यस्य न चात्मनि ।
यस्मिन् कर्मणि सिद्धेऽपि न दृश्येत फलोदयः ।
विपत्तौ च महद् दुःखं तद् बुधः कथमाचरेत् ॥४७॥
यस्मिन् देशे न सम्मानं न प्रीतिर्न च बान्धवाः ।
न च विद्यागमः कश्चित् तं देशं परिवर्जयेत् ॥४८॥
धनस्य यस्य राजभ्यो भयं नास्ति न चौरतः ।
मृतञ्च यन्न मुच्येत समर्जयस्व तद्धनम् ॥४९॥
यदर्जितं प्राणहरैः परिश्रमै-
मृतस्य तं वै विभजन्ति रिक्थिनः ।
कृतञ्च यद् दुष्कृतमर्थलिप्सया
तदेव दोषापहतस्य यौतुकम् ॥५०॥
सञ्चितं निहितं द्रव्यं परामृश्यं मुहुर्मुहुः ।
आखोरिव कदर्यस्य धनं दुःखाय केवलम् ॥५१॥
नग्ना व्यसनिनो रूक्षाः कपालाङ्कितपाणयः ।

GI. 92.

दर्शयन्तीह लोकस्य अदातुः फलमीदृशम् ॥५२॥
शिक्षयन्ति च याचन्ति देहीति कृपया जनाः।
अवस्थेयमदानस्य माभूदेवं भवानपि ॥५३॥
सञ्चितं क्रतुशतैर्न युज्यते याचितं गुणवते न दीयते।
तत् कदर्यपरिरक्षितं धनं चौरपार्थिवगृहे प्रयुज्यते॥५४॥
न देवेभ्यो न विप्रेभ्यो बन्धुभ्यो नैव चात्मनि।
कदर्यस्य धनं याति अग्नितस्कर राजसु ॥५५॥
अतिक्लेशेन येऽप्यर्था धर्मस्यातिक्रमेण च।
अरेर्वा प्रणिपातेन माभूवंस्ते कदाचन ॥५६॥
विद्याघातो ह्यनभ्यासः श्रीणां घातः कुचेलता।
व्याधीनां भोजनाज्जीर्णं शत्रोर्घातः प्रपञ्चता ॥५७॥
तस्करस्य वधो दण्डः कुमित्रस्याल्पभाषणम्।
पृथक् शय्या तु नारीणां ब्राह्मणस्यानिमन्त्रणम् ॥५८॥
दुर्जनाः शिल्पिनो दासा दुष्टाश्च पटहाः स्त्रियः।
ताडिता मार्दवं यान्ति न ते सत्कारभाजनम् ॥५९॥
जानीयात्प्रेषणे भृत्यान बान्धवान् व्यसनागमे।
मित्रश्चापदि काले च भार्याञ्च विभवक्षये ॥६०॥
स्त्रीणां द्विगुण आहारः प्रज्ञा चैव चतुर्गुणा।
षड्गुणो व्यवसायश्च कामश्चाष्टगुणः स्मृतः ॥६१॥
न स्वप्नेन जयेन्निद्रां न कामेन स्त्रियं जयेत्।
न चेन्धनैर्जयेद्वह्निं न मद्येन तृषां जयेत् ॥६२॥
समांसैर्भोजनैः स्निग्धैर्मद्यैर्गन्धविलेपनैः।
वस्त्रैर्मनोरमैर्माल्यैः कामः स्त्रीषु विजृम्भते ॥६३॥
ब्रह्मचर्येऽपि वक्तव्यं प्राप्तं मन्मथचेष्टितम्।
हृद्यं हि पुरुषं दृष्ट्वा योनिः प्रक्लिद्यते स्त्रियाः ॥६४॥
सुवेशं पुरुषं दृष्ट्वा भ्रातरं यदि वा सुतम्।
योनिः क्लिद्यति नारीणां सत्यं सत्यं हि शौनक ! ॥६५॥
नद्यश्च नार्यश्च समस्वभावाः
स्वतन्त्रभावे गमनादिकञ्च।
तोयैश्च दोषैश्च निपातयन्ति
नद्यो हि कूलानि कुलानि नार्यः ॥६६॥

नदी पातयते कूलं नारी पातयते कुलम् ।
नारीणाञ्च नदीनाञ्च स्वच्छन्दा ललिता गतिः ॥६७॥
नाग्निस्तृप्यति काष्ठानां नापगानां महोदधिः ।
नान्तकः सर्वभूतानां न पुंसां वामलोचना ॥६८॥
न तृप्तिरस्ति शिष्टानामिष्टानां प्रियवादिनाम् ।
सुखानाञ्च सुतानाञ्च जीवितस्य वरस्य च ॥ ॥६९॥
राजा न तृप्तो धनसञ्चयेन न सागरस्तृप्तिमगाज्जलेन ।
न पण्डितस्तृप्यति भाषितेन तृप्तं न चक्षुर्नृपदर्शनेन ॥७०॥
स्वकर्मधर्मार्जितजीवितानां शास्त्रेषु दारेषु सदा रतानाम् ।
जितेन्द्रियाणामतिथिप्रियाणां गृहेऽपि मोक्षः पुरुषोत्तमानाम् ॥७१॥
मनोऽनुकूलाः प्रमदा रूपवत्यः स्वलङ्कृताः ।
वासः प्रासादपृष्ठेषु स्वर्गः स्याच्छुभकर्मणः ॥७२॥
न दानेन न मानेन नार्जवेन न सेवया ।
न शास्त्रेण न शस्त्रेण सर्वथा विषमाः स्त्रियः ॥७३॥
शनैर्विद्या शनैरर्थाः शनैः पर्वतमारुहेत् ।
शनैः कामञ्च धर्मञ्च पञ्चैतानि शनैः शनैः ॥७४॥
शाश्वतं देवपूजादि विप्रदानञ्च शाश्वतम् ।
शाश्वतं सगुणा विद्या सुहृन्मित्रं च शाश्वतम् ॥७५॥
ये बालभावान्न पठन्ति विद्यां ये यौवनस्था ह्यधनात्मदाराः ।
ते शोचनीया इह जीवलोके मनुष्यरूपेण मृगाश्चरन्ति ॥७६॥
पठने भोजने चिन्तां न कुर्याच्छास्त्रसेवकः ।
सुदूरमपि विद्यार्थी व्रजेद् गरुडवेगवान् ॥७७॥
ये बालभावे न पठन्ति विद्यां कामातुरा यौवननष्टवित्ताः ।
ते वृद्धकाले परिभूयमानाः सन्दह्यमानाः शिशिरे यथाब्जम् ॥७८॥
तर्केऽप्रतिष्ठा श्रुतयो विभिन्ना नासावृषिर्यस्य मतं न भिन्नम् ।
धर्मस्य तत्त्वं निहितं गुहायां महाजनो येन गतः स पन्थाः ॥७९॥
आकारैरिङ्गितैर्गत्या चेष्टया भाषितेन तु ।
नेत्रवक्त्रविकाराभ्यां लक्ष्यतेऽन्तर्गतं मनः ॥८०॥
अनुक्तमप्यूहति पण्डितो जनः परेङ्गितज्ञानफला हि बुद्धयः ।
उदीरितोऽर्थः पशुनापि गृह्यते हयाश्च नागाश्च वहन्ति देशितम् ॥८१॥

अर्थाद् भ्रष्टस्तीर्थयात्रां तु गच्छेत्
सत्याद् भ्रष्टो रौरवं वै व्रजेच्च ।
योगाद् भ्रष्टः सत्यधृतिञ्च गच्छेद्
राज्याद् भ्रष्टो मृगयायां व्रजेच्च ॥८२॥

इति गारुडे महापुराणे नीतिसारे नवाधिकशततमोऽध्यायः ।

अथ दशाधिकशततमोऽध्यायः ।

सूत उवाच—

यो ध्रुवाणि परित्यज्य ह्यध्रुवाणि निषेवते ।
ध्रुवाणि तस्य नश्यन्ति अध्रुवं नष्टमेव च ॥८३॥
वाग्यन्त्रहीनस्य नरस्य विद्या
ਏਹਾ ਭਗਤਿ ਜਨੁ ਜੀਵਤੁ ਮਰੈ। ਗੁਰ ਪਰਸਾਦੀ ਭਵਜਲੁ ਤਰੈ।
ਗੁਰ ਕੇ ਬਚਨਿ ਭਗਤਿ ਥਾਇ ਪਾਇ। ਹਰਿ ਜੀਉ ਆਪਿ ਵਸੈ ਮਨਿ ਆਇ।

ਮੁਕਦੀ ਗਲ ਇਹ ਕਿ ਜੇ ਜੀਵਨ ਚਾਹੀਦਾ ਹੈ ਤਾਂ ਜਗ ਜੀਵਨ ਨੂੰ ਮਨ ਵਿਚ ਵਸਾ ਲਓ। ਜੇ ਤੁਹਾਨੂੰ ਆਪਣੇ ਅੰਦਰ ਦੀ ਬਿਜਲੀ ਨੂੰ ਵਧਾਣ ਦਾ ਚਾਉ ਹੈ ਤਾਂ ਆਪਣੀ ਤਾਰ ਓਸ ਬਿਜਲੀ ਘਰ ਨਾਲ ਗੁਰੂ ਦੁਆਰਾ ਜੋੜ ਲਓ। ਫੇਰ ਕਦੀ ਘਾਟਾ ਨਹੀਂ ਹੋਵੇਗਾ। ਅਤੁਟ ਜੀਵਨ ਨਾਮ ਹੈ, ਸੋ ਗੁਰ ਵੀਚਾਰਿ ਪਾਇਆ ਜਾਂਦਾ ਹੈ। ਗੁਰ ਜੇ ਵਡ ਨਾਮ ਦਾਤਾ ਤੇ ਜੀਵਨ ਦਾਤਾ ਹੋਰ ਨਹੀਂ। ਮਾਤ ਪਿਤਾ ਤਾਂ ਬਹੁਤ ਥੋਹੜਾ ਜੀਵਨ ਦੇਂਦੇ ਹਨ। ਉਹ ਭੀ ਦੁਖਾਂ ਨਾਲ ਲਿਬੜਿਆ ਹੋਇਆ। ਗੁਰੂ ਦਾ ਦਿਤਾ ਜੀਵਨ ਸਦੀਵੀ ਤੇ ਅਨੰਦਮਈ ਹੁੰਦਾ ਹੈ।

ਜਪਿ ਜਪਿ ਨਾਮੁ ਗੁਰਮਤਿ ਸਾਲਾਹੀ ਮਾਰਿਆ ਕਾਲੁ ਜਮ ਕੰਕਰ ਭੁਇਅੰਗਾ।

ਮੌਤ ਕੀ ਹੈ, ਇਕ ਸਪ ਹੈ, ਭੁਇਅੰਗਾ ਹੈ। ਏਸ ਸਪ ਨੂੰ ਕਿੱਦਾਂ ਮਾਰ ਸਕਦੇ

ਹੋ ? ਨਾਮ ਰੂਪੀ ਗਰੜ ਏਸ ਸਪ ਨੂੰ ਖਾ ਲਏਗਾ ਜਾਂ ਮਨ ਰੂਪ ਇੰਦਰ ਨਾਮ ਰੂਪੀ ਸੋਮ ਪੀ ਕੇ। ਏਸ ਵਰੱਤਿਰ ਨਾਮਕ ਸੱਪ ਨੂੰ ਮੁਕਾ ਛਡੇਗਾ । ਜੀਵਨ ਗਤਿ ਰਾਮ ਭਗਤਿ ਤੋਂ ਹੀ ਲਭਦੀ ਹੈ–

ਜਿਉ ਰਾਤੀ ਜਲਿ ਮਾਛੁਲੀ ਤਿਉ ਰਾਮ ਰਸਿ ਮਾਤੇ ਰਾਮ ਰਾਜੇ।
ਗੁਰ ਪੂਰੈ ਉਪਦੇਸਿਆ ਜੀਵਨ ਗਤਿ ਭਾਤੇ ਰਾਮ ਰਾਤੇ।
ਜੀਵਨ ਗਤਿ ਸੁਆਮੀ ਅੰਤਰਜਾਮੀ ਆਪਿ ਲੀਏ ਲੜਿ ਲਾਏ।
ਹਰਿ ਰਤਨ ਪਦਰਾਥੋ ਪਰਗਟੋ ਪੂਰਨੋ ਛੋਡਿ ਨ ਕਤਹੂ ਜਾਏ।
ਪ੍ਰਭੁ ਸੁਘਰੁ ਸਰੂਪੁ ਸੁਜਾਨੁ ਸੁਆਮੀ ਤਾ ਕੀ ਮਿਟੈ ਨ ਦਾਤੇ।
ਜਲ ਸੰਗਿ ਰਾਤੀ ਮਾਛੁਲੀ ਨਾਨਕ ਹਰਿ ਮਾਤੇ।

ਜੋ ਮਾਛੁਲੀ ਜਲ ਸੰਗਿ ਰੱਤੀ, ਸੋ ਮਰੇਗੀ, ਤੜਪੇਗੀ ਨਹੀਂ। ਨਾਨਕ ਹਰਿ ਸੰਗਿ ਰਤਿਆ ਸੋ ਅਮਰ ਹੋ ਗਇਆ। ਉਹ ਜਲ ਤਾਂ ਕੇਵਲ ਜਲ ਹੀ ਹੈ, ਸੁਕ ਵੀ ਸਕਦਾ ਹੈ ਪਰ ਹਰੀ ਦਾ ਸਾਗਰ ਤਾਂ ਸੁਘੜਤਾ ਸੁਰੂਪਤਾ, ਸੁਜਾਨਤਾ, ਸੁਗਮਤਾ ਤੇ ਪ੍ਰਭਤਾ ਦਾ ਸਾਗਰ ਹੈ।

ਚਾਤ੍ਰਿਕੁ ਜਾਚੈ ਬੂੰਦ ਜਿਉ ਹਰਿ ਪ੍ਰਾਨ ਅਧਾਰਾ ਰਾਮ ਰਾਜੇ।
ਮਾਲੁ ਖਜੀਨਾ ਸੁਤ ਭ੍ਰਾਤ ਮੀਤ ਸਭ ਹੂੰ ਤੇ ਪਿਆਰਾ ਰਾਮ ਰਾਜੇ।

ਪਰਾਨਾਂ ਤੋਂ ਵੀ ਪਿਆਰਾ ਹੈ, ਪਰਾਨ ਅਧਾਰ ਹੈ –

ਸਭ ਹੂੰ ਤੇ ਪਿਆਰਾ ਪੁਰਖੁ ਨਿਰਾਰਾ ਤਾ ਕੀ ਗਤਿ ਨਹੀਂ ਜਾਣੀਐ।
ਹਰਿ ਸਾਸਿ ਗਿਰਾਸਿ ਨ ਬਿਸਰੈ ਕਬਹੂੰ ਗੁਰ ਸਬਦੀ ਰੰਗੁ ਮਾਣੀਐ।
ਪ੍ਰਭੁ ਪੁਰਖੁ ਜਗ ਜੀਵਨੋ ਸੰਤ ਰਸੁ ਪੀਵਨੋ ਜਪਿ ਭਰਮ ਮੋਹ ਦੁਖ ਡਾਰਾ।
ਚਾਤ੍ਰਿਕੁ ਜਾਚੈ ਬੂੰਦ ਜਿਉ ਨਾਨਕ ਹਰਿ ਪਿਆਰਾ।

(੫)

ਜੀਵਨ ਦਾ ਉਦੇਸ਼ ਕੀ ਹੈ ? ਕਾਹਦੇ ਲਈ ਏਥੇ ਆਏ ਹਾਂ ? ਗੁਰੂ ਸਾਹਿਬ ਜੁਆਬ ਦੇਂਦੇ ਹਨ, ਅਸੀਂ ਏਥੇ ਉਸਦਾ ਸਿਮਰਨ, ਗੁਣ ਗਾਇਣ, ਓਹਦੀ ਸਾਖੀ ਭਰਨ, ਉਸਦੀ ਖੇਡ ਵਿਚ ਹਿੱਸਾ ਲੈਣ ਲਈ ਆਏ ਹਾਂ। To glorify His name ਉਸਦੇ ਨਾਮ ਨੂੰ ਅਪਣੇ ਹਿਰਦੇ ਵਿਚ ਵਸਾਉਣ, ਉਹਦਾ ਕੀਰਤਨ ਕਰਨ ਆਏ ਹਾਂ। ਇਹਦੇ ਵਿਚ ਕੋਈ ਸ਼ਕ ਨਹੀਂ। ਸਾਫ਼ ਤੌਰ ਤੇ ਗੁਰੂ ਸਾਹਿਬ ਹੁਕਮ ਕਰਦੇ ਹਨ। ਬੰਦਿਆ, ਉਹ ਕੰਮ ਕਰ ਜਿਹਦੇ ਲਈ ਤੂੰ ਆਇਆ ਹੈਂ। ਹੁਣ ਇਹ ਸਿਮਰਨ ਹੋਰ ਸਭ ਤਰ੍ਹਾਂ ਦੇ ਕਰਮ Activity ਤੋਂ ਪਰਧਾਨ ਹੈ, ਇਹੀ ਸਭ ਤੋਂ ਚੰਗਾ, ਨਵਾਂ ਤੇ ਤਾਕਤਵਰ ਉਸਾਰੂ ਕੰਮ creative action, new action ਹੈ। ਨਿਤ ਨਵੇਂ ਚਾ ਨਾਲ ਸਿਮਰਨ ਕਰਨਾ ਸਾਰਾ ਜ਼ੋਰ ਤਨ

ਮਨ ਅਰ ਧਨ ਦਾ ਲਾ ਕੇ ਕਰਨਾ। ਬਾਕੀ ਸਭ ਕੰਮ ਫ਼ਾਲਤੂ ਹਨ। ਅਸਲੀ ਕੰਮ ਉਸਾਰੂ ਤੇ ਮੌਲਿਕ ਕੰਮ ਆਪਣੇ ਢੰਗ ਨਾਲ ਵਾਹ ਲਗਦਿਆਂ ਨਾਮ ਨਾਲ ਪਿਆਰ ਕਰਨਾ ਹੈ। ਇਹ ਮਤ ਸਮਝੋ ਕਿ ਵਾਹਿਗੁਰੂ ਵਾਹਿਗੁਰੂ ਰਾਮ ਰਾਮ ਹਰੀ ਹਰੀ ਕਰਨਾ ਤੇ ਢੋਲਕੀ ਛੈਣਿਆਂ ਸਿਤਾਰ ਚਿਮਟੇ ਤਬਲੇ ਨਾਲ ਕੀਰਤਨ ਕਰਨਾ ਨਿਰਾਰਥ, ਬੇ-ਉਸਾਰੂ, ਫ਼ਜ਼ੂਲ, ਵੇਹਲ ਦਾ ਕੰਮ ਹੈ। ਇਸ ਵਿਚ ਉਹੀ ਤਾਕਤ ਹੈ ਜੋ ਸਲਤਨਤਾਂ, ਸ਼ਾਹੀਆਂ ਬਣਾਣ ਢਾਹੁਣ ਵਾਲਿਆਂ ਵਿਚ ਹੋਇਆ ਕਰਦੀ ਹੈ। ਸਗੋਂ ਓਦੂੰ ਜ਼ਿਆਦਾ। ਅਜੇਹੀ ਕੀਰਤਨ ਨਾਮ ਦੁਆਰਾ ਪਰਾਪਤ ਕੀਤੀ ਤਾਕਤ ਨਾਲ ਬਿਨਾ ਜ਼ੁਲਮ ਕੀਤਿਆਂ ਸ਼ਾਹੀਆਂ ਬਣ ਢਹਿ ਸਕਦੀਆਂ ਹਨ। ਇਕਬਾਲ ਤੇ ਉਹਦੇ ਖ਼ਿਆਲ ਦੇ ਹਾਮੀ ਗ਼ਲਤ ਕਹਿੰਦੇ ਹਨ ਕਿ Struggle ਜਿਤ ਹਾਰ ਹੀ ਉਸਾਰੂ ਕੰਮ ਹੈ ਤੇ ਨਿਤ ਨਵੀਂ ਹਵਸ ਹੀ ਸੱਚਾ ਵਿਅਕਤਿਕ ਤੇ ਨਿਜੀ ਜੀਵਨ ਹੈ। ਪ੍ਰੇਮ ਸਿਮਰਣ ਸਭ ਤੋਂ ਵੱਧ Creative ਤੇ and New ਉਸਾਰੂ ਤੇ ਤਾਜ਼ਾ ਨਵੀਨ ਤੇ ਸੱਤਾ ਵਾਲਾ, ਵਿਅਕਤਿੱਤਵ ਵਧਾਊ, ਆਤਮੇ ਨੂੰ ਪਰਮਾਤਮਾ ਬਣਾਊ, ਬੂੰਦ ਤੋਂ ਸਾਗਰ ਸਿਰਜਣ ਵਾਲਾ ਜੀਵਨ ਹੈ। ਇਹ ਜੀਵਨ ਨੂੰ ਰੰਗ ਰਸ ਸਤਾ, ਸਭੋਂ ਚੀਜਾਂ ਸਹਜਿ ਸੁਭਾ ਦੇਣ ਵਾਲਾ ਕੰਮ ਹੈ, ਅਜੇਹੇ ਸਿਮਰਣ ਕੀਰਤਨ ਰਚੇ ਜੀਵਨ ਵਿਚੋਂ ਨੇਕੀ, ਸਚ, ਸਦਾਚਾਰ ਸਹਜਿ ਸੁਭਾ ਫੁਟ ਫੁਟ ਪੈਂਦਾ ਹੈ। ਉਹ ਜੋ ਕੁਝ ਕਰਦਾ ਹੈ, ਉਹ ਸਰਬਤ ਦੇ ਭਲੇ ਉਪਕਾਰ ਲਈ ਕੁਲ ਜਗਤ ਦੇ ਉਧਾਰ ਤੇ ਅਧਾਰ ਤੇ ਆਧਾਰ ਲਈ ਹੁੰਦਾ ਹੈ! Virtue is the spontaneous action of a Unity-charged soul ਨੇਕੀ ਉਹ ਹਰਕਤ ਹੈ ਜਿਹੜੀ ਏਕੰਕਾਰ ਦਾ ਰਸੀਆ ਸਹਜਿ ਸੁਭਾ ਕਰਦਾ ਹੈ। ਗੁਰਬਾਣੀ ਪੜ੍ਹ ਤੇ ਸੁਣੋ :—

ਏਕਤਾ ਏਕੰਕਾਰ ਦੇ ਰਸੀਏ ਬਣਨ ਨਾਲ ਤੇ ਨਾਮ ਦੇ ਚਾਖੀਏ ਬਣਨ ਨਾਲ ਅਸੀਂ ਚੇਲੇ ਤੋਂ ਗੁਰੂ ਤੇ ਗੁਰੂ ਤੋਂ ਸਤਿਗੁਰੂ ਬਣ ਜਾਂਦੇ ਹਾਂ ਅਰਥਾਤ ਸਾਡਾ ਆਪਾ ਵਿਚੋਂ ਨਿਕਲ ਖਲੋਂਦਾ ਹੈ ਤੇ ਅਸੀਂ ਗੁਰੂ ਪੀਰ ਹਰੀ ਰਾਮ ਨਾਲ ਸਾਂਝੀ ਹੋ ਜਾਂਦੇ ਹਾਂ, ਉਹੀ ਰੂਪ ਹੋ ਜਾਂਦੇ ਹਾਂ।

ਹਰਿ ਜੀ ਮਾਤਾ ਹਰਿ ਜੀ ਪਿਤਾ ਹਰਿ ਜੀਉ ਪ੍ਰਤਿਪਾਲਕ
ਹਰਿ ਜੀ ਮੇਰੀ ਸਾਰ ਕਰੇ ਹਮ ਹਰਿ ਕੇ ਬਾਲਕ
ਸਹਜੇ ਸਹਜਿ ਖਿਲਾਇਦਾ ਨਹੀ ਕਰਦਾ ਆਲਕ
ਅਉਗੁਣ ਕੋ ਨ ਚਿਤਾਰਦਾ ਗਲ ਸੇਤੀ ਲਾਇਕ
ਮੁਹ ਮੰਗਾ ਸੋਈ ਦੇਂਵਦਾ ਹਰਿ ਪਿਤਾ ਸੁਖ ਦਾਇਕ
ਗਿਆਨੁ ਰਸਿ ਨਾਮੁ ਧਨੁ ਸਉਪਿਓਨੁ ਇਸੁ ਸਉਦੇ ਲਾਇਕ
ਸਾਝੀ ਗੁਰ ਨਾਲਿ ਬਹਾਲਿਆ ਸਰਬ ਸੁਖ ਪਾਇਕ

ਮੈਂ ਨਾਲਹੁ ਕਦੇ ਨ ਵਿਛੁੜੈ ਹਰਿ ਪਿਤਾ ਸਭਨਾ ਗਲਾ ਲਾਇਕ ॥
ਜੀਵਨ ਮਿਲਾਪ ਹੈ, ਮੌਤ ਵਿਛੋੜਾ।
ਨਾਨਕ ਕਚੜਿਆ ਸਿਉ ਤੋੜਿ ਢੂਢਿ ਸਜਣ ਸੰਤ ਪਕਿਆ
ਓਇ ਜੀਵੰਦੇ ਵਿਛੁੜਹਿ ਓਇ ਮੁਇਆ ਨ ਜਾਹੀ ਛੋੜਿ।
ਖੋਜਤ ਖੋਜਤ ਸਹਜ ਉਪਜਿਆ ਫਿਰਿ ਜਨਮਿ ਨ ਮਰਣਾ।
ਪਹਿਲਾ ਮਰਣੁ ਕਬੂਲਿ ਜੀਵਣ ਕੀ ਛਡਿ ਆਸ।
ਹੋਹੁ ਸਭਨਾ ਕੀ ਰੇਣੁਕਾ ਤਉ ਆਉ ਹਮਾਰੈ ਪਾਸਿ।

ਇਹੀ ਗਲ ਹੋਰਥੇ ਆਖੀ ਹੈ ਗੁਰੂ ਜੀ ਨੇ। ਜੀਵਨ ਤਲਬ ਨਿਵਾਰ। ਜੀਵਨ ਦੀ ਤਲਬ, ਆਸ ਛਡ ਕੇ ਜੀਉਣਾ ਹੈ। ਨਿਰਭੈ ਤੇ ਨਿਰਵੈਰ ਹੋ ਕੇ ਜੀਉਣਾ ਹੈ।

ਮੁਆ ਜੀਵੰਦਾ ਪੇਖੁ ਜੀਵੰਦੇ ਮਰਿ ਜਾਨਿ।
ਜਿਨ੍ਹਾਂ ਮੁਹਬਤਿ ਇਕ ਸਿਉ ਤੇ ਮਾਣਸ ਪਰਧਾਨ।

ਜੀਵਨ ਸਭ ਜੀਵਨ ਨੂੰ ਹਿੱਕ ਤੋਂ ਹਿੱਕ ਵੱਲ ਜਾਂਦਾ ਸਮਝ ਕੇ ਜੀਉਣ ਦਾ ਨਾਂ ਹੈ।

ਹਿਕਸ ਕੂੰ ਤੂ ਆਹਿ ਪਛਾਣੂ ਭੀ ਹਿਕੁ ਕਰਿ।
ਨਾਨਕ ਆਸੜੀ ਨਿਬਾਹਿ ਮਾਨੁਖ ਪਰਥਾਈ ਲਜੀਵਦੋ।
ਨਿਹਚਲੁ ਨਾਮੁ ਨਿਧਾਨੁ ਹੈ ਜਿਸੁ ਸਿਮਰਤੁ ਹਰਿ ਲਾਧਾ।
ਨਿਹਚਲੁ ਕੀਰਤਨੁ ਗੁਣ ਗੋਬਿੰਦ ਗੁਰਮੁਖਿ ਗਵਾਧਾ।
ਸਚੁ ਧਰਮੁ ਤਪੁ ਨਿਹਚਲ ਦਿਨੁ ਰੈਨਿ ਅਰਾਧਾ।
ਦਇਆ ਧਰਮੁ ਤਪੁ ਨਿਹਚਲੋ ਜਿਸੁ ਕਰਮਿ ਲਿਖਾਧਾ।
ਨਿਹਚਲੁ ਮਸਤਕਿ ਲੇਖੁ ਲਿਖਿਆ ਸੋ ਟਲੈ ਨ ਟਲਾਧਾ।

ਲਿਖੇ ਕਰਮ ਕਰਨਾ, ਬਿਨ ਨਾਮ ਜੀਵਨ ਵਿਚ ਪਿਛਲੇ ਭੁਗਤਣਾ ਤੇ ਅੱਗੇ ਲਈ ਹੋਰ ਬੰਧਨ ਪਾਉਣਾ ਹੈ। ਅਜਿਹਾ ਜੀਉਣਾ ਜੀਵਨ ਮਰਨ ਦੇ ਚੱਕਰ ਨੂੰ ਹੋਰ ਪਕਿਆਂ ਕਰਨਾ ਹੈ ਤੇ ਜੀਉਂਦਿਆਂ ਮਰ ਕੇ ਸਹਜ ਸੁਭਾ ਸਹਜ ਕੰਮ ਕਰਦਿਆਂ ਜੀਉਣਾ ਜੀਵਨ ਮਰਨ ਤੋਂ ਜੀਉਂਦਿਆਂ ਛੁਟਣਾ ਤੇ ਸਦੀਵੀ ਜੀਵਨ ਪਰਾਪਤ ਕਰਨਾ ਹੈ। ਲੇਖ ਦਾ ਜੀਵਨ ਨਾ ਜੀਓ, ਹਵਸ ਦਾ, ਕਰਮ ਕਰਾਈ ਦਾ ਜੀਵਨ ਨਾ ਜੀਓ; ਸਹਿਜ ਦਾ, ਨਿਹਕਾਮਤਾ ਦਾ, ਨਾਮ ਸਿਮਰਨ ਦਾ ਜੀਵਨ, ਰਜ਼ਾ ਮੰਨਣ ਦਾ ਜੀਵਨ ਜੀਓ। ਸਾਰਾ ਆਪਾ ਇਣੇ ਛਡਕੇ ਜੀਓ। ਨੈਨ, ਪਗ, ਹਥ ਸਭ ਉਹਦੇ ਲਈ ਵਰਤੋ।

ਨੈਨੀ ਦੇਖਉ ਗੁਰਦਰਸਨੋ ਗੁਰ ਚਰਣੀ ਮਥਾ।
ਪੈਰੀ ਮਾਰਗਿ ਗੁਰ ਚਲਦਾ ਪੱਖਾ ਫੇਰੀ ਹਥਾ।
ਅਕਾਲ ਮਰਤਿ ਰਿਦੈ ਧਿਆਇਦਾ ਦਿਨ ਰੈਨਿ ਜਪੰਥਾ।

ਮੈ ਛਡਿਆ ਸਗਲ ਆਪਾਇਣੋ ਭਰਵਾਸੈ ਗੁਰ ਸਮਰਥਾ।
ਗੁਰਿ ਬਖਸਿਆ ਨਾਮੁ ਨਿਧਾਨੁ ਸਭੋ ਦੁਖੁ ਲਥਾ।
ਸਹਜੁ ਭਇਆ ਪ੍ਰਭੁ ਪਾਇਆ ਜਮ ਕਾ ਭਉ ਲਥਾ।

ਗੁਰੂ ਸਾਹਿਬ ਇਹ ਨਹੀਂ ਕਹਿੰਦੇ ਕੰਮ ਨਾ ਕਰ। ਕਰ ਪਰ ਭਾਈ ਉਹ ਕੰਮ ਨਾ ਕਰ ਜਿਹੜੇ ਅਸਹਜਿ ਹਨ ਤੇ ਜਿਹਨਾਂ ਕੀਤਿਆਂ ਪਿਛੋਂ ਪਛਤਾਣਾ ਤੇ ਭੁਗਤਣਾ ਪਵੀ। ਐਸਾ ਕੰਮੁ ਮੂਲੇ ਨ ਕੀਚੈ ਜਿਤੁ ਅੰਤਿ ਪਛੋਤਾਈਐ। ਭਗਤ ਕਿਵੇਂ ਜੀਉਂਦੇ ਹਨ :—ਲਬੁ ਲੋਭੁ ਅਹੰਕਾਰੁ ਤਜਿ ਤ੍ਰਿਸਨਾ ਬਹੁਤੁ ਨਾਹੀ ਬੋਲਣਾ। ਗੁਰਪਰਸਾਦੀ ਜਿਨ੍ਹੀ ਆਪੁ ਤਜਿਆ ਹਰਿ ਵਾਸਨਾ ਸਮਾਣੀ। ਕਹੈ ਨਾਨਕੁ ਚਾਲ ਭਗਤਾਂ ਜੁਗਹੁ ਜੁਗੁ ਨਿਰਾਲੀ।

(੬)

ਜੀਵਨ ਰੂਪ ਹਰਿ ਚਰਣ (ਪੰਚਮ ਪਾਦਸ਼ਾਹ)

ਕੀ ਗੁਰੂ ਸਾਹਿਬ ਜੀਵਨ ਨੂੰ ਇਕ ਲੜੀ ਮੰਨਦੇ ਸਨ, ਕੀ ਜਨਮ ਮਰਨ ਦੇ ਸਿਲਸਿਲੇ ਨੂੰ, ਪਰਿਨਾਮ ਨੂੰ, ਜੂਨ-ਚੱਕਰ ਨੂੰ, ਜੂਨ- ਗਿਣਤੀ ਨੂੰ, ਜੀਵਨ ਦੇ ਪਿਛੇ ਤੇ ਅੱਗੇ ਨੂੰ ਸ੍ਵੀਕਾਰਦੇ ਸਨ ? ਹਾਂ, ਜੀਵਨ ਤਾਂ ਜਗ-ਜੀਵਨ ਦੀ ਖੇਲ ਹੈ, ਖੇਲ ਬੇਅੰਤ ਹੈ, ਅਨੰਤ ਹੈ, ਖੇਲ ਖੇਲ ਅਖੇਲ ਖੇਲਨ ਅੰਤ ਕੋ ਫਿਰ ਏਕ। ਜੀਵਨ ਇਕ ਹੈ, ਅਨੰਤ ਹੈ, ਉਹਦੀ ਖੇਡ ਹੈ, ਜਿਹੜਾ ਖ਼ੁਦ ਅਨੇਕ ਹੁੰਦਿਆਂ ਇਕ ਹੈ ਤੇ ਖੇਡਿਦਿਆਂ ਅਖੇਡ ਅਖੇਲ ਹੈ, ਅੰਤ ਨੂੰ ਨਹੀਂ ਸਦਾ ਹੀ ਇਕ ਹੈ—ਸਦਾ ਸਦਾ ਇਕ ਏਕੰਕਾਰ।

ਜਨਮ ਮਰਣ ਅਨੇਕ ਬੀਤੇ ਪ੍ਰਿਅ ਸਗੁ ਬਿਨੁ ਕਛੁ ਨਹ ਗਤੇ।

ਕਈ ਜਨਮ ਮਰਣ ਸਾਡੇ ਪਿਆਰੇ ਦੇ ਸੰਗ ਬਾਝੋਂ ਗੁਜਰ ਚੁਕੇ ਹਨ ਜਦੋਂ ਸਾਡੀ ਦੁਰਗਤੀ ਹੁੰਦੀ ਰਹੀ। ਇਹ ਸਾਡਾ ਵਰਨਨ ਹੈ । ਜੀਵਨ, ਫ਼ਰਮਾਂਦੇ ਨੇ ਸਾਹਿਬ, ਪ੍ਰਿਅ ਬਿਨੁ ਜੀਵਨ ਹੀ ਨਹੀਂ। ਅਸੀਂ ਕਹਿੰਦੇ ਹਾਂ ਪਿਆਰ ਸਿਮਰਣ ਨਾ ਕਰਕੇ ਹੋਰ ਸਭ ਕੁਝ ਕਰਦਿਆਂ ਅਸੀਂ ਜੀਵਿਤ ਹਾਂ । ਉਹ ਜੀਵਨ ਨਹੀਂ, ਹਰਕਤ ਹੈ, ਲੋਥ ਦਾ ਚਲਦਿਆਂ ਫਿਰਦਿਆਂ ਰਹਿਣਾ ਹੈ।

ਮੀਨਾ ਜਲ ਹੀਨ ਮੀਨਾ ਜਲ ਹੀਨ ਹੇ ਓਹੁ ਬਿਛੁਰਤ
ਮਨ ਤਨ ਖੀਨ ਹੇ ਕਤ ਜੀਵਨੁ ਪ੍ਰਿਅ ਬਿਨੁ ਹੋਤ।

ਨਾਮ ਵੇਹਲ ਦਾ ਕੰਮ ਨਹੀਂ, ਨਾ ਫ਼ਾਲਤੂ ਪਰ ਮੁਫ਼ੀਦ ਕੰਮ ਹੈ। ਨਾਮ ਸਿਮਰਨ ਤਾਂ ਜੀਵਨ ਦਾ ਜੀਵਨ ਹੈ। ਨਾਮੁ ਵਰਤਣਿ ਨਾਮੋ ਵਾਲੇਵਾ ਨਾਮੁ ਨਾਨਕ ਪ੍ਰਾਨ ਅਧਾਰਾ। ਸਾਡਾ ਆਤਮਾ ਅਚੇਤ ਜੇ ਨਾਮ ਨ ਜਪਦਾ ਹੁੰਦਾ ਤਾਂ ਓਹ ਕਿਦਾਂ ਹਸਤ ਹੋ ਸਕਦਾ! ਨਾਮ ਕੇ ਧਾਰੇ ਸਗਲੇ ਜੰਤ। ਓਸ ਗੁਪਤ ਅਚੇਤ

ਨਾਮ ਤੇ ਸਿਮਰਨ ਨੂੰ ਅਸਾਂ ਪਰਗਟ ਪਾਹਾਰਾ ਕਰਨਾ ਹੈ। ਜਿਵੇਂ ਓਸ ਇਕ ਨੇ ਆਪਣੇ ਆਪ ਨੂੰ ਗੁਪਤੋਂ ਪਰਗਟ ਕੀਤਾ ਹੈ।

ਨਾਮ ਨੂੰ ਪਸ਼ੂ ਪਰੇਤ ਮੁਗਧ ਵੀ ਸੁਣਨ ਦੀ ਲੋੜ ਤੇ ਚਾਹਨਾ ਰਖਦੇ ਹਨ। ਜੀਵਨ ਦਾ ਵਿਗਾਸ, ਉਤਪੱਤੀ ਵਾਂਗਰ ਨਾਮ ਦੇ ਚੇਤ ਕੇ ਸਿਮਰਨ ਵਿਚ ਹੈ।

ਪਸ਼ੂ ਪਰੇਤ ਮੁਗਧ ਭਏ ਸ੍ਰੋਤੇ ਹਰਿ ਨਾਮਾ ਮੁਖਿ ਗਾਇਆ।

ਜਿਵੇਂ ਅਸਲੀ ਜੀਵਨ ਚੇਤਨ ਹੋਕੇ ਸਿਮਰਨ ਕਰਨ, ਏਕਤਾ ਮਹਿਸੂਸਨ ਦਾ ਨਾਉਂ ਹੈ ਤਿਵੇਂ ਜੀਵਨ ਦਾ ਉੱਦੇਸ਼ ਅਚਿੰਤ ਆਪਣੀਆਂ ਇਛਾਵਾਂ ਰਬ ਪਾਸੋਂ ਕੁਦਰਤ ਪਾਸੋਂ ਪੂਰੀਆਂ ਕਰਾਉਣ ਦਾ ਨਾਂ ਹੈ।

ਮਨ ਬਾਂਛਤ ਫਲ ਮਿਲੇ ਅਚਿੰਤਾ ਪੂਰਨ ਹੋਏ ਕਾਮਾ।

ਸਹਜੇ ਹੀ ਸਭ ਕੁਝ ਹੁੰਦਾ ਚਲਾ ਜਾਵੇ, ਸਾਡੀ ਮਰਜ਼ੀ ਮੂਜਬ, ਉਹਦੀ ਮਰਜ਼ੀ ਅਨੁਸਾਰ, ਰਜ਼ਾ ਵਿਚ ਆਈਂ ਤੇ ਉਹ ਮਿਲੇ ਰਹੀਏ। ਉਠਦਿਆਂ ਬਹਿੰਦਿਆਂ ਲਿਵ ਪਰਮਾਤਮਾ ਵਿੱਚ ਲਗੀ ਰਹੇ- ਇਹ ਹੈ ਜੀਵਨ, ਸੱਚਾ ਤੇ ਸੁਚਾ, ਕੰਮ ਕੋਈ ਵੀ ਹਥੋਂ ਤੇ ਮੂੰਹੋਂ ਹੁੰਦਾ ਰਹੇ। ਲਿਵ ਲਗਣੀ ਕੀ- ਪਰਮਾਤਮਾ ਦਾ ਖਿਆਲ ਰਹੇ, ਉਹਦੀ ਵਡਿਆਈ, ਕਾਮਲ ਮੁਤਲਕ ਤਾਕਤ ਦਾ ਇਹਸਾਸ ਉਹਦੇ ਬੇਅੰਤ ਗੁਣਾ ਦਾ ਵਿਚਾਰ :—

ਊਠਤ ਬੈਠਤ ਹਰਿ ਗੁਣ ਗਾਵੈ ਦੂਖੁ ਦਰਦੁ ਭ੍ਰਮੁ ਭਾਗਾ।
ਕਹੁ ਨਾਨਕ ਤਾਕੇ ਪੂਰ ਕਰੰਮਾ ਜਾ ਕਾ ਗੁਰ ਚਰਨੀ ਮਨੁ ਲਾਗਾ।

ਬੋਧਾਂ ਲਈ ਜੀਵਨ-ਆਦਰਸ਼ ਧਰਮ ਕਾਇਆਂ ਹੈ, ਗਿਆਨ ਕਾਇਆਂ ਹੈ। ਸਾਡੇ ਗੁਰਮਤ ਵਿੱਚ ਵੀ ਧਰਮ ਕਾਇਆਂ ਮੌਜੂਦ ਹੈ। ਕਾਚੀ ਦੇਹ ਦੀ ਥਾਂ ਅਸਾਂਨੇ ਕੰਚਨ ਦੇਹੀ ਹਾਸਿਲ ਕਰਨੀ ਹੈ।

ਸਿਮਰਹੁ ਹਰਿ ਹਰਿ ਨਾਮੁ ਪਰਾਨੀ। ਬਿਨਸੈ ਕਾਚੀ ਦੇਹ ਅਗਿਆਨੀ॥

ਇਹ ਕਾਚੀ ਦੇਹ ਸਾਨੂੰ ਮਿਲਦੀ ਰਹੇਗੀ ਕਰਮ ਫਲ ਨੂੰ ਮੁਕਾਉਣ ਖ਼ਾਤਰ, ਪਰ ਮੁਕਾਉਂਦਿਆਂ ਅਸੀਂ ਹੋਰ ਕਰਜ਼ ਚਾਹੜ ਲੈਂਦੇ ਹਾਂ, ਫਰ ਉਹਦਾ ਫਲ ਭੁਗਤਣਾ ਪੈਂਦਾ ਹੈ, ਸੋ ਇਹ ਕੋਈ ਜੀਉਂਣਾ ਹੈ?

ਬਹੁਤੁ ਜੋਨਿ ਭਰਮਤ ਦੁਖੁ ਪਾਇਆ ਹਉ ਮੈ ਬੰਧਨ ਕੇ ਭਾਰਾ।

ਤੁਸੀਂ ਕਹੋ ਮੈਂ ਹਈ ਨਹੀਂ, ਕਰਜ਼ਾ ਕੇਹਾ ਤੇ ਕਰਮ ਕੇਹੇ? ਹਉਂ ਮੈਂ ਛੱਡੋ ਕੋਈ ਬੰਧਨ ਨਹੀਂ। ਫੇਰ ਕਿਦਾਂ ਜੀਵੀਏ, ਕਿਦਾਂ ਹਉਂ ਮੈਂ ਮਾਰੀਏ, ਸੁਖ ਕਿਦਾਂ ਲਭੀਏ? ਮਾਮੂਲੀ ਜਹੀ ਦਵਾਈ ਹੈ, ਰੋਜ਼ ਖਾਣੀ ਹੈ, ਨਿਤ ਖਾਣੀ ਹੈ; ਬਿਨਾ ਇਸਦੀ ਮਹੱਤਾ ਸਮਝਿਆਂ ਵੀ ਖਾਣੀ ਹੈ:—

ਗੁਰ ਪੂਰੇ ਕੀ ਬਾਣੀ ਜਪਿ ਅਨਦ ਕਰਹੁ ਨਿਤ ਪ੍ਰਾਣੀ।

ਵੱਡੀ ਸਮਝਣ ਵਾਲੀ ਗਲ ਇਹ ਹੈ ਕਿ ਸਾਡਾ ਜੀਵਨ ਉਹ ਹੈ, ਜਿਹੜਾ ਜਗ ਜੀਵਨ ਹੈ। ਅਸੀਂ ਇਸ ਜੀਵਨ ਨੂੰ ਤੱਤਾਂ ਦਾ ਮੇਲ ਤੇ ਕਰਮਾਂ ਦਾ ਖੇਲ ਹੀ ਸਮਝ ਕੇ ਰਹਿ ਜਾਂਦੇ ਹਾਂ, ਅੱਗੇ ਨਹੀਂ ਤੁਰਦੇ ਕਿ ਕਰਮ ਕਿਉਂ ਹੋਂਦੇ ਹਨ ਤੇ ਕੌਣ ਕਰਾਉਂਦਾ ਹੈ, ਤੇ ਤੱਤ ਕਿੱਥੋਂ ਆਏ ਤੇ ਕੌਣ ਇਹਨਾਂ ਨੂੰ ਮਿਲਾਉਂਦਾ ਹੈ। ਸਰਬ ਨਿਵਾਸੀ ਸਦਾ ਅਲੇਪਾ ਸਭ ਮਹਿ ਰਹਿਆ ਸਮਾਇਓ। ਉਹ ਹੈ ਅਸਲੀ ਜੀਵਨ, ਓਸ ਦਾ ਚੈਤਨਤਾ ਪੂਰਬਕ ਮੇਲ—ਗਿਆਨ ਪੂਰਣ ਜੀਵਨ ਦਾਨ ਹੈ, ਸਾਡੇ ਲਈ। ਸਾਂਤਿ ਪਾਵਹਿ ਹੋਵਹਿ ਮਨ ਸੀਤਲ ਅਗਨਿ ਨਾ ਅੰਤਰਿ ਧੁਖੀ। ਸਾਡੇ ਅੰਦਰ ਹਰ ਵੇਲੇ ਅੱਗ ਧੁਖਦੀ ਬਲਦੀ ਰਹਿੰਦੀ ਹੈ, ਤਪੇ ਤਤੇ ਰਹਿੰਦੇ ਹਾਂ। ਇਹ ਕੋਈ ਜੀਵਨ ਹੈ?

ਇਸ ਤੋਂ ਜ਼ਿਆਦਾ ਖੋਹਲ ਕੇ ਗੁਰੂ ਸਾਹਿਬ ਹੋਰ ਕੀ ਜੀਵਨ ਬਾਰੇ ਸਾਨੂੰ ਦੱਸ ਸਕਦੇ ਹਨ ;—

ਹਰਿ ਹਰਿ ਸਿਮਰਹੁ ਸੰਤ ਗੋਪਾਲਾ। ਸਾਧ ਸੰਗਿ ਮਿਲਿ ਨਾਮੁ ਧਿਆਵਹੁ ਪੂਰਨ ਹੋਵੈ ਘਾਲਾ॥ ਰਹਾਉ॥ ਸਾਰਿ ਸਮਾਲੈ ਨਿਤਿ ਪ੍ਰਤਿਪਾਲੈ ਪ੍ਰੇਮ ਸਹਿਤ ਗਲਿ ਲਾਵੈ। ਕਹੁ ਨਾਨਕ ਪ੍ਰਭ ਤੁਮਰੇ ਬਿਸਰਤ ਜਗਤ ਜੀਵਨੁ ਕੈਸੇ ਪਾਵੈ।

ਜੀਵਨ ਕਿਰਿਆ ਹੈ, ਸੁਖ ਦੀ ਖ਼ਾਤਰ ਪਰ ਨਾ ਇਹ ਘਾਲ ਥਾਇੰ ਪੈਂਦੀ ਹੈ ਕਿਰਿਆ ਸਫਲ ਹੁੰਦੀ ਹੈ, ਮੁਕਦੀ ਹੈ ਤੇ ਨਾ ਹੀ ਸੁਖ ਪਰਾਪਤ ਹੁੰਦਾ ਹੈ ਜਦ ਤੀਕ ਅਸੀਂ ਗੁਰ ਗੋਪਾਲ ਦੀ ਸਰਨੀ ਨਹੀਂ ਪੈਂਦੇ।

ਜਾ ਕੀ ਸਰਣਿ ਪਇਆਂ ਸੁਖੁ ਪਾਈਐ ਬਾਹੁੜਿ ਦੂਖੁ ਨ ਹੋਈ।

ਮੈਂ ਤੇ ਕਹਾਂਗਾ ਕਿ ਜੀਵਨ ਬੀਮਾਰੀ ਜੇ, ਤੇ ਵੈਦ ਜੇ ਗੁਰੂ।

ਮੇਰਾ ਬੈਦੁ ਗੁਰੂ ਗੋਵਿੰਦਾ।

ਹਰਿ ਹਰਿ ਨਾਮੁ ਅਉਖਧੁ ਮੁਖਿ ਦੇਵੈ ਕਾਟੈ ਜਮ ਕੀ ਫੰਦਾ।

ਜੀਵਨ ਭੁਖ ਹੈ, ਏਸ ਭੁਖ ਨੂੰ ਸਦਾ ਲਈ ਮਿਟਾਉਣ ਵਾਲੀ ਖ਼ੁਰਾਕ ਨਾਮ ਹੈ।

ਇਹ ਜੀਵਨ ਗਿਰਾਉ ਹੈ, ਮਾਇਆ ਵਿਚ Fall ਗਿਰਾਓ ਤੇ ਇਸਨੂੰ ਉਭਾਰਨ ਵਾਲਾ, ਇਸਦੀ ਟੇਕ ਅਧਾਰ ਨਾਮ ਹੈ;—

ਅਪੁਨਾ ਦਾਸੁ ਹਰਿ ਆਪਿ ਉਬਾਰਿਆ ਨਾਨਕ ਨਾਮ ਅਧਾਰਾ।

ਜੀਵਨ ਥਿਰਤਾ ਹੈ; ਨਾਮ ਹੀ ਅਸਥਿਰ ਕਰਨ ਵਾਲੀ ਚੀਜ਼ ਹੈ।

ਅਸਥਿਰ ਭਏ ਲਾਗਿ ਹਰਿ ਚਰਣੀ ਗੋਵਿੰਦ ਕੇ ਗੁਣ ਗਾਏ।

ਜੀਵਨ ਰਾਗ ਦੀ ਖੋਜ ਹੈ ਤੇ ਨਾਮ ਹੀ ਅਨਹਦ ਤੂਰਾ ਜੋ ਸੁਣ ਕੇ ਚੰਚਲ ਮਿਰਗ ਸਾਂਤਿ ਹੋ ਜਾਂਦਾ ਹੈ।

(ਚਲਦਾ)

गरुडपुराणान्तर्गतं राजनीतिप्रकरणम् ।

एम० ए०, एम० ओ० एल० इत्युपाधिजुषा जगदीशशास्त्रिणा सङ्कलितम् ।

(पूर्वतोनुवृत्तम्)

कुलान्यकुलतां यान्ति ब्राह्मणातिक्रमेण च ॥३००॥
ब्रह्मघ्ने च सुरापे च चौरे भग्नव्रते तथा ।
निष्कृतिर्विहिता सद्भिः कृतघ्ने नास्ति निष्कृतिः ॥३०१॥
नाश्नन्ति पितरो देवाः क्षुद्रस्य वृषलीपतेः ।
भार्याजितस्य नाश्नन्ति यस्याश्चोपपतिर्गृहे ॥३०२॥
अकृतज्ञमनार्यञ्च दीर्घरोषमनार्जवम् ।
चतुरो विद्धि चाण्डालान् जात्या जायेत पञ्चमः ॥३०३॥
नोपेक्षितव्यो दुर्बुद्धिः शत्रुरल्पोऽप्यवज्ञया ।
वह्निरल्पोप्यसंग्राह्यः कुरुते भस्मसाज्जगत् ॥३०४॥
नवे वयसि यः शान्तः स शान्त इति मे मतिः ।
धातुषु क्षीयमाणेषु शमः कस्य न जायते ? ॥३०५॥
पन्थान इव विप्रेन्द्र ! सर्वमाधारणाः श्रियः ।
मदीया इति मत्वा वै नहि हर्षयुतो भव ॥३०६॥
चित्तायत्तं धातुवश्यं शरीरं
चित्ते नष्टे धातवो यान्ति नाशम् ।
तस्माच्चित्तं सर्वदा रक्षणीयं
स्वस्थे चित्ते धातवः सम्भवन्ति ॥३०७॥

इति गारुडे महापुराणे नीतिसारे चतुर्दशाधिकशततमोऽध्यायः ।

अथ पञ्चदशाधिकशततमोऽध्यायः ॥

सूत उवाच—

कुभार्याञ्च कुमित्रञ्च कुराजानं कुपुत्रकम् ।
कुकन्याञ्च कुदेशञ्च दूरतः परिवर्जयेत् ॥३०८॥
धर्मः प्रव्रजितस्तपः प्रचलितं सत्यञ्च दूरङ्गतं
पृथ्वी वन्ध्यफला जनाः कपटिनो लौल्ये स्थिता ब्राह्मणाः ।
मर्त्याः स्त्रीवशगाः स्त्रियश्च चपला नीचा जना उन्नता
हा कष्टं खलु जीवितं कलियुगे धन्या जना ये मृताः ॥३०९॥

धन्यास्ते ये न पश्यन्ति देशभङ्गं कुलक्षयम् ।
परचित्तगतान् दारान् पुत्रं कुव्यसने स्थितम् ॥३१०॥
कुपुत्रे निर्वृतिर्नास्ति कुभार्यायां कुतो रतिः ?
कुमित्रे नास्ति विश्वासः कुराज्ये नास्ति जीवितम् ॥३११॥
परान्नञ्च परस्वञ्च परशय्याः परस्त्रियः ।
परवेश्मनि वासश्च शक्रादपि श्रियं हरेत् ॥३१२॥
आलापाद् गात्रसंस्पर्शात्संसर्गात्सहभोजनात् ।
आसनाच्छयनाद् यानात्पापं संक्रमते नृणाम् ॥३१३॥
स्त्रियो नश्यन्ति रूपेण तपः क्रोधेन नश्यति ।
गावो दूरप्रचारेण शूद्रान्नेन द्विजोत्तमः ॥३१४॥
आसनादेकशय्याया भोजनात्पङ्क्तिसङ्करात् ।
ततः सङ्क्रमते पापं घटाद् घट इवोदकम् ।३१५।
लालने बहवो दोषास्ताडने बहवो गुणाः ।
तस्माच्छिष्यं च पुत्रं च ताडयेन्नतु लालयेत् ॥३१६॥
अध्वा जरा देहवतां पर्वतानां जलं जरा ।
असम्भोगश्च नारीणां वस्त्राणामातपो जरा ॥३१७॥
अधमाः कलिमिच्छन्ति सन्धिमिच्छन्ति मध्यमाः ।
उत्तमा मानमिच्छन्ति मानो हि महतां धनम् ॥३१८॥
मानो हि मूलमर्थस्य माने सति धनेन किम् ?
प्रभ्रष्टमानदर्पस्य किं धनेन किमायुषा ? ॥३१९॥
अधमा धनमिच्छन्ति धनमानौ हि मध्यमाः ।
उत्तमा मानमिच्छन्ति मानो हि महतां धनम् ॥३२०॥
वनेऽपि सिंहा न नमन्ति कर्णं
बुभुक्षिता नांशनिरीक्षणाश्च ।
धनैर्विहीनाः सुकुलेषु जाता
न नीचकर्माणि समारभन्ति ॥३२१॥
नाभिषेको न संस्कारः सिंहस्य क्रियते वने ।
नित्यमूर्जितसत्त्वस्य स्वयमेव मृगेन्द्रता ॥३२२॥
वणिक् प्रमादी भृतकश्च मानी
भिक्षुर्विलासी ह्यधनश्च कामी ।

वराङ्गना चाप्रियवादिनी च
न ते च कर्माणि समारभन्ति ॥३२३॥

दाता दरिद्रः कृपणोऽर्थयुक्तः पुत्रोऽविधेयः कुजनस्य सेवा ।
परापकारेषु नरस्य मृत्युः प्रजायते दुश्चरितानि पञ्च ॥३२४॥

कान्तावियोगः स्वजनापमानम् ऋणस्य शेषः कुजनस्य सेवा ।
दारिद्र्यभावाद्विमुखं च मित्रं विनाग्निना पञ्च दहन्ति तीव्रम् ॥३२५॥

चिन्तासहस्रेषु च तेषु मध्ये चिन्ताश्चतस्रोऽप्यसिधारतुल्याः ।
नीचावमानं क्षुधितं कलत्रं भार्या विरक्ता सहजोपरोधः ॥३२६॥

वश्यश्च पुत्रोऽर्थकरी च विद्या अरोगिता सज्जनसङ्गतिश्च ।
इष्टा च भार्या वशवर्त्तिनी च दुःखस्य मूलोद्धरणानि पञ्च ॥३२७॥

कुरङ्गमातङ्गपतङ्गभृङ्गा मीना हताः पञ्चभिरेव पञ्च ।
एकः प्रमाथी स कथं न घात्यो यः सेवते पञ्चभिरेव पञ्च ॥३२८॥

अधीरः कर्कशः स्तब्धः कुचेलः स्वयमागतः ।
पञ्च विप्रा न पूज्यन्ते बृहस्पतिसमा यदि ॥३२९॥

आयुः कर्म चरित्रञ्च विद्या निधनमेव च ।
पञ्चैतानि हि पच्यन्ते जायमानस्य देहिनः ॥३३०॥

पर्वतारोहणे तोये गोकुले दुष्टनिग्रहे ।
पतितस्य समुत्थाने शस्ता ह्येते गुणाः स्मृताः ॥३३१॥

अभ्रच्छाया खले प्रीतिः परनारीषु सङ्गतिः ।
पञ्चैते ह्यस्थिरा भावा यौवनानि धनानि च ॥३३२॥

अस्थिरं जीवितं लोके अस्थिरं धनयौवनम् ।
अस्थिरं पुत्रदाराद्यं धर्मः कीर्त्तिर्यशः स्थिरम् ॥३३३॥

शतं जीवितमत्यल्पं रात्रिस्तस्यार्द्धहारिणी ।
व्याधिशोकजरायासैरर्द्धं तदपि निष्फलम् ॥३३४॥

आयुर्वर्षशतं नृणां परिमितं रात्रौ तदर्द्धं हृतं
तस्यार्द्धं स्थितकिञ्चिदर्द्धमधिकं बालस्य काले हृतम् ।
किञ्चिद्बन्धुवियोगदुःखमरणैर्भूपालसेवागतं
शेषं वारितरङ्गगर्भचपलं मानेन किं मानिनाम् ?॥३३५॥

अहोरात्रमयो लोके जरारूपेण सञ्चरेत् ।
मृत्युर्ग्रसति भूतानि पवनं पन्नगो यथा ॥३३६॥

गच्छतस्तिष्ठतो वापि जाग्रतः स्वपतो न चेत् ।
सर्वसत्त्वहितार्थाय पशोरिव विचेष्टितम् ॥३३७॥
अहितहितविचारशून्यबुद्धेः
श्रुतिसमये बहुभिर्वितर्कितस्य ।
उदरभरणमात्रतुष्टबुद्धेः
पुरुषपशोश्च पशोश्च को विशेषः ॥३३८॥
शौर्ये तपसि दाने च यस्य न प्रथितं यशः ।
विद्यायामर्थलाभे वा मातुरुच्चार एव सः ॥३३९॥
यज्जीवितं क्षणमपि प्रथितं मनुष्यै-
र्विज्ञानविक्रमयशोभिरभग्नमानैः ।
तन्नाम जीवितमिति प्रवदन्ति तज्ज्ञाः
काकोऽपि जीवति चिरञ्च बलिञ्च भुङ्क्ते ॥३४०॥
किं जीवितेन धनमानविवर्जितेन
मित्रेण किं नु भवतीति सशङ्कितेन ।
सिंहव्रतञ्चरत गच्छत मा विषादं
काकोऽपि जीवति चिरञ्च बलिञ्च भुङ्क्ते ॥३४१॥
यो वात्मनीह न गुरौ नच भृत्यवर्गे
दीने दयां न कुरुते नच मित्रकार्ये ।
किं तस्य जीवितफलेन मनुष्यलोके
काकोऽपि जीवति चिरञ्च बलिञ्च भुङ्क्ते ॥३४२॥
यस्य त्रिवर्गशून्यानि दिनान्यायान्ति यान्ति च ।
स लोहकारभस्त्रेव श्वसन्नपि न जीवति ॥३४३॥
स्वाधीनवृत्तेः साफल्यं न पराधीनवृत्तिता ।
ये पराधीनकर्माणो जीवन्तोऽपि च ते मृताः ॥३४४॥
स्वपूरा वै कापुरुषाः स्वपूरो मूषकाञ्जलिः ।
असन्तुष्टः कापुरुषः स्वल्पकेनापि तुष्यति ॥३४५॥
अभ्रच्छाया तृणादग्निर्नीचसेवा पथि जलम् ।
वेश्यारागः खले प्रीतिः षडेते बुद्बुदोपमाः ॥३४६॥
वाचा विहितसार्थेन लोको नच सुखायते ।
जीवितं मानमूलं हि माने म्लाने कुतः सुखम् ? ॥३४७॥

अबलस्य बलं राजा बालस्य रुदितं बलम् ।
बलं मूर्खस्य मौनत्वं तस्करस्यानृतं बलम ॥३४८॥
यथा यथा हि पुरुषः शास्त्रं समधिगच्छति ।
तथा तथाऽस्य मेधा स्याद्विज्ञानञ्चास्य रोचते ॥२४६॥
यथा यथा हि पुरुषः कल्याणे कुरुते मतिम् ।
तथा तथा हि सर्वत्र श्लिष्यते लोकसुप्रियः ॥३५०॥
लोभप्रमादविश्वासैः पुरुषो नश्यति त्रिभिः ।
तस्माल्लोभो न कर्त्तव्यः प्रमादो नो न विश्वसेत् ॥३५१॥
तावद्भयस्य भेतव्यं यावद्भयमनागतम् ।
उत्पन्ने तु भये तीव्रे स्थातव्यं वै ह्यभीतवत् ॥३५२॥
ऋणशेषञ्चाग्निशेषं व्याधिशेषं तथैव च ।
पुनः पुनः प्रवर्द्धन्ते तस्माच्छेषं न कारयेत् ॥३५३॥
कृते प्रतिकृतं कुर्याद् हिंसिते प्रतिहिंसितम ।
न तत्र दोषं पश्यामि दुष्टे दोषं समाचरेत् ॥३५४॥
परोक्षे कार्यहन्तारं प्रत्यक्षे प्रियवादिनम् ।
वर्जयेत्तादृशं मित्रं मायामयमरिं तथा ॥३५५॥
दुर्जनस्य हि सङ्गेन सुजनोऽपि विनश्यति ।
प्रसन्नमपि पानीयं कर्दमैः कलुषीकृतम् ॥३५६॥
सम्यग् भुङ्क्ते जनः सो हि द्विजायार्थी हि यस्य वै ।
तस्मात्सर्वप्रयत्नेन द्विजः पूज्यः प्रयत्नतः ॥३५७॥
तद् भुज्यते यद् द्विजभुक्तशेषं
स बुद्धिमान् यो न करोति पापम् ।
तत्सौहृदं यत् क्रियते परोक्षे
दम्भैर्विना यः क्रियते स धर्मः ॥३५८॥
न सा सभा यत्र न सन्ति वृद्धा
वृद्धा न ते ये न वदन्ति धर्मम् ।
धर्मः स नो यत्र न सत्यमस्ति
नैतत्सत्यं यच्छलेनानुविद्धम ॥३५६॥
ब्राह्मणोऽपि मनुष्याणामादित्यश्चैव तेजसाम् ।
शिरोऽपि सर्वगात्राणां व्रतानां सत्यमुत्तमम् ॥३६०॥

तन्मङ्गलं यत्र मनः प्रसन्नं तज्जीवनं यत्र परस्य सेवा।
तदर्जितं यत्स्वजनेन भुक्तं तद्गर्जितं यत्समरे रिपूणाम्॥३६१॥
सा स्त्री या न मदं कुर्यात् स सुखी तृष्णयोज्झितः।
तन्मित्रं यत्र विश्वासः पुरुषः स जितेन्द्रियः॥३६२॥
तत्र मुक्तादरस्नेहो विलुप्तं यत्र सौहृदम्।
तदेव केवलं श्लाघ्यं यस्यात्मा क्रियते स्तुतौ॥३६३॥
नदीनामग्निहोत्राणां भारतस्य कुलस्य च।
मूलान्वेषो न कर्त्तव्यो मूलाद्दोषेण हीयते।३६४॥
लवणजलान्ता नद्यः स्त्रीभेदान्तञ्च मैथुनम्।
पैशुन्यं जनवार्त्तान्तं वित्तं दुःखकृतान्तकम्॥३६५॥
राज्यश्रीर्ब्रह्मशापान्ता पापान्तं ब्रह्मवर्चसम्।
आचारं घोषवासान्तं कुलस्यान्तं स्त्रियः प्रभोः॥३६६॥
सर्वे क्षयान्ता निलयाः पतनान्ताः समुच्छ्रयाः।
संयोगा विप्रयोगान्ता मरणान्तं हि जीवितम्॥३६७॥
यदीच्छेत पुनरागन्तुं नातिदूरमनुव्रजेत्।
उदकान्तान्निवर्त्तेत स्निग्धवर्णांश्च पादपात्॥३६८॥
अनायके न वस्तव्यं नवा च बहुनायके।
स्त्रीनायके न वस्तव्यं तथा च बालनायके॥३६९॥
पिता रक्षति कौमारे भर्त्ता रक्षति यौवने।
पुत्रस्तु स्थाविरे काले न स्त्री स्वातन्त्र्यमर्हति॥३७०॥
त्यजेद् वन्ध्यामष्टमेऽब्दे नवमे तु मृतप्रजाम्।
एकादशे स्त्रीजननीं सद्यश्चाप्रियवादिनीम्॥३७१॥
अनर्थित्वान्मनुष्याणां भिया परिजनस्य च।
अर्थादपेतमर्यादाः स्त्रियस्तिष्ठन्ति भर्तृषु॥३७२॥
अश्वं श्रान्तं गजं मत्तं गावः प्रथमसूतिकाः।
अनूदके च मण्डूकान् प्राज्ञो दूरेण वर्जयेत्॥३७३॥
अर्थातुराणां न सुहृन्न बन्धुः कामातुराणां न भयं न लज्जा।
चिन्तातुराणां न सुखं न निद्रा क्षुधातुराणां न बलं न तेजः॥३७४॥
कुतो निद्रा दरिद्रस्य परप्रेष्यवरस्य च।
परनारीप्रसक्तस्य परद्रव्यहरस्य च॥३७५॥

सुखं स्वपित्यनृणवान् व्याधिमुक्तश्च यो नरः ।
सावकाशस्तु वै भुङ्क्ते यस्तु दारैर्न सङ्गतः ॥३७६॥
अम्भसः परिमाणेन उन्नतं कमलं भवेत् ।
स्वस्वामिना बलवता भृत्यो भवति गर्वितः ॥३७७॥
स्थानस्थितस्य पद्मस्य मित्रे वरुणभास्करौ ।
स्थानच्युतस्य तस्यैव क्लेशशोषणकारकौ ॥३७८॥
पदे स्थितस्य सुहृदः ते तस्य रिपुतां गताः ।
भानोः पद्मे जले प्रीतिः स्थलोद्धरणशोषणम् ॥३७९॥
स्थानस्थितानि पूज्यन्ते पूज्यन्ते च पदे स्थिताः ।
स्थानभ्रष्टा न पूज्यन्ते केशा दन्ता नखा नराः ॥३८०॥
आचारः कुलमाख्याति देशमाख्याति भाषितम् ।
सम्भ्रमः स्नेहमाख्याति वपुराख्याति भोजनम् ॥३८१॥
वृथा वृष्टिः समुद्रस्य तृप्तस्य भोजनं वृथा ।
वृथा दानं समृद्धस्य नीचस्य सुकृतं वृथा ॥३८२॥
दूरस्थोऽपि समीपस्थो यो यस्य हृदये स्थितः ।
हृदयादपि निष्क्रान्तः समीपस्थोऽपि दूरतः ॥३८३॥
मुखभङ्गः स्वरो दीनो गात्रस्वेदो महद्भयम् ।
मरणे यानि चिह्नानि तानि चिह्नानि याचतः ॥३८४॥
कुब्जस्य कीटघातस्य वातान्निष्कासितस्य च ।
शिखरे वसतस्तस्य वरं जन्म न याचितम् ॥३८५॥
जगत्पतिर्हि याचित्वा विष्णुर्वामनतां गतः ।
कोऽन्योऽधिकतरस्तस्य योऽर्थी याति न लाघवम् ॥३८६॥
माता शत्रुः पिता वैरी बाला येन न पाठिताः ।
सभामध्ये न शोभन्ते हंसमध्ये वका यथा ॥३८७॥
विद्या नाम कुरूपरूपमधिकं विद्यातिगुप्तं धनं
विद्या साधुकरी जनप्रियकरी विद्या गुरूणां गुरुः ।
विद्या बन्धुजनार्त्तिनाशनकरी विद्या परं दैवतं
विद्या राजसु पूजिता हि मनुजो विद्याविहीनः पशुः ॥३८८॥
गृहे चाभ्यन्तरे द्रव्यं लग्नं चैव तु दृश्यते ।
अशेषं हरणीयञ्च विद्या न ह्रियते परैः ॥३८९॥

शौनकाय नीतिसारं विष्णुः सर्वव्रतानि च ।
कथयामास वै पूर्वं तत्र शुश्राव शङ्करः ।
शङ्कराच्च श्रुतो व्यासो व्यासादस्माभिरेव च ॥३६०॥
इति गारुडे महापुराणे नीतिसारे पञ्चदशाधिकशततमोऽध्यायः ॥

अथ कालिकापुराणान्तर्गतं राजनीतिप्रकरणम् ॥

सप्ताशीतितमोऽध्यायः ।

सगर उवाच—

यया नीत्या प्रयोक्तव्यः सुत आत्मा प्रिया तथा ।
तेषां विशेषैः सहितं सदाचारं वदस्व मे ॥ १ ॥

और्व उवाच—

क्रमेण शृणु राजेन्द्र ! यया नीत्या नियोजिताः ।
आत्मा सुतो वा भार्या वा तद्विशेषं शृणुष्व मे ॥ २ ॥
ज्ञानविद्यातपोवृद्धान् वयोवृद्धान्त्सुदक्षिणान् ।
सेवेत प्रथमं विप्रानसूयापरिवर्जितान् ॥ ३ ॥
तेभ्यश्च शृणुयान्नित्यं वेदशास्त्रविनिश्चयम् ।
यदूचुस्ते च तत्कार्यं प्राज्ञश्चैव नृपश्चरेत् ॥ ४ ॥
पञ्चेन्द्रियाणि पञ्चाश्वाः शरीरं रथ उच्यते ।
आत्मा रथी कशा ज्ञानं सारथिर्मन उच्यते ॥ ५ ॥
अश्वान्त्सुदान्तान्कुर्वीत सारथिश्चात्मनो वशम् ।
कशा दृढा सदा कार्या शरीरस्थिरता तथा ॥ ६ ॥
अदान्तांस्तु समारुह्य सैन्धवान् स्यन्दनी यथा ।
अश्वानामिच्छया गच्छन्नुत्पथं प्रतिपद्यते ॥ ७ ॥
तत्रावशः सारथिस्तु स्वेच्छया प्रेरयन्हयान् ।
नयेत्परवशं सम्यग्रथितं वीरमप्युत ॥ ८ ॥
तथेन्द्रियाणि नृपतिर्विषयाणां परिग्रहे ।
स्ववश्यानि प्रकुर्वीत मनोज्ञानं दृढं तथा ॥ ९ ॥

ज्ञाने दृढे कशायाश्च दृढायां नृपसत्तम !
सारथिः स्ववशो दान्तानीशः प्रेरयितुं ह यान ॥१०॥
अतो नृपः स्वेन्द्रियाणि वशे कृत्वा मनस्तथा ।
ज्ञानमार्गमधिष्ठाय प्रकुर्वीतात्मनो हितम् ॥११॥
भोक्तव्यं स्वेच्छया भूयो न कुर्याल्लोभमासवे ।
द्रष्टव्यमिति द्रष्टव्यं न द्रष्टव्यञ्च स्वेच्छया ॥१२॥
श्रोतव्यमिति श्रोतव्यं नाधिकं श्रवणे चरेत् ।
शास्त्रतत्त्वमृते धीरः श्रुतिवश्यो भवेन्नहि ॥१३॥
एवं घ्राणान्त्वचञ्चापि वशीकृत्येच्छया नृपः ।
स्वेच्छया नोपभुञ्जीत नोद्दामं विषयं व्रजेत् ॥१४॥
एवं यदि भवेद्राजा तदा स स्याज्जितेन्द्रियः ।
जितेन्द्रियत्वे हेतुश्च शास्त्रवृद्धोपसेवनम् ॥१५॥
अवृद्धसेव्यशास्त्रज्ञो नृपः शत्रुवशो भवेत् ।
तस्माच्छास्त्रमधिष्ठाय भवेद्राजा जितेन्द्रियः ॥१६॥
धृतिः प्रागल्भ्यमुत्साहो वाक्पटुत्वं विवेचनम् ।
दक्षत्वं धारयिष्णुत्वं दानं मैत्री कृतज्ञता ।
दृढशासनता सत्यं शौचम्मातिविनिश्चयम् ॥१७॥
पराभिप्रायवेदित्वं चारित्रं धैर्यमापदि ।
क्लेशधारणशक्तिश्च गुरुदेवद्विजार्चनम् ॥१८॥
अनसूया ह्यकोपित्वं गुणानेतान्नृपोऽभ्यसेत् ।
कार्याकार्यविभागञ्च धर्मार्थे काम एव च ॥१९॥
सततं प्रतिबुद्ध्येत कुर्यादवसरेऽपि तत् ।
साम दानं च भेदश्च दण्डश्चेति चतुष्टयम् ॥२०॥
ज्ञात्वोपायांस्तु तत्काले तदुपायान्प्रयोजयेत् ।
साम्नस्तु विषये भेदो मध्यमः परिकीर्तितः ॥२१॥
दानस्य विषये साम योग्यमेवोपलक्ष्यते ।
दानस्य विषये दण्डो ह्यधमः परिकीर्तितः ॥२२॥
दण्डस्य विषये दानं तदप्यधममुच्यते ।
साम्नस्तु गोचरे दण्डो ह्यधमादधमः स्मृतः ॥२३॥
सौजन्यं सततं ज्ञेयं भूभृतो भेददण्डयोः ।

साम्नो दानस्य च तथा सौजन्यं याति गोचरे ॥२४॥
कामः क्रोधश्च लोभश्च हर्षो मानो मदस्तथा।
एतानतिशयान्राजा शत्रूनिव विशातयेत् ॥२५॥
सेव्याः काले सुयुक्तौ ते लोभगर्वौ विवर्जयेत् ।
तेज एव नृपाणां तु तीव्रं सूर्यस्य वै यथा ॥२६॥
तत्र गर्वे रोगयुक्तं कायवांस्तं तु संत्यजेत्।
आखेटकादौ स्त्रीसेवा पानञ्चैवार्थदूषणम् ॥२७॥
वाग्दण्डयोश्च पारुष्यं सप्तैतानि विवर्जयेत् ।
परस्त्रीषु विरक्तासु सेवामेकान्ततस्त्यजेत ॥२८॥
सतीषु निजनारीषु युक्तं कुर्यान्निवेशनम् ।
रतीपुत्रफला दारास्तास्तु नैकान्ततस्त्यजेत् ॥२६॥
तयोः सिद्ध्यै स्त्रियः सेव्या वर्जयित्वाऽतिसक्तताम्।
मृगयां तु प्रमादानां स्थानं नित्यं विवर्जयेत् ॥३०॥
अक्षांस्तथा न कुर्वीत सत्कार्यासक्तिनाशनान्।
अन्यैः कृतं कदाचित्तु सेवेत नात्मना चरेत् ॥३१॥
अकार्यकरणे वीजं कृत्यानाञ्च विवर्जने ।
अकालमन्त्रभेदे च कलहे सत्कृतिक्षये ॥३२॥
वर्जयेत्सन्ततं पानं शौचमाङ्गल्यनाशनम् ।
अर्थक्षयकरं नित्यं त्यजेच्चैवात्मदूषणम् ॥३३॥
अभिशस्तेषु चौरेषु घातकेष्वाततायिषु ।
सततं पृथिवीपालो दण्डपारुष्यमाचरेत् ॥३४॥
नान्यत्र दण्डपारुष्यं कुर्यान्नृपतिसत्तमः ।
वाक्पारुष्यञ्च सर्वत्र नैव कुर्यात्कदाचन ॥३५॥
रक्षणीयं सदा सत्यं सत्यमेकम्परायणम् ।
क्षमा तेजस्वितां चैव प्रस्तावान्नृप आचरेत् ॥३६॥
यानासनाश्रयद्वैधसन्धयो विग्रहस्तथा ।
अभ्यसेत्षड्गुणानेतांस्तेषां स्थानञ्च शाश्वतम् ॥३७॥
यः प्रमाणं न जानाति स्थाने वृद्धौ तथा क्षये ।
कोषे जनपदे दण्डे न स राज्येऽवतिष्ठते ॥३८॥
कोषे जनपदे दण्डे चैकैकत्र त्रयं त्रयम् ।

प्रस्तावाद्विनियुञ्जीत रक्षोभैकान्ततस्त्विमान् ॥३९॥
मित्रे शत्रावुदासीने प्रभावं त्रिष्वपीरयेत् ।
उत्साहो विजिगीषायां धर्मकृत्येऽष्टवर्गके ॥४०॥
शरीरयात्रानिर्वाहे क्रियेत सततं नृपैः ।
मन्त्रनिश्चयसम्भूतां बुद्धिं सर्वत्र योजयेत् ॥४१॥
अमात्ये शात्रवे राज्ये पुत्रेष्वन्तःपुरेषु च ।
कृषिं दुर्गञ्च वाणिज्यं खन्यानां करसाधनम् ॥४२॥
आदानं सैन्यकरयोर्बन्धनं गजवाजिनोः ।
शून्ये मद्यमुखानां च योजनं सततं जनैः ॥४३॥
अयाणां मारसेतूनां बन्धनञ्चेति चाष्टमम् ।
एतदष्टसु वर्गेषु चारान्सम्यक् प्रयोजयेत् ॥४४॥
कार्याकार्यविभागाय चाष्टवर्गाधिकारिणाम् ।
अष्टौ चारान्नियुञ्जीयादष्टवर्गेषु पार्थिवः ॥४५॥
दशशून्येषु युञ्जीत क्रमतः शृणु तानि मे ।
स्वामिसचिवराष्ट्राणि मित्रं कोशो बलं तथा ॥४६॥
दुर्गं तु सप्तमं ज्ञेयं राज्याङ्गं गुरुभाषितम् ।
दुर्गयुक्तं चाष्टवर्गं चारान्नात्मनि योजयेत् ॥४७॥
तस्मादिमानि शेषाणि पञ्च चारपदानि च ।
शुद्धान्तेषु च पुत्रेषु मयूथादौ महानसे ॥४८॥
शत्रूदासीनयोश्चापि बलाबलविनिश्चये ।
अष्टादशसु चैतेषु चारान् राजा प्रयोजयेत् ॥४९॥
न यत्प्रकाशं जानीयात्तत्तच्चारैर्निरूपयेत् ।
निरूप्य तत्प्रतीकारमवश्यं छिद्रतश्चरेत् ॥५०॥
यथानियोगमेतेषां यो यो यत्रान्यथा चरेत् ।
ज्ञात्वा तत्र नृपश्चारैर्दण्डयेद्वा वियोजयेत् ॥५१॥
चारांस्तु मन्त्रिणा सार्द्धं रहस्ये संस्थितो नृपः ।
प्रदोषसमये पृच्छेत्तदानीमेव साधयेत् ॥५२॥
स्वपुत्रे चाथ शुद्धान्ते ये तु चारा महानसे ।
नियुक्तास्तान्मध्यरात्रे पृच्छेत्स्वेऽपि च मन्त्रिणि ॥५३॥
एतांश्चारान् स्वयं पश्येन्नृपतिर्मन्त्रिणा विना ।

अन्यांस्तु मन्त्रिणा सार्द्धं निरूप्य प्रदिशेत्फलम् ॥५४॥
नैकवेशधरश्चारो नैको नोत्साहवर्जितः ।
संस्तुतो नहि सर्वत्र नातिदीर्घो न वामनः ॥५५॥
सततं न दिवाचारी न रोगी नाप्यबुद्धिमान् ।
न वित्तविभवैर्हीनो न भार्यापुत्रवर्जितः ॥५६॥
कार्यश्चारो नृपतिना तत्त्वगुह्यविनिर्णये ।
अनेकवेशग्रहणात्तमं भार्यासुतैर्युतम् ॥५७॥
बहुदेशवचोऽभिज्ञं पराभिप्रायवेदकम् ।
दृढभक्तं प्रकुर्वीत चारं शक्तमसाध्वसम् ॥५८॥
अभितिष्ठेत्स्वयं राजा कृषिमात्मसमैस्तथा ।
वणिक्पथे तु दुर्गादौ तेषु शक्तान्नियोजयेत् ॥५९॥
अन्तःपुरे पितुस्तुल्यान् धीरान वृद्धान्नियोजयेत् ।
षण्डान पण्डांस्तथा वृद्धान स्त्रियो वा बुद्धितत्पराः॥६०॥
शुद्धान्ते द्वारि युञ्जीयात स्त्रियो वृद्धा मनीषिणीः ।
नैकः स्वपेत्कदाचित्तु नैको भुञ्जीत पार्थिवः ॥६१॥
नैकाकिनीं तु महिषीं व्रजेन्मैत्राय नैककः ।
अमात्यानुपधाशुद्धान्भार्याः पुत्रांस्तथैव च ॥६२॥
प्रकुर्यात्सततं भूपः सप्रसादं समाचरन ।
धर्मार्थकाममोक्षैश्च प्रत्येकं परिशोधनैः ॥६३॥
उपेत्य धीयते यस्मादुपधा सा प्रकीर्तिता ।
अर्थकामोपधाभ्यान्तु भार्यापुत्रांश्च शोधयेत् ॥६४॥
धर्मोपधाभिर्विप्रांस्तु सर्वाभिः सचिवान्पुनः ।
एभिर्यज्ञैस्तथा दानैरिहैव नृपतिर्भवेत् ॥६५॥
तस्माद्भवांस्तु राज्यार्थी धर्ममेवं समाचरेत् ।
अनेनैवाभिचारेण यज्ञैर्वा पार्थिवो ह्ययम् ॥६६॥
प्राणांस्त्यजति राजा त्वं भविष्यसि न संशयः ।
इति धर्मो नृपस्यैव अश्वमेधादिकश्च यः ॥६७॥
स्वयं न कुरुते भूपस्तस्मात्त्वं कुरु सत्तम !
एवं मन्त्रैर्मन्त्रयित्वा नृपः कार्यान्तिकाद् द्विजात् ॥६८॥
तैरज्ञातान् स्वयं ज्ञात्वा गृह्णीयात्तस्य तैर्मनः ।

यदि राज्याभिलाषेण सचिवो धर्ममाचरेत ॥६९॥
नृपतौ वाऽधिकं कुर्याद्धर्मं तं हीनतां नयेत ।
आभिचारिकमत्यर्थं कुर्वाणां तु विघातयेत् ॥७०॥
प्रवासयेद् ब्राह्मणां तु पार्थिवश्चाभिचारिकम् ।
एषा धर्मोपधा ज्ञेया तैरमात्यान्त्स ताञ्जयेत् ॥७१॥
एतादृशीं तथैवान्यामुपधां धर्मतश्चरेत ।
कोषाध्यक्षान्त्समामन्त्र्य राजामात्यान्प्रतारयेत् ॥७२॥
पुत्रानन्यान्प्रति तथा मन्त्रसंवरणाक्षमान् ।
अयं हि प्रचुरः कोषो मदायत्तो नरोत्तम ! ॥७३॥
आनये तव सम्मत्या तद्यदि त्वम्प्रतीच्छसि ।
तवार्थलग्नादस्माकञ्जीवनं च भविष्यति ॥७४॥
त्वञ्चापि प्रचुरैः कोषैः किं किं वा न करिष्यसि ।
एवमन्यैः कोषगतैरुपायैर्नृपसत्तमः ॥७५॥
पुत्रामात्यादिकान्सर्वान्सततं परिशोधयेत ।
कोपदोषकरान हन्यात्कर्तुमिच्छून्विवासयेत ॥७६॥
द्वैधचित्तान्विमन्येत कुर्याद्वै कोषरक्षणम ।
दासीश्च शिल्पिनीर्वृद्धा मेधा धृतिमतीः स्त्रियः । ७७॥
अन्तर्बहिश्च या यान्ति विदिताः सचिवादिभिः ।
ता राजा रहसि स्थित्वा भार्यादिभिरलक्षितः ॥७८॥
अभिमन्त्र्याथ सम्मन्त्र्य प्रेषयेत्सचिवान्प्रति ।
ता गत्वा हृदयं बुद्ध्वा स्त्रियो विज्ञाननतत्पराः ॥७९॥
महिषी प्रमुखा राज्ञस्त्वां वै कामयते शुभा ।
तत्राहं योजयिष्यामि यदि ते विद्यते स्पृहा ॥८०॥
सचिवस्त्वां कामयते त्वद्योग्यो वरवर्णिनि !
तं सङ्गमयितुं शक्ता यदि श्रद्धा तवास्त्यहम ॥८१॥
इत्यनेन प्रकारेण नानोपायैस्तथोत्तरैः ।
भार्याः पुत्रदुहित्रीश्च स्नुषाश्च प्रस्नुषास्तथा ॥८२॥
शोधयेत्सचिवान्पुत्रान्पौत्रादीन् सेवकांस्तथा ।
कामोपधाविशुद्धांस्तु घातयेदविचारयन् ।
स्त्रियस्तु योज्या दण्डेन ब्राह्मणांस्तु प्रवासयेत् ॥८३॥

मोक्षमार्गविसक्तं तु हिंसापैशुन्यवर्जितम् ।
धर्मैकसारं नृपतिः सचिवं परिवर्जयेत् ॥८४॥
मोक्षमार्गविषक्तांस्तु दण्ड्यानपि न दण्डयेत् ।
समबुद्धिस्तु सर्वत्र तस्मात् तं परिवर्जयेत् ॥८५॥
इति सूत्रश्लोपधानामुपधा बहुधा पुनः ।
विवेचिता चोशनसा तच्छास्त्रं तत्र बोधयेत् ॥८६॥
विग्रहे सततं राजा परैर्न सम्यगाचरेत् ।
भूवित्तमित्रलाभेषु निश्चितेष्वेव विग्रहाः ॥८७॥
सप्ताङ्गेषु प्रमादश्च सदा कार्यो नृपोत्तमैः ।
कोषस्य सञ्चयं रक्षां सततं सम्यगाचरेत् ॥८८॥
मन्त्रिणस्तु नृपः कुर्याद् विप्रान् विद्याविशारदान् ।
विनयज्ञान् कुलीनांश्च धर्मार्थकुशलान् ऋजून् ॥८९॥
मन्त्रयेत्तैः समं ज्ञानं नात्यर्थं बहुभिश्चरेत् ।
एकैकेनैव कर्तव्यो मन्त्रस्य च विनिश्चयः ॥९०॥
व्यस्तैः समस्तैश्चान्यस्य व्यपदेशैः समन्ततः ।
सुसंवृतं मन्त्रगृहं स्थलं वारुह्य मन्त्रयेत् ॥९१॥
अरण्ये निःशलाके वा न यामिन्यां कदाचन ।
शिशून्छाखामृगान्षण्डाञ्छुकान्वैसारिकांस्तथा ॥९२॥
वर्जयेन्मन्त्रगेहे तु मनुष्यान्विकृतांस्तथा ।
दूषणं मन्त्रभेदेषु नृपाणां यत्तु जायते ।
न तच्छक्यं समाधातुं दक्षैर्नृपशतैरपि ॥९३॥
दण्ड्यांस्तु दण्डयेद्दण्डैरदण्ड्यान्दण्डयेन्नहि ।
अदण्डयन्नृपो दण्ड्यान्न दण्ड्यांश्चापि दण्डयन् ॥९४॥
नृपतिर्वाच्यताम्प्राप्य चौरकिल्बिषमाप्नुयात् ।
दुर्गे तु समतां कुर्यात्प्राकाराट्टालतोरणैः ॥९५॥
भूषिताम्नगराद्राजा दूरे दुर्गाश्रयं चरेत् ।
दुर्गं बलं नृपाणां तु नित्यं दुर्गं प्रशस्यते ॥९६॥
शतमेको योधयति दुर्गस्थो यो धनुर्धरः ।
शतं दशसहस्राणि तस्माद्दुर्गं प्रशस्यते ॥९७॥
जलदुर्गं भूमिदुर्गं वृक्षदुर्गं तथैव च ।

अरण्यबलदुर्गं च शैलजं परिखोद्भवम् ॥९८॥
दुर्गं कार्यं नृपतिना यथादुर्गं स्वदेशतः ।
दुर्गं कुर्वन्पुरं कुर्यात्त्रिकोणं धनुराकृति ॥९९॥
वर्तुलं च चतुष्कोणं नान्यथा नगरं चरेत् ।
मृत्तिकाकृतिदुर्गं तु सततं कुलनाशनम् ॥१००॥
यथा राक्षसराजस्य लङ्का दुर्गान्विता पुरा ।
बलेः पुरं शोणिताख्यं तेजोदुर्गैः प्रतिष्ठितम् ॥१०१॥
तद् यस्माद् व्यजनाकारं मनोभ्रष्टः शिवावलिः ।
सौभाग्यं सा तु राज्यस्य नगरं पञ्चकोणकम् ॥१०२॥
दिवि यद्वर्तते राज्यं तच्च भ्रष्टं भविष्यति ।
यच्चायोध्याह्वयम्भूप पुरमिक्ष्वाकुभूभृताम् ॥१०३॥
धनुराकृति तच्चापि ततोभूद्विजयप्रदम् ।
दुर्गभूमौ जयेद् दुर्गान्दिक्पालांश्चैव द्वारतः ॥१०४॥
पूजयित्वा विधानेन जयं भूपः समाप्नुयात् ।
अतो दुर्गं नृपः कुर्यात्सततं जयवृद्धये ॥१०५॥
न ब्राह्मणान्सदा राजा केनाप्यवमनीकृतान् ।
अवमान्य नृपो विप्रान् प्रेत्येह दुःखभाग्भवेत् ॥१०६॥
न विरोधस्तु तैः कार्यः स्वानि तेषां नचाददेत् ।
कृत्यकालेषु सततं तानेव परिपूजयेत् ॥१०७॥
नैषां निन्दां प्रकुर्वीत नाभ्यसूयां तथा चरेत् ।
एवं नृपो महाबुद्धिस्तत्तन्मण्डलसंयुतः ॥१०८॥
अप्रमादी चारचक्षुर्गुणवान्त्सुप्रियंवदः ।
प्रेत्येह महतीं सिद्धिं प्राप्नोति सुखभोगवान् ॥१०९॥
यैर्गुणैर्योजितश्चात्मा तैः पुत्रानपि योजयेत् ।
नृपस्य च स्वतन्त्रत्वं सततं स्वं विनाशयेत् ॥११०॥
स्वतन्त्रो भूपतनयो विकारं याति निश्चितम् ।
निर्विकाराय सततं वृद्धांश्च परियोजयेत् ॥१११॥
भोजने शयने याने पुरुषाणाञ्च वीक्षणे ।
नियोजयेत्सदा दारान्भूपः कामविचेष्टने ॥११२॥
अस्वतन्त्राः स्त्रियः कार्याः सततं पार्थिवेन तु ।

ता: स्वतन्त्राः स्त्रियो नित्यं ह्यनये सम्भवन्ति हि ॥११३॥
तस्मात्कुमारं महिषीमुपधाभिर्मनोहरैः ।
शोधयित्वा नियुञ्जीत यौवराज्यावरोधयोः ॥११४॥
अन्तःपुरप्रवेशे तु स्वतन्त्रत्वं निषेधयेत् ।
भूपपुत्रस्य भार्याया बहिःसारे तथैव च ॥११५॥
अयं विशेषः संक्षेपान्नृपधर्मो मयोदितः ।
पुत्राणां गुणविन्यासे भार्याणामपि भूपते ॥११६॥
उशना राजनीतीनां तन्त्राणि तु बृहस्पतिः ।
चकारान्यान्विशेषांस्तु तयोस्तन्त्रेषु बोधयेत् ॥११७॥
इति श्रीकालिकापुराणे सप्ताशीतितमोऽध्यायः ।

विष्णुधर्मोत्तरपुराणान्तर्गतं राजनीतिप्रकरणम्

द्वितीयखण्डे द्वितीयोऽध्यायः ।

मार्कण्डेय उवाच—

सुखासीनो नरश्रेष्ठः पुष्करस्य निवेशने ।
पप्रच्छ पुष्करं रामो धर्मनित्यो जितेन्द्रियः ॥ १ ॥

राम उवाच—

राष्ट्रस्य किं कृत्यतमं तन्ममाचक्ष्व पृच्छतः ।
आदावेव महाभाग ! यादोगणनृपात्मज ! ॥ २ ॥

पुष्कर उवाच—

राष्ट्रस्य कृत्यं धर्मज्ञ ! राज्ञ एवाभिषेचनम् ।
अनिन्द्रमबलं राष्ट्रं दस्यवोऽभिभवन्त्युत ॥ ३ ॥
अराजकेषु राष्ट्रेषु धर्मावस्था न विद्यते ।
वर्णानामाश्रमाणां च व्यवस्थानं च भार्गव ! ॥ ४ ॥
अराजकेषु राष्ट्रेषु नैव कन्या प्रदीयते ।
विद्यते ममता नैव तथा वित्तेषु कस्यचित् ॥ ५ ॥
मात्स्यो न्यायः प्रवर्तेत विश्वलोपस्तथैव च ।
लोके न कश्चिद्विद्येत गुरोर्वचनकारकः ॥ ६ ॥
नाधीयीरंस्त्रयीं विद्यां त्रयो वर्णा द्विजातयः ।

देवानां यजनं न स्यादनावृष्टिस्ततो भवेत् ॥ ७ ॥
नृलोकसुरलोकौ च स्यातां संशयितावुभौ ।
जनमारी भवेद् घोरा यदि राजा न पालयेत् ॥ ८ ॥
प्रजानां रक्षणार्थाय विष्णुतेजोपबृंहितः ।
मानुष्ये जायते राजा देवसत्त्ववपुर्धरः ॥ ६ ॥
यस्मिन्प्रसन्ने देवस्य प्रसादस्तूपजायते ।
यस्मिन्क्रुद्धे जनस्यास्य क्रोधः समुपजायते ॥१०॥
महद्भिः पुण्यसम्भारैः पार्थिवो राम ! जायते ।
यस्यैकस्य जगत्सर्वं वचने राम ! तिष्ठति ॥११॥
चातुर्वर्ण्यं स्वधर्मस्थं तेषु देशेषु जायते ।
येषु देशेषु राजेन्द्र ! राजा भवति धार्मिकः ॥१२॥
मारकं न च दुर्भिक्षं नाग्निचौरभयं तथा ।
नच व्यालभयं तेषां येषां धर्मपरो नृपः ॥१३॥
आदौ विन्देत नृपतिं ततो भार्यां ततो धनम् ।
कुराजनि जनस्यास्य कुतो भार्या कुतो धनम् ॥१४॥
तस्मात्सर्वप्रयत्नेन राष्ट्रमुख्यो नरेश्वरः ।
परीक्ष्य पूर्वैः कर्तव्यो धार्मिकः सत्यसङ्गरः ॥१५॥
येषां हि राजा भुवि धर्मनित्यस्तेषां न लोके भयमस्ति किञ्चित् ।
तस्मात्प्रयत्नेन नरेन्द्र ! कार्यो राष्ट्रप्रधानैर्नृपतिर्विनीतः ॥१६॥

इति श्रीविष्णुधर्मोत्तरे द्वितीयखण्डे मार्कण्डेयवज्रसंवादे रामं प्रति पुष्करवाक्ये राजप्रशंसा नाम द्वितीयोऽध्यायः ।

द्वितीयखण्डे तृतीयोऽध्यायः ।

पुष्कर उवाच—

सर्वलक्षणलक्षण्यो विनीतः प्रियदर्शनः ।
अदीर्घसूत्री धर्मात्मा जितक्रोधो जितेन्द्रियः ॥१७॥
स्थूललक्षो महोत्साहः स्मितपूर्वाभिभाषकः ।
सुरूपः कुलसम्पन्नः क्षिप्रकारी महाबलः ॥१८॥
ब्रह्मण्यश्चाविसंवादी दृढभक्तिः प्रियंवदः ।

अलोलुपस्संयतवाग्गंभीरः प्रियदर्शनः ॥१९॥
नातिदण्डो न निर्दण्डः चारचक्षुरजिह्मगः ।
व्यवहारे समः प्राप्ते पुत्रस्य रिपुणा सह ॥२०॥
रथे गजेऽश्वे धनुषि व्यायामे च कृतश्रमः ।
उपवासतपःशीलो यज्ञयाजी गुरुप्रियः ॥२१॥
मन्त्री सांवत्सराधीनः समरेष्वनिवर्तकः ।
कालज्ञश्च कृतज्ञश्च नृविशेषज्ञ एव च ॥२२॥
पूज्यं पूजयिता नित्यं दण्ड्यं दण्डयिता तथा ।
षाड्गुण्यस्य प्रयोक्ता च शक्त्युपेतस्तथैव च ॥२३॥
उक्तैरनुक्तैस्तु गुणैरनेकैरलङ्कृतो भूमिपतिश्च कार्यः ।
सम्भूय राष्ट्रप्रवरैर्यथावद्राष्ट्रस्य रक्षार्थमदीनसत्त्वः ॥२४॥
इति श्रीविष्णुधर्मोत्तरे द्वितीयखण्डे मार्कण्डेयवज्रसंवादे रामं प्रति
पुष्करवाक्ये राजलक्षणं नाम तृतीयोऽध्यायः ।

द्वितीयखण्डे चतुर्थोऽध्यायः ।

पुष्कर उवाच—

एवं गुणगणाकीर्णं वरयेयुर्नराधिपम् ।
सम्भूय राष्ट्रप्रवराः क्षत्रियं तु कुलोद्गतम् ॥२५॥
वृतश्च तैर्व्रतं राजा गृह्णीयाद्विजितेन्द्रियः ।
पालयिष्यामि वः सर्वान्धर्मस्थान्नात्र संशयः ॥२६॥
व्रतं गृहीत्वा राज्यार्थी वृणुयाद् ब्राह्मणोत्तमम् ।
सांवत्सरं सुखायास्य सर्वस्य जगतो नृपः ॥२७॥
सर्वलक्षणलक्षण्यं विनीतं प्रियदर्शनम् ।
सुरूपं वेषसम्पन्नं नित्यमूर्जितदर्शनम् ॥२८॥
अदीनवादिनं धीरं धर्मनित्यं जितेन्द्रियम् ।
अन्यङ्गं नाधिकाङ्गं च वेदवेदाङ्गपारगम् ॥२९॥
चतुःषष्ट्यङ्गतत्त्वज्ञमूहापोहविशारदम् ।
भूतभव्यभविष्यज्ञं गणितज्ञं विशेषतः ॥३०॥
विचन्द्रा शर्वरी यद्वन्मुकुटं च च्युतोपलम् ।

गणितेन तथा हीनं ज्योतिषं नृपसत्तम ! ॥३१॥
आस्तिकं श्रद्दधानं च अनुकूलं महीपतेः ।
सांवत्सरं नृपो गत्वा वरयेत्प्रयतः शुचिः ॥३२॥
येनाभिषिक्तो नृपतिर्विनष्टस्तु नराधिप !
सांवत्सरं न तं विद्वान् वरयेन्नृपसत्तम ॥३३॥
न हीनाङ्गं न वाचालं न च निष्प्रतिभं नृपः ।
कुवेषमलिनं मुण्डं नास्तिकं पापनिश्चयम् ॥३४॥
भिन्नवृत्तिं च वरयेद्वरयेत्सद्गुणं सदा ।
वरयित्वा तु वक्तव्याः स्वयमेव महीभुजा ॥३५॥
यथैवाग्निमुखा देवास्तथा राजमुखाः प्रजाः ।
यथैवाग्निमुखा मन्त्रा राज्ञां सांवत्सरास्तथा ॥३६॥
त्वं मे माता पिता चैव देशिकश्च गुरुस्तथा ।
दैवं पुरुषकारश्च ज्ञातव्यौ सततं त्वया ॥३७॥
समधर्मज्ञ ! भद्रं ते राज्यं साधारणं हि नौ ।
समानेयः शुभो देवस्त्वयैव मम सत्तम ! ॥३८॥
पौरुषेण परं कार्यं समरं च तथा मया ।
स चेत्तदभिमन्येत पार्थिवस्य महागुणम् ॥३९॥
अथवा गुणदोषेण प्रज्ञया चाशु यो नृणाम् ।
दैवोपघातसमरे विज्ञानं पौरुषस्य च ॥४०॥
वाडवं न च प्राज्ञस्तु तस्यैवानुमते तदा ।
तेनोद्दिष्टौ तु वरयेद्राजा मन्त्रिपुरोहितौ ॥४१॥
तेनोद्दिष्टां च वरयेन्महिषीं नृपसत्तमः ।
ततोऽभिषेकसम्भारांस्तस्य कुर्यात्स दैववित् ॥४२॥
कुञ्जरं तुरगं कुर्यात्तस्य राज्ञः परीक्षितौ ।
भद्रासनं च छत्रं च बालव्यजनमेव च ॥४३॥
खड्गरत्नं तथा चापं रत्नानि विविधानि च ।
राज्ञो मृतस्य ये त्वासन्सर्वाणि तु नराधिप ! ॥४४॥
ते न कार्या नरेन्द्रस्य तेन दैवविदा तथा ।
कामं संवत्सरं कार्या अलाभेऽन्यस्य भूभुजा ।
गुणाधिकस्य नो कार्या येऽन्यत्राभिहिता मया ॥४५॥

न तत्र नागाः सुभृता न योधा राज्ञो न माता न पिता न बन्धुः ।
यत्रास्य साध्यं भवतीह विद्वान्सांवत्सरो धर्मविदः प्रमत्तः ॥४६॥
इति श्रीविष्णुधर्मोत्तरे द्वितीयखण्डे मार्कण्डेयवज्रसंवादे रामं प्रति
पुष्करकथासु सांवत्सरिकलक्षणं नाम चतुर्थोऽध्यायः ।

द्वितीयखण्डे पञ्चमोऽध्यायः ।

राम उवाच—

राज्ञः पुरोहितः कार्यस्तथा मन्त्री च कीदृशः ?
महिषी च तथा ज्येष्ठा तन्ममाचक्ष्व पृच्छतः ॥४७॥

पुष्कर उवाच—

अव्यङ्गं लक्षणोपेतमनुकूलं प्रियंवदम् ।
अथर्ववेदविद्वांसं यजुर्वेदविशारदम् ॥४८॥
द्विवेदं ब्राह्मणं राजा पुरोहितमथर्वणम् ।
पञ्चकल्पविधानज्ञं वरयेत सुदर्शनम् ॥४९॥
पञ्चकल्पविधानज्ञमाचार्यं प्राप्य भूपतिः ।
सर्वोत्पातप्रशान्तात्मा भुनक्ति वसुधां चिरम् ॥५०॥
स च राज्ञस्तथा कुर्यान्नित्यं कर्म सदैव तु ।
नैमित्तिकं तथा काम्यं दैवज्ञवचने रतः ॥५१॥
न त्याज्यस्तु भवेद्राजा दैवज्ञेन पुरोधसा ।
पतितस्तु भवेत्त्याज्यो नात्र कार्या विचारणा ॥५२॥
तथैव पतितौ राम ! न त्याज्यौ तौ महीभुजा ।
तयोस्त्यागेन राजेन्द्र ! राज्यभ्रंशो विनिर्दिशेत ॥५३॥
दुर्गतिः परलोके च बहुकालमसंशयम् ।
सांवत्सरविरुद्धस्तु त्याज्यो राज्ञा पुरोहितः ॥५४॥
पुरोहितोऽन्यथा राज्ञो यथा माता यथा पिता ।
अनिष्टमस्य व्यसनं हन्याद्दैवोपघातजम् ॥५५॥
ब्राह्मणो निष्कृतिस्तस्य कुत्र शक्या महीभुजा ।
यावन्न राज्ञा विद्वांसौ सांवत्सरपुरोहितौ ॥५६॥
वृत्तिच्छेदे तयो राज्ञः कुलं त्रिपुरुषं व्रजेत् ।

नरकं वर्जयेत्तस्माद् वृत्तिच्छेदं तयोः सदा ॥५७॥
स्थावरेण विभागश्च तयोः कार्यो विशेषतः ।
अनुरूपेण धर्मज्ञ ! सांवत्सरपुरोहितौ ॥५८॥
भाव्यं सदा भार्गववंशचन्द्र! पुरोहितस्यात्मसमस्य राज्ञा ।
राज्ञो यथापि स्वजनेन भाव्यो विद्वान्प्रभुः स्यान्नृपतेः पुरोधाः ॥५९॥
इति श्रीविष्णुधर्मोत्तरे द्वितीयखण्डे मार्कण्डेयवज्रसंवादे
पुरोहितलक्षणं नाम पञ्चमोऽध्यायः ॥

द्वितीयखण्डे षष्ठोऽध्यायः ।

पुष्कर उवाच—

सर्वलक्षणलक्षण्यो मन्त्री राज्ञस्तथैव च ।
ब्राह्मणो वेदतत्त्वज्ञो विनीतः प्रियदर्शनः ॥ ६० ॥
स्थूललक्षो महोत्साहः स्वामिभक्तः प्रियंवदः ।
बृहस्पत्युशनःप्रोक्तां नीतिं जानाति सर्वतः ॥६१॥
रागद्वेषेण यत्कार्यं न वदन्ति महीक्षितः ।
लोकापवादाद्राजार्थे भयं यस्य न जायते ॥६२॥
क्लेशक्षमस्तथा यश्च विजितात्मा जितेन्द्रियः ।
गूढमन्त्रश्च दक्षश्च प्राज्ञो भक्तजनप्रियः ॥६३॥
इङ्गिताकारतत्त्वज्ञ ऊहापोहविशारदः ।
शूरश्च कृतविद्यश्च नच मानी विमत्सरः ॥६४॥
चारप्रचारकुशलः प्रणिधिप्रणयात्मवान ।
षाड्गुण्य विधितत्त्वज्ञ उपायकुशलस्तथा ॥६५॥
वक्ता विधाता कार्याणां नैव कार्यातिपातिता ।
समश्च राजभृत्यानां तथैव च गुणप्रियः ॥६६॥
कालज्ञः समयज्ञश्च कृतज्ञश्च जनप्रियः ।
कृतानामकृतानाञ्च कर्मणां चान्ववेक्षिता ॥६७॥
यथानुरूपमर्हाणां पुरुषाणां नियोजिता ।
राज्ञः परोक्षे कार्याणि सम्पराये भृगूत्तम ॥६८॥
कृत्वा निवेदिता राजन्कर्मणां गुरुलाघवम् ।

शत्रुमित्रविभागज्ञो विग्रहास्पदतत्त्ववित् ॥६९॥
स राज्ञः सर्वकार्याणि कुर्याद् भृगुकुलोद्वह !
विदितानि यथा कुर्यान्नाज्ञातानि महीक्षिता ॥७०॥
अज्ञातानि नरेन्द्रस्य कृत्वा कार्याणि भार्गव !
अचिरेणापि विद्वेषं स मन्त्री त्वधिगच्छति ॥७१॥
करोति यस्तु कार्याणि विविधानि महीपतेः ।
भेदो नो तस्य भवति कदाचिदपि भूभुजा ॥७२॥
एवंगुणो यस्य भवेच्च मन्त्री वाक्ये च तस्याभिरतस्य राज्ञः।
राज्यं स्थिरं स्याद्विपुला च लक्ष्मीर्यशश्च दीप्तो भुवनत्रयेऽपि॥७३॥
इति श्रीविष्णुधर्मोत्तरे द्वितीयखण्डे मार्कण्डेयवज्रसंवादे
मन्त्रिलक्षणं नाम षष्ठोऽध्यायः ।

द्वितीयखण्डे सप्तमोऽध्यायः ।

पुष्कर उवाच—

राज्ञाग्र्यमहिषी कार्या सर्वलक्षणपूजिता ।
विनीता गुरुभक्ता च ईर्ष्याक्रोधविवर्जिता ॥ ७४ ॥
राज्ञः प्रियहितासक्ता चारुवेशा प्रियंवदा ।
भृताभृतजनज्ञा च भृतानामन्ववेक्षिणी ॥ ७५ ॥
अभृतानां जनानां च भृतिकर्मप्रवर्त्तिनी ।
रागद्वेषवियुक्ता च सपत्नीनां सदैव या ॥ ७६ ॥
भोजनासनपानेन सर्वेषामन्ववेक्षणी ।
सपत्निपुत्रेष्वपि या पुत्रवत्परिवर्तते ॥ ७७ ॥
मन्त्रिसंवत्सरामात्यान्या च पूजयते सदा ।
ब्रह्मण्या च दयायुक्ता सर्वभूतानुकम्पिनी ॥ ७८ ॥
कृताकृतज्ञा राज्ञश्च विदिता मण्डलेष्वपि ।
परराजकलत्रेषु प्रीयमाणा मुदा युता ॥ ७९ ॥
दूतादिप्रेषणकरी राजद्वारेषु सर्वदा ।
तद्द्वारेण नरेन्द्राणां कार्यज्ञा च विशेषतः ॥८०॥
एवं गुणगणोपेता नरेन्द्रेण सहानघा ।

अभिषेच्या भवेद्राज्ये राज्यस्थेन नृपेण वा ॥८१॥
एवं यदा यस्य भवेच्च पत्नी
नरेन्द्रचन्द्रस्य महानुभावा ।
वृद्धिं व्रजेत्तस्य नृपस्य राष्ट्रं
सचारकं नात्र विचारणास्ति ॥८२॥

इति श्रीविष्णुधर्मोत्तरे द्वितीयखण्डे मार्कण्डेयवज्रसंवादे अग्रयमहिषीलक्षणं नाम सप्तमोऽध्यायः ।

द्वितीयखण्डेऽष्टादशोऽध्यायः ।

पुष्कर उवाच—

इति सम्भृतसम्भारो राज्ञस्सांवत्सरस्तथा ।
कालेऽभिषेचनं कुर्यात्तं कालं कथयामि ते ॥८३॥
मृते राज्ञि न कालस्य नियमोऽत्र विधीयते ।
तत्रास्य स्नपनं कार्यं विधिवत्तिलसर्षपैः ॥८४॥
घोषयित्वा जयं चास्य सांवत्सरपुरोहितौ ।
अन्यासनोपविष्टस्य दर्शयेतां जनं शनैः ॥८५॥
स सान्त्वयित्वा स्वजनं मुक्त्वा बन्धनगांस्तथा ।
अभयं घोषयित्वा च कालाकाङ्क्षी तथा भवेत् ॥८६॥
नाभिषेच्यो नृपश्चैत्रे नाधिमासे च भार्गव !
न प्रसुप्ते तथा विष्णौ विशेषात्प्रावृषि द्विज ! ॥८७॥
न च भौमदिने ! राम चतुर्थ्यां न तथैव च ।
नवम्यां नाभिषेक्तव्यः चतुर्दश्यां च भार्गव ! ॥८८॥
ध्रुवाणि वैष्णवं शाक्रं हस्तपुष्ये तथैव च ।
नक्षत्राणि प्रशस्यन्ते भूमिपालाभिषेचने ॥८९॥
नागश्चतुष्पदं विष्टिः किंस्तुघ्नः शकुनिस्तथा ।
करणानि न शस्यन्ते व्यतीपातदिनं तथा ॥९०॥
नक्षत्रमुल्काभिहतमुत्पाताभिहतं तथा ।
सौरसूर्यकुजाक्रान्तं परिविष्टिञ्च भार्गव ! ॥९१॥
मुहूर्ताश्चोक्तनक्षत्राः सर्वां मानहितप्रदाः ।

कुजहोरा तथा नेष्टा सर्वत्र कुलिकस्तथा ॥९२॥
वृषोऽथ कीटसिंहौ च कुम्भो लग्ने च शस्यते ।
एतेषां जन्मलग्नाभ्यां यः स्यादुपचयस्थितः । ९३॥
तारा द्वितीया षष्ठी च चतुर्थी चाष्टमी च या ।
नवमी च तथा शस्ता अनुकूलश्च चन्द्रमाः ॥९४॥
सौम्याः केन्द्रगता लग्ना शुभाश्चैव त्रिकोणयोः ।
पापाश्चोपचयस्थाने शस्तो लग्ने दिवाकरः ॥९५।
लग्ने नवांशः क्षितिजस्य वर्ज्यो वर्गस्तथा तस्य महानुभाव !
सूर्यस्य वर्गः सकलः प्रशस्तो राज्ञोऽभिषेके समहो नृपाणाम् ॥९६॥
इति श्रीविष्णुधर्मोत्तरे द्वितीयखण्डे मार्कण्डेयवज्रसंवादे-
ऽभिषेककालनिर्णयं नामाष्टादशोऽध्यायः ।

द्वितीयखण्डे एकविंशतितमोऽध्यायः ।

पुष्कर उवाच—

स्नानं समाचरेद् राज्ञो होमकाले पुरोहितः ।
आदौ च स्वेच्छया स्नातः पुनर्मृद्भिः समाचरेत् ॥९७॥
पर्वताग्रमृदा तावन्मूर्धानं शोधयेन्नृपः ।
वल्मीकाग्रमृदा कर्णौ चन्दनैः केशवालकान ॥९८॥
चन्द्रालयमृदा ग्रीवां हृदयं तु नृपाजिरात् ।
करिदन्तोद्धृतमृदा दक्षिणं तु तथा भुजम् ।
वृषशृङ्गोद्धृतमृदा वामं चैव तदा भुजम् ॥९९॥
सरोमृदा तथा पृष्ठं चोदरं सङ्गमे मृदा ।
नदीकूलद्वयमृदा पार्श्वे संशोधयेत्तथा ॥१००॥
अश्वस्थानात्तथा जङ्घे राजा संशोधयेद् बुधः ।
रथचक्रोद्धृतमृदा तथैव च करद्वयम् ॥१०१॥
मृत्स्नातः स्नपनीयः स्यात्पञ्चगव्यजलेन तु ।
ततो भद्रासनगतं मुख्यामात्यचतुष्टयम् ॥१०२॥
वर्णप्रधानं भूपालमभिषिञ्चेद्यथाविधि ।
पूर्वतो हेमकुम्भेन घृतपूर्णेन ब्राह्मणः ॥१०३॥

रूप्यकुम्भेन याम्येन क्षीरपूर्णेन क्षत्रियः ।
दध्ना च ताम्रकुम्भेन वैश्यः पश्चिमतो द्विज ! ॥१०४॥
माहेयेन जलेनोदक् शूद्रामात्योऽभिषेचयेत् ।
ततोऽभिषेकं नृपतेर्बह्वृचप्रवरो द्विजः ॥१०५॥
कुर्वीत मधुना राम ! छन्दोगश्च कुशोदकैः ।
सम्पातवन्तं कलशं तथा हुत्वा पुरोहितः ॥१०६॥
विधाय वह्निरक्षां तु सदस्येषु यथाविधि ।
राजसूयाभिषेके तु ये मन्त्राः परिकीर्तिताः ॥१०७॥
तैस्तु दद्यान्महाभाग ! ब्राह्मणानां स्वनेन तु ।
ततो पुरोहितो गच्छेद्वेदिमूलं तदैव तु ॥१०८॥
विभूषितं तु राजानं सर्वतोभद्र आसने ।
शतच्छिद्रेण पात्रेण सौवर्णेन यथाविधि ॥१०९॥
अभिषिञ्चति धर्मज्ञ ! यजुर्वेदविशारदः ।
या ओषधीरौषधीभिः सर्वाभिः सुसमाहितः ॥११०॥
रथे अक्षेति गन्धैश्च आब्रह्मन् ब्रह्मणेति च ।
बीजैः पुष्पैस्तथा चैनं राम ! पुष्पवतीति च ॥१११॥
तेनैव चाभिमन्त्रेण फलैस्तमभिषेचयेत् ।
आशुः शिशान इत्येव सर्वरत्नैश्च भार्गव ! ॥११२॥
ये देवाः पुरस्सदेति कुशाभिः परिमार्जयेत् ।
ऋग्वेदकृत्ततो राज्ञो रोचनाया यथाविधि ॥११३॥
मूर्धानं च तथा कण्ठे गन्धद्वारेति संस्पृशेत् ।
ततो ब्राह्मणमुख्याश्च क्षत्रियाश्च विशस्तथा ॥११४॥
शूद्राश्च वारमुख्याश्च नानातीर्थसमुद्भवैः ।
नादेयैः सारसैः कौपैर्नानाकलशसंस्थितैः ॥११५॥
चतुस्सागरजैर्लाभादलाभाद् द्विजकल्पितैः ।
गङ्गायमुनयोश्चैव निर्झरैश्च तथोद्भिजैः ॥११६॥
छत्रपाणिर्भवेत्कश्चित्केचिच्चामरपाणयः ।
अमात्यमुख्यास्तं कालं केचिद्वेत्रकरास्तथा ॥११७॥
शंखभेरीनिनादेन वन्दीनां निस्वनेन च ।
गीतवादित्रघोषेण द्विजकोलाहलेन च ॥११८॥

राजानमभिषिञ्चेयुस्समेत्य सहिता जनाः ।
सर्वैः स्तुतोऽभिषिक्तश्च सम्मिश्रजलमिश्रितम् ॥११९॥
सर्वौषधियुतं पुण्यं सर्वगन्धयुतं तथा ।
रत्नबीजसमायुक्तं फलबीजयुतं तथा ॥१२०॥
ऊर्जितं सितसूत्रेण वेष्टितग्रीवमेव च ।
श्वेतवस्त्राम्रपत्रैश्च संवीतं सुविभूषितम् ॥१२१॥
क्षीरवृक्षलताच्छत्रं सुदृढं काञ्चनं नवम् ।
आदाय कलशं राज्ञा स्वयं सांवत्सरस्तथा ॥१२२॥
मन्त्रावसाने कलशं दद्याद् भृगुकुलोद्वह !
ततः पश्येन्मुखं राजा दर्पणे चाथ सर्पिषि ॥१२३॥
सोष्णीकः सितवस्त्रश्च मङ्गलालम्भनं ततः ।
कृत्वा सम्पूजयेद्विष्णुं ब्रह्माणं शङ्करं तथा ॥१२४॥
लोकपालान् ग्रहांश्चैव नक्षत्राणि च भार्गव !
ततः स्वपूजां कुर्वीत शयनीयं ततो व्रजेत् ॥१२५॥
व्याघ्रचर्मोत्तरं रम्यं सितवस्त्रोत्तरच्छदम् ।
पुरोधा मधुपर्केण तत्रस्थं तं समर्चयेत् ॥१२६॥
राजा चैवार्चयेत्तत्र सांवत्सरपुरोहितौ ।
मधुपर्केण धर्मज्ञस्ततस्तस्य सदैव हि ॥१२७॥
पट्टबन्धं प्रकुर्वीत मुकुटस्य च बन्धनम् ।
ततः स बद्धमुकुटः काले पूर्वं मयेरितम् ॥१२८॥
पराध्यास्तरणोपेते पञ्चचर्मोत्तरच्छदे ।
ध्रुवा द्यौ इति मन्त्रेण चोपवेश्यः पुरोधसा ॥१२९॥
वृकस्य वृषदंशस्य द्वीपिनश्च भृगूत्तम !
तेषामुपरि सिंहस्य व्याघ्रस्य च ततः परम् ॥१३०॥
तत्रोपविष्टस्य ततः प्रतीहारः प्रदर्शयेत् ।
अमात्यांश्च तथा पौरान्नैगमांश्च वणिग्वरान् ॥१३१॥
ततः प्रकृतयश्चान्या यथावदनुपूर्वशः ।
ततो ग्रहवराग्रेस्भतुरङ्गकनकोत्तमैः ॥१३२॥
गोजाविग्रहदानैश्च सांवत्सरपुरोहितौ ।
पूजयित्वा ततः पश्चात्पूजयद् ब्राह्मणात्रयम् ॥१३३॥

अनेनैव विधानेन येन राजाभिषेचितः ।
ततस्त्वमात्यान संपूज्य सांवत्सरपुरोधसः ॥१३४॥
ततो ब्राह्मणमुख्यानां पूजनं तु समाचरेत् ।
गोवस्त्रतिलरूप्यान्नफलकाञ्चनगोरसैः ॥१३५॥
मोदकाक्षतपुष्पैश्च महीदानैश्च पार्थिवः ।
मङ्गलालम्भनं कृत्वा गृहीत्वा सशरं धनुः ॥१३६॥
वह्निं प्रदक्षिणीकृत्य प्रणिपत्य तथा गुरुम् ।
पृष्ठतो वृषमालभ्य गां सवत्सां च पार्थिवः ॥१३७॥
पूजयित्वा च तुरगं मन्त्रितं चाभिषेचितम् ।
मन्त्रितं दक्षिणे कर्णे स्वयं वेदविदा ततः ॥१३८॥
आरुह्य राजमार्गेण स्वपुरं तु परिभ्रमेत् ।
मुख्यामात्यैश्च सामन्तैः सांवत्सरपुरोहितैः ॥१३९॥
सहितः कुञ्जरारूढैरभिगच्छेच्च देवताः ।
तासां सम्पूजनं कृत्वा नगरे या निवेशिताः ॥१४०॥
प्रविशेत गृहं राजा प्रहृष्टनरवाहनः ।
दानमानानि सत्कारैर्गृह्णीयात् प्रकृतीस्ततः ॥१४१॥
सम्पूजितास्तास्तु विसर्जयित्वा गृहे स्वके स्यान्मुदितो महात्मा ।
विधानमेतत्समवाप्य राजा कृत्स्नां स पृथ्वीं वशगां हि कुर्यात् ॥१४२॥

इति श्रीविष्णुधर्मोत्तरे द्वितीयखण्डे मार्कण्डेयवज्रसंवादे
राज्याभिषेकविधिर्नामैकविंशतितमोऽध्यायः ॥

द्वितीयखण्डे चतुर्विंशोऽध्यायः ।

राम उवाच—

राज्ञोऽभिषिक्तमात्रस्य किन्नु कृत्यतमं भवेत् ।
एतन्मे सर्वमाचक्ष्व सर्वं वेत्ति यतो भवान् ॥१४३॥

पुष्कर उवाच—

अभिषेकार्द्रशिरसा राज्ञा राजीवलोचन !
सहायवरणं कार्यं तत्र राज्यं प्रतिष्ठितम् ॥१४४॥
यदप्यल्पतरं कर्म तदप्येकेन दुष्करम् ।

पुरुषेणासहायेन किन्नु राज्यं महत्पदम् ॥१४५॥
तस्मात्सहायान्विरयेत्कुलीनान्नृपतिः स्वयम् ।
शूरानुत्तमजातीयान्बलयुक्ताञ्श्रुतान्वितान् ॥१४६॥
रूपसत्त्वगुणौदार्यसंयुक्तान्क्षमया युतान् ।
क्लेशक्षमान्महोत्साहान्धर्मज्ञांश्च प्रियंवदान् ॥१४७॥
हितोपदेशिकान्प्रज्ञान्स्वामिभक्तान्यशोर्थिनः ।
एवंविधान्सहायांस्तु शुभकर्मणि योजयेत् ॥१४८॥
गुणहीनानपि तथा विज्ञाय नृपतिः स्वयम् ।
कर्मस्वेव नियुञ्जीत यथायोग्येषु भार्गव ! ॥१४९॥
कुलीनाः शीलसम्पन्ना धनुर्वेदविशारदाः ।
हस्तिशिक्षाश्वशिक्षासु कुशलाश्श्लक्ष्णभाषितैः ॥१५०॥
निमित्ते शकुनज्ञाने वित्तवैद्यचिकित्सके ।
पुरुषान्तरविज्ञाने षाड्गुण्येन विनिश्चिताः ॥१५१॥
कृतज्ञाः कर्मणा शूरास्तथा क्लेशसह ऋजुः ।
व्यूहतत्त्वविधानज्ञः फल्गुसारविशेषवित् ॥१५२॥
राज्ञां सेनापतिः कार्यो ब्राह्मणः क्षत्रियोऽथवा ।
प्रांशुः सुरूपो दक्षश्च प्रियवादी न चोद्धतः ॥१५३॥
चित्तग्राहश्च सर्वेषां प्रतीहारो विधीयते ।
यथोक्तवादी धूर्तः स्याद् देशभाषाविशारदः ॥१५४॥
शाब्दः क्लेशसहो वाग्मी देशकालविभाषिता ।
विज्ञाय देशं कालं वा हितं यत्स्यान्महीक्षितः ॥१५५॥
वक्तापि तस्य यः काले स दूतो नृपतिर्भवेत् ।
प्रांशवो व्यायताः शूरा दृढभक्ता निराकुलाः ॥१५६॥
राज्ञा तु रक्षिणः कार्यास्तदा क्लेशसहा हिताः ।
अहार्याश्चानृशंसाश्च दृढभक्ताश्च पार्थिवे ॥१५७॥
ताम्बूलधारी भवति नारी चाप्यथ तद्गुणा ।
षाड्गुण्यविधितत्त्वज्ञो देशभाषाविशारदः ॥१५८॥
सान्धिविग्रहिकः कार्यो राज्ञा नयविशारदः ।
आयव्ययज्ञो लोकज्ञो देशोत्पत्तिविशारदः ॥१५९॥
कृताकृतज्ञो भृत्यानां ज्ञेयः स्याद्रक्षरक्षिता ।

सुरूपस्तरुणः शूरो दृढभक्तः कुलोचितः १६०॥
शूरः क्लेशसहश्चैव खड्गधारी प्रकीर्तितः ।
शूरश्च बहुयुक्तश्च गजाश्वरथकोविदः ॥१६१॥
केशधारी भवेद्राज्ञः सदा क्लेशसहश्च यः ।
निमित्तशकुनज्ञानहयशिक्षाविशारदः ॥१६२॥
हयायुर्वेदतत्त्वज्ञो भूमिभागविशेषवित् ।
बलाबलज्ञो रथिनां स्थिरदृष्टिर्विशारदः ॥१६३॥
शूरश्च कृतविद्यश्च सारथिः परिकीर्तितः ।
अनाहार्यः शुचिर्दक्षश्चिकित्सकवचोरतः ॥१६४॥
सूदशास्त्रविधानज्ञः सूदाध्यक्षः प्रशस्यते ।
सूदशास्त्रविधानज्ञाः पराभेद्याः कुलोद्गताः ॥१६५॥
सर्वे महानसे कार्या नीचकेशनखा जनाः ।
समः शत्रौ च मित्रे च धर्मशास्त्रविशारदः ॥१६६॥
विप्रमुख्यः कुलीनश्च धर्माधिकरणो भवेत् ।
कार्यास्तथाविधास्तत्र द्विजमुख्याः सभासदः ॥१६७॥
सर्वदेशाक्षराभिज्ञाः सर्वशास्त्रविशारदाः ।
लेखकाः कथिता राम ! सर्वाधिकरणेषु वै ॥१६८॥
शीर्षोपेतान् सुसम्पूर्णान् समश्रेणीगतान्समान् ।
अक्षरान् विलिखेद् यस्तु लेखकः स वरः स्मृतः ॥१६९॥
उपायवाक्यकुशलः सर्वशास्त्रविशारदः ।
बह्वर्थवक्ता चाल्पेन लेखकः स्याद् भृगूत्तम ! ॥१७०॥
पुरुषान्तरतत्त्वज्ञाः प्रांशवश्चाप्यलोलुपाः ।
धर्माधिकरणे कार्या जनाह्वानकरा नराः ॥१७१॥
एवंविधास्तथा कार्या राज्ञो दौवारिका जनाः ।
लोहवस्त्रादिधातूनां रत्नानां च विभागवित् ॥१७२॥
विज्ञाता फल्गुसाराणां त्वनाहार्यः शुचिस्सदा ।
निपुणश्चाप्रमत्तश्च धनाध्यक्षः प्रकीर्तितः ॥१७३॥
आयद्वारेषु सर्वेषु धनाध्यक्षसमा नराः ।
व्ययद्वारेषु सर्वेषु कर्तव्याः पृथिवीक्षिता ॥१७४॥
परं पारङ्गतो यः स्यादष्टाङ्गेषु चिकित्सिते ।

अनाहार्यस्स वैद्यः स्याद्धर्मात्मा च कुलोद्गतः ॥१७५॥
प्राणाचार्यस्स विज्ञेयो वचनं तस्य भूभुजा ।
राम ! स्नेहात्सदा कार्यं यथा कार्यं पृथग्जनैः ॥१७६॥
हस्तिशिक्षाविधानज्ञो वनजातिविशारदः ।
क्लेशक्षमस्तथा राज्ञो गजाध्यक्षः प्रशस्यते ॥१७७॥
एतैरेव गुणैर्युक्तो स्वाधीनश्च विशेषतः ।
गजारोहो नरेन्द्रस्य सर्वकर्मसु शस्यते ॥१७८॥
हयशिक्षाविधानज्ञस्तच्चिकित्सितपारगः ।
अश्वाध्यक्षो महीभर्तुः स्वासनश्च प्रशस्यते ॥१७९॥
अनाहार्यश्च शूरश्च तथा प्राज्ञः कुलोद्गतः ।
दुर्गाध्यक्षः स्मृतो राम ! उद्युक्तः सर्वकर्मसु ॥१८०॥
वास्तुविद्याविधानज्ञो लघुहस्तो जितश्रमः ।
दीर्घदर्शी च शूरश्च स्थपतिः परिकीर्तितः ॥१८१॥
यन्त्रमुक्ते पाणिमुक्ते अमुक्ते मुक्तधारिते ।
अस्त्राचार्यो नियुद्धे च कुशलश्च तथेष्यते ॥१८२॥
पञ्चाशदधिका नार्यः पुरुषाः सप्ततिस्तथा ।
अन्तःपुरचराः कार्या राज्ञा सर्वेषु कर्मसु ॥१८३॥
स्थविरा जातितत्त्वज्ञाः सततं प्रतिजाग्रतः ।
राज्ञः स्यादायुधागारे दक्षः कर्मसु चोद्यतः ॥१८४॥
कर्माण्यपरिमेयानि राज्ञां भृगुकुलोद्वह !
उत्तमाधममध्यानि बुद्ध्वा कर्माणि पार्थिव ! ॥१८५॥
उत्तमाधममध्यांस्तु पुरुषान्विनियोजयेत् ।
न कर्मणि विपर्यासाद्राजा नाशमवाप्नुयात् ॥१८६॥
नियुक्तपुरुषे भक्तिं श्रुतं शौर्यं बलं कुलम् ।
ज्ञात्वा वृत्तिर्विधातव्या पुरुषाणां महीक्षिता ॥१८७॥
पुरुषान्तरविज्ञाने तत्त्वमात्रनिबन्धनाः ।
नरेन्द्रलक्ष्या धर्मज्ञास्तत्रायत्तो भवेन्नृपः ॥१८८॥
स्वभृत्याश्च तथा पुष्टास्सततं प्रतिमानिताः ।
राज्ञा सहायाः कर्तव्याः पृथिवीं जेतुमिच्छता ॥१८९॥
यथार्हं चाथ सुभृतान्राजा कर्मसु योजयेत् ।

धर्मिष्ठान्धर्मकार्येषु शूरान्संग्रामकर्मणि ॥१६०॥
निपुणानर्थकृत्येषु सर्वत्र च तथा शुचीन् ।
स्त्रीषु षण्डान्नियुञ्जीत तीक्ष्णान्दारुणकर्मसु ॥१६१॥
धर्मे चार्थे च कामे च भये च भृगुनन्दन !
राजा यथार्हं कुर्यात्तान्ह्युपधाभिः परीक्षितान् ॥१६२॥
समतीतो यथार्हायां कुर्याद्धस्तिवनेचरान् ।
उत्पादान्वेषणे यत्तानध्यक्षाँस्तत्र कारयेत् ॥१६३॥
एवमादीनि कर्माणि यत्नैः कार्याणि भार्गव !
सर्वथा नेष्यते राज्ञस्तीक्ष्णोपकरणक्षयः ॥१६४॥
पापसाध्यानि कर्माणि यानि राज्ञां भृगूत्तम !
सन्तस्तानि न कुर्वन्ति तस्मात्तान्बिभृयान्नृपः ॥१६५॥
नेष्यते पृथिवीशानां तीक्ष्णोपकरणक्षयः ।
यस्मिन्कर्मणि यस्य स्याद्विशेषेण च कौशलम् ॥१६६॥
तस्मिन्कर्मणि तं राजा परीक्ष्य विनियोजयेत् ।
पितृपैतामहान्भृत्यान्सर्वकर्मसु योजयेत् ॥१६७॥
विना दायादकृत्येषु तत्र ते हि समासतः ।
राजा दायादकृत्येषु परीक्ष्य स्वकृतान्नरान् ॥१६८॥
नियुञ्जीत महाभागस्तस्य ते हितकारिणः ।
परराजगृहान्प्राप्ताञ्जनसंग्रहकाम्यया ॥१६९॥
दुष्टान्वाप्यथ वाऽदुष्टान्संश्रयेत प्रयत्नतः ।
दुष्टं विज्ञाय विश्वासं न कुर्यात्तत्र भूमिपः ॥२००॥
वृत्तिं तस्यापि वर्तेत जनसंग्रहकाम्यया ।
राजा देशान्तरप्राप्तं पुरुषं पूजयेद् भृशम् ॥२०१॥
सहायं देशसंप्राप्तं बहुमानेन चिन्तयेत् ।
कामं भृत्यार्जनं राजा नैव कुर्याद् भृगूत्तम ! ॥२०२॥
न वै वा संविभक्तं तु भृत्यं कुर्यात्कथञ्चन ।
शस्त्रमग्निं विषं सर्पान्निस्त्रिंशमपि चैकतः ॥२०३॥
भृत्या मनुजशार्दूल ! कुभृत्याश्च तथैकतः ।
तेषां चारेण विज्ञानं राजा विज्ञाय नित्यशः ॥२०४॥
गुणिनां पूजनं कुर्यान्निर्गुणानां च शासनम् ।

कथिताः सततं राम ! राजानश्चारचक्षुषः ॥२०५॥
स्वदेशे परदेशे च जातिशीलान् विचक्षणान् ।
अनाहार्यान्क्लेशसहान्नियुञ्जीत सदा चरान् ॥२०६॥
जनस्याविततान् सौम्यांस्तथा ज्ञातान्परस्परम् ।
वणिजो मन्त्रकुशलान्सांवत्सरचिकित्सितान् ॥२०७॥
तथा प्रव्रजिताकारान्राजा चारान्नियोजयेत् ।
नैकस्य राजा श्रद्दध्याच्चारस्यापि च भाषितम् ॥२०८॥
द्वयोस्संवादमाज्ञाय सन्दध्यान्नृपतिस्ततः ।
परस्परस्याविदितौ यदि स्यातां न तावुभौ ॥२०९॥
तस्माद्राजा प्रयत्नेन गूढांश्चारान् प्रयोजयेत् ।
राज्यस्य मूलमेतावद्यद्राज्ञश्चारदृष्टिता ॥२१०॥
चाराणामपि यत्नेन राज्ञा कार्यं परीक्षणम् ।
रागापरागौ भृत्यानां जनस्य च गुणागुणौ ॥२११॥
शुभानामशुभानां च विज्ञेयौ राम ! कर्मणाम् ।
सर्वं राज्ञां चरायत्तं तेष्वायत्तस्सदा भवेत ॥२१२॥
कर्मणा केन मे लोके जनस्सर्वोऽनुरज्यते ।
विरज्यते तथा केन विज्ञेयं तन्महीक्षिता ।
विरागजननं सर्वं वर्जनीयं प्रयत्नतः ॥२१३॥
जनानुरागप्रभवो हि लक्ष्यो
राज्ञां यशो भार्गववंशचन्द्र !
तस्मात्प्रयत्नेन नरेन्द्रमुख्यैः
कार्योऽनुरागो भुवि मानवेषु ॥२१४॥

इति श्रीविष्णुधर्मोत्तरे द्वितीयखण्डे मार्कण्डेयवज्रसंवादे सहायसम्पत्तिर्नाम चतुर्विंशोऽध्यायः ।

द्वितीयखण्डे पञ्चविंशोऽध्यायः ।

पुष्कर उवाच—

यथानुवर्तितव्यं स्याद्राम ! राजोपजीविभिः ।
तथा ते कथयिष्यामि निबोध गदतो मम ॥२१५॥

आज्ञा सर्वात्मना कार्या स्वशक्त्या भृगुनन्दन !
आक्षिप्य वचनं तस्य न वक्तव्यं तथा वचः ॥२१६॥
अनुकूलं प्रियं तस्य वक्तव्यं जनसन्निधौ ।
रहोगतस्य वक्तव्यमप्रियं यद्धितं भवेत् ॥२१७॥
परार्थमथ वक्तव्यं स्वस्थे चेतसि भार्गव !
स्वास्थ्यं सुहृद्भिर्वक्तव्यं न स्वयं तु कथञ्चन ॥२१८॥
कार्यातिपातकं कार्यं रक्षितव्यं प्रयत्नतः ।
नच हिंस्यधनं किञ्चिन्नियुक्तेन च कर्मणि ॥२१६॥
नोपेक्ष्यं तस्य मानं च तथा राज्ञः प्रियो भवेत् ।
राज्ञश्च न तथा कार्यं वेशभाषितचेष्टितम् ॥२२०॥
राजलीला न कर्तव्या तद्विष्टं च विवर्जयेत् ।
राज्ञस्समाधिकौ वेशौ नतु कार्यौ विजानता ॥२२१॥
द्यूतादिषु तथैवास्य कौशलं तु प्रदर्शयेत् ।
प्रदर्श्य कौशलं चास्य राजानं न विशेषयेत् ॥२२२॥
अन्तःपुरधनाध्यक्षैर्वैरिदूतैर्निराकृतैः ।
संसर्गं न व्रजेद्राम ! विना पार्थिवशासनम् ॥२२३॥
निस्नेहतां चावमानं तत्प्रयुक्तं च गोपयेत् ।
यच्च गुह्यं भवेद्राज्ञस्तन्न लोके प्रकाशयेत् ॥२२४॥
नृपेण श्रावितं यत्स्याद् गुह्याद् गुह्यं भृगूत्तम !
न तत्संश्रावयेल्लोके तथा राज्ञः प्रियो भवेत् ॥२२५॥
आज्ञाप्यमाने चान्यस्मिन्समुत्थाय त्वरान्वितः ।
अहं किङ्करवाणीति वाच्यो राजा विजानता ॥२२६॥
कार्यावस्थां तु विज्ञाय कार्यमेतत्तथा भवेत् ।
सततं क्रियमाणेऽस्मिंल्लाघवं तु व्रजेद् बुधः ॥२२७॥
राज्ञः प्रियाणि वाक्यानि न चात्यर्थं पुनः पुनः ।
न हास्यशीलश्च भवेन्न चापि भृकुटीमुखः ॥२२८॥
नातिवक्ता न निर्वक्ता नच मात्सरिकस्तथा ।
आत्मसम्भावितश्चैव न भवेत्तु कथञ्चन ॥२२६॥
दुष्कृतानि नरेन्द्रस्य नच सङ्कीर्तयेत्क्वचित् ।
वस्त्रं पत्रमलङ्कारं राज्ञा दत्तं तु धारयेत् ॥२३०॥

औदार्येण न तद्देयमन्यस्मिन्भूतिमिच्छता ।
न चैवाभ्यशनं राज्ञः स्वपनं चापि कारयेत् ॥२३१॥
नानिर्दिष्टे तथा द्वारे प्रविशेत कथञ्चन ।
नच पश्येत राजानमयोग्यासु च भूमिषु ॥२३२॥
राज्ञस्तु दक्षिणे पार्श्वे वामे चोपविशेत्तदा ।
पुरस्तात्तु यथा पश्चादासनं तु विगर्हितम् ॥२३३॥
जृम्भा निष्ठीवनं कामं कोपं पर्यङ्किकाश्रयम् ।
भृकुटं वातमुद्गारं तत्समीपे विवर्जयेत् ॥२३४॥
स्वयं तथा न कुर्वीत स्वगुणाख्यापनं बुधः ।
स्वगुणाख्यापने कुर्यात्परानेव प्रयोजकान् ॥२३५॥
हृदयं निर्मलं कृत्वा परां भक्तिमुपाश्रितैः ।
अनुजीविगणैर्भाव्यं नित्यं राज्ञामतन्द्रितैः ॥२३६॥
शाठ्यं लौल्यमपैशुन्यं नास्तिक्यं क्षुद्रतां तथा ।
चापल्यं च परित्याज्यं नित्यं राजानुजीविना ॥२३७॥
श्रुतेन विद्याशिल्पैश्च संयोज्यात्मानमात्मना ।
राजसेवां ततः कुर्याद् भूतये भीतिवर्धनः ॥२३८॥
नमस्कार्यास्सदा चास्य पुत्रवल्लभमन्त्रिणः ।
सचिवैश्चास्य विश्वासं नतु कार्यं कथञ्चन ॥२३९॥
अपृष्टश्चास्य न ब्रूयात्कामं ब्रूयात्तथापदि ।
हितं पथ्यं च वचनं हितैस्सह सुनिश्चितम् ॥२४०॥
चित्तं चैवास्य विज्ञेयं नित्यमेवानुजीविना ।
भर्तुराराधनं कुर्याच्चित्तज्ञो मानवः सुखम् ॥२४१॥
रागापरागौ चैवास्य विज्ञेयौ भूतिमिच्छता ।
त्यजेद्विरक्तं नृपतिं रक्ताद्वृत्तिं तु कामयेत् ॥२४२॥
कर्मोपकारयोर्नाशं विपक्षाभ्युदयं तथा ।
आशासंवर्धनं कृत्वा फलनाशं करोति च ॥२४३॥
अकोपोऽपि प्रकोपाभः प्रसन्नोऽपि च निष्फलः ।
वाक्यं समन्दं वदति वृत्तिच्छेदं करोति च ॥२४४॥
प्रवेशवाक्यानुदितौ न संभावयतीत्यथ ।
आराधनासु सर्वासु सुप्तवच्च विचेष्टते ॥२४५॥

कथासु दोषैः क्षिपति वाक्यच्छेदं करोति च ।
लक्ष्यते विमुखश्चैव गुणसङ्कीर्तने कृते ॥२४६॥
दृष्टिं क्षिपत्यथान्यत्र क्रियमाणे च कर्मणि ।
विरक्तलक्षणं श्रुत्वा शृणु रक्तस्य लक्षणम् ॥२४७॥
दृष्ट्वा प्रसन्नो भवति वाक्यं गृह्णाति चादरात् ।
कुशलादिपरिप्रश्ने संप्रयच्छति चासनम् ॥२४८॥
विविक्तदर्शने चास्य रहस्ये नच शङ्कते ।
जायते हृष्टवदनः श्रुत्वा यस्य तु सत्कथाम् ॥२४९॥
अप्रियाण्यपि वाक्यानि तदुक्तान्यभिनन्दति ।
उपायनं च गृह्णाति स्तोकमप्यादरात्तथा ॥२५०॥
कथान्तरेषु स्मरति प्रहृष्टवदनस्तथा ।
इति रक्तस्य कर्तव्या सेवा भृगुकुलोद्वह !
आपत्सु न त्यजेत्पूर्वं विरक्तमपि सेवितम् ॥२५१॥
मित्रं न चापत्सु तथा न भृत्यं
त्यजन्ति ये निर्गुणमप्रमेयम् ।
प्रभुं विशेषेण च ते व्रजन्ति
सुरेन्द्रधामासुरवृन्दजुष्टम् ॥२५२॥

इति श्रीविष्णुधर्मोत्तरे द्वितीयखण्डे मार्कण्डेयवज्रसंवादे अनुजीविवृत्तं नाम पञ्चविंशोऽध्यायः ।

द्वितीयखण्डे षड्विंशोऽध्यायः ।

पुष्कर उवाच—

राजा सहायसंयुक्तः प्रभूतयवसेन्धनम् ।
रम्यमानतसामन्तः पशव्यं देशमावसेत् ॥२५३॥
वैश्यशूद्रजनप्रायमनाहार्यं तथा परैः ।
किञ्चिद्ब्राह्मणसंयुक्तं बहुकर्मकरं तथा ॥२५४॥
अदेवमातृकं कर्मस्वनुरक्तजनान्वितम् ।
करैरपीडितं चापि बहुपुष्पं फलं तथा ॥२५५॥
अगम्यं परचक्राणां तद्वादसहमापदि ।

समदुःखसुखं राज्ञः सततं च प्रिये स्थितम् ॥२५६॥
सरीसृपविहीनं च व्याधितस्करवर्जितम् ।
एवंविधं यथालाभं राजा विषयमावसेत् ॥२५७॥
तत्र दुर्गं नृपः कुर्यात्षण्णामेकतमं बुधः ।
धन्वदुर्गं महीदुर्गं नरदुर्गं तथैव च ॥२५८॥
वार्क्षं चैवाम्बुदुर्गं च गिरिदुर्गं च भार्गव !
सर्वेषामेव दुर्गाणां गिरिदुर्गं प्रशस्यते ॥२५६॥
दुर्गं च परिखोपेतं मृपाट्टालकसंयुतम् ।
शतघ्नीयन्त्रमुख्यैश्च शतशश्च तथा युतम् ॥२६०॥
गोपुरं सकपाटं च तत्र स्यात्सुमनोहरम् ।
सपताकगजारूढो येन राजा विशेत्पुरम् ॥२६१॥
चतस्रश्च तथा तत्र कार्याश्चापणवीथयः ।
एकस्मिंस्तत्र वीथ्यग्रे देववेश्म भवेद् दृढम् ॥२६२॥
वीथ्यग्रे च द्वितीये वै राजवेश्माभिधीयते ।
धर्माधिकरणं कार्यं वीथ्यग्रे च तृतीयके ॥२६३॥
चतुर्थे चैव वीथ्यग्रे गोपुरं च विधीयते ।
आयतं चतुरस्रं वा वृत्तं चाकारयेत्पुरम् ॥२६४॥
मुक्तिहीनं त्रिकोणं च यवमध्यं तथैव च ।
अर्धचन्द्रप्रकारं च वज्राकारं च वर्जयेत् ॥२६५॥
अर्धचन्द्रं प्रशंसन्ति नदीतीरे तु तद्वशात् ।
अन्यत्र तन्न कर्तव्यं प्रयत्नेन विजानता ॥२६६॥
राज्ञः कोशगृहं कार्यं दक्षिणे राजवेश्मनः ।
तस्यापि दक्षिणे भागे गजस्थानं विधीयते ॥२६७॥
गजानां प्राङ्मुखी शाला कर्तव्या चाप्युदङ्मुखी ।
आग्नेये च तथा भागे आयुधागार इष्यते ॥२६८॥
महानसं च धर्मज्ञः कर्मशालास्तथापराः ।
गृहं पुरोधसः कार्यं वामतो राजवेश्मनः ॥२६६॥
मन्त्रिदैवविदां चैव चिकित्साकर्तुरेव च ।
तत्रैव च तथाभागे कोष्ठागारं विधीयते ॥२७०॥
स्थानं गवां तु कर्तव्यं तुरगाणां तथैव च ।

उत्तराभिमुखी श्रेणी तुरगाणां विधीयते ॥२७१॥
प्राङ्मुखी चापि धर्मज्ञ ! परिशेषा विगर्हिता ।
तुरगाश्च तथा धार्याः प्रशस्तैः सार्वरात्रिकैः ॥२७२॥
कुक्कुटान्वानरांश्चैव मर्कटांश्च नराधिपः ।
धारयेदथ शालासु सवत्सां धेनुमेव च ॥२७३॥
अजाश्च धार्या यत्नेन तुरगाणां हितैषिणा ।
गोगजाश्वविशालासु तत्पुरीषस्य निष्क्रमम् ॥२७४॥
अस्तङ्गते न कर्तव्यं देवदेवे दिवाकरे ।
ततस्तत्र यथान्यायं राजा विज्ञाय सारवित् ॥२७५॥
दद्यादावसथस्थानं सर्वेषामनुपूर्वशः ।
योधानां शिल्पिनां चैव सर्वेषामविशेषतः ॥२७६॥
दद्यादावसथान्दुर्गे मन्त्रकालविदां सताम् ।
गोवैद्यानश्ववैद्यांश्च गजवैद्यांस्तथैव च ॥२७७॥
आहरेत भृशं राजा दुर्गे परबलारुजः ।
कुशीलवानां विप्राणां दुर्गे स्थानं विधीयते ॥२७८॥
न बहूनां न तैर्दुर्गे विना कार्यं तथा भवेत् ।
दुर्गे च यन्त्राः कर्तव्या नानाप्रहरणान्विताः ॥२७९॥
सहस्रघातिनो राम ! तैस्तु रक्षा विधीयते ।
दुर्गे द्वाराणि गुप्तानि कार्याण्यपि च भूभुजा ॥२८०॥
सञ्चयश्चात्र सर्वेषां चायुधानां प्रशस्यते ।
धनुषां क्षेपणीयानां तोमराणां च भार्गव ! ॥२८१॥
विचित्राश्चागदा धार्या विषस्य शमनास्तथा ।
रक्षोभूतादिशमनाः पापघ्नाः पुष्टिवर्धनाः ॥२८२॥
कलाविदश्च पुरुषाः पुरे धार्याः प्रयत्नतः ।
भीतान्प्रमत्तान्कुपितांस्तथैव च विमानितान् ।
कुभृत्यानकुलीनांश्च न राजा वासयेत्पुरे ॥२८३॥
यन्त्रायुधाट्टालचयोपपन्नं समग्रधान्यौषधसम्प्रयुक्तम् ।
वणिग्जनैः शोभनमावसेत दुर्गं सुगुप्तं नृपतिस्सदैव ॥२८४॥

इति श्रीविष्णुधर्मोत्तरे द्वितीयखण्डे मार्कण्डेयवज्रसंवादे पुष्कराख्याने
दुर्गसम्पत्तिर्नाम षड्विंशतितमोऽध्यायः ।

द्वितीयखण्डेऽष्टाविंशोऽध्यायः ।

राम उवाच—

राजरक्षारहस्यानि यानि दुर्गे निधापयेत् ।
कारयेद्वा महीभर्ता कथयस्वाशु तानि मे ॥२८५॥

पुष्कर उवाच—

शिरीषोदुम्बरशमीबीजपूरं घृतप्लुतम् ।
क्षुद्योगः कथितो राम ! मासार्धस्य पुरातनैः ॥२८६॥
कशेरुत्पलमूलानि इक्षुमूलं तथा विषम् ।
दूर्वाक्षीरघृतैर्मण्डः सिद्धोऽयं मासिकः परम् ॥२८७॥
शूलप्रोतं नरं प्राप्य तस्यास्थ्नामरणी भवेत् ।
कल्माषवेणुना तत्र जनयेत्तु विभावसुम् ॥२८८॥
गृहे त्रिरपसव्यं तत्क्रियते यत्र भार्गव !
नान्योऽग्निर्ज्वलते तत्र नात्र कार्या विचारणा ॥२८९॥
कर्पासास्थि भुजङ्गस्य तथा निर्मोचनं परम् ।
सर्पनिर्वासने धूपः प्रशस्तः सततं गृहे ॥२९०॥
सान्द्रसत्त्वा च वयसा विद्युद्दग्धा च मृत्तिका ।
तयानुलिप्तं यद्वेश्म नाग्निना दह्यते द्विज ! ॥२९१॥
दिवा च दुर्गे रक्ष्योऽग्निर्वाति वाते विशेषतः ।
विषाच्च रक्ष्यो नृपतिस्तत्र युक्तिं निबोध मे ॥२९२॥
क्रीडानिमित्तं नृपतेर्धार्याः स्युर्मृगपक्षिणः ।
अन्नं च प्राक् परीक्षेत वह्नावथ नरेषु च ॥२९३॥
वस्त्रं पत्रमलङ्कारं भोजनाच्छादने तथा ।
नापरीक्षितपूर्वं तु स्पृशेदपि महीपतिः ॥२९४॥
श्यावास्यवक्त्रः सन्तप्तः सोद्वेगं च परीक्षते ।
विषदेन विषं दत्तं यत्र तत्र निरीक्षते ॥२९५॥
स्रस्तोत्तरीयो विमनाः स्तम्भकुड्यादिभिस्तथा ।
प्रच्छादयति चात्मानं खिद्यते लज्जते तथा ॥२९६॥
भुवं विलिखते ग्रीवां तथा चालयते द्विज !
कण्डूयति च मूर्धानं परिलेह्यधरं तथा ॥२९७॥

क्रियासु त्वरते राम ! विपरीतास्वपि ध्रुवम् ।
एवमादीनि चिह्नानि विषदस्य परीक्षयेत् ॥२९८॥
ततो विचारयेदग्नौ तदन्नं त्वरयान्वितः ।
इन्द्रायुधसवर्णास्तु रूक्षस्फोटसमन्वितः ॥२९९॥
एकावर्तोऽथ दुर्गन्धी भृशं चटचटायते ।
तद्धूमसेवनाज्जन्तोः शिरोरोगश्च जायते ॥३००॥
सविषेऽन्ने निलीयन्ते नच भार्गव ! मक्षिकाः ।
निलीनाश्च विपद्यन्ते दृष्टे च सविषे तथा ॥३०१॥
विरज्यति चकोरस्य दृष्टिर्भार्गवसत्तम !
विकृतिं च स्वरो याति कोकिलस्य तथा द्विज ! ॥३०२॥
गतिः स्खलति हंसस्य भृङ्गराजश्च कूजति ।
क्रौञ्चो मदमथाभ्येति कृकवाकुर्विरौति च ॥३०३॥
विक्रोशति चकोरश्च शारिका वाशते तथा ।
चामीकरोऽन्यतो याति मृत्युं कारण्डवस्तथा ॥३०४॥
मेहते वानरो राम ! ग्लायते जीवञ्जीवकः ।
हृष्टरोमा भवेद् बभ्रुः पृषतश्चैव रोदिति ॥३०५॥
हर्षमायाति च शिखी सविषे दर्शने द्विज !
अन्नं च सविषं राम ! चिरेण च विपच्यते ॥३०६॥
तथा भवत्यतिस्रावं पक्वं पर्युषितोपमम् ।
व्यापन्नरसगन्धं च चन्द्रिकाभिस्तथा युतम् ॥३०७॥
व्यञ्जनानां च शुष्कत्वं द्रवाणां बुद्बुदोद्भवः ।
ससैन्धवानां द्रव्याणां जायते फेनमालिका ॥३०८॥
रसस्य राजिर्नीला स्यात्ताम्रा च पयसस्तथा ।
कोकिलाभा च मद्यस्य तोयस्य च भृगूत्तम ! ॥३०९॥
धान्याम्लस्य तथा कृष्णा कपिला कोद्रवस्य च ।
मधुश्यावा च तक्रस्य नीला पीता तथैव च ॥३१०॥
घृतस्योदकसंकाशा कपोताभा च मस्तुनः ।
हरिता माक्षिकस्यापि तैलस्य च तथारुणा ॥३११॥
फलानामप्यपक्वानां पाकः क्षिप्रं प्रजायते ।
प्रकोपश्चैव पक्वानां माल्यानां म्लानता तथा ॥३१२॥

मृदुता कठिनानां स्यान्मृदूनां च विपर्ययः ।
सूक्ष्मतन्तूपसदनं तथा चैवातिरोमता ॥३१३॥
श्मामभमण्डलता चैव वस्त्राणामविशेषतः ।
लोहानां च मणीनां च मलपङ्कोपदिग्धता ॥३१४॥
अनुलेपनगन्धानां स्नानानां च भृगूत्तम !
विगन्धता च विज्ञेया पर्णानां म्लानता तथा ॥३१५॥
पीता नीला सिता ज्ञेया तथा रामाञ्जनस्य च ।
दन्तकाष्ठत्वचः शान्तास्तन्तुसत्त्वं तथैव च ॥३१६॥
एवमादीनि चिह्नानि विज्ञेयानि भृगूत्तम !
तस्माद्राजा सदा तिष्ठेन्मणिमन्त्रौषधिगणैः ।
आप्तैः संरक्षितो राम ! प्रमादपरिवर्जकैः ॥३१७॥
प्रजातरोर्मूलमिहावनीश-
स्तद्रक्षणाद् वृद्धिमुपैति राष्ट्रम् ।
तस्मात्प्रयत्नेन नृपस्य रक्षा
सर्वेण कार्या भृगुवंशचन्द्र !॥३१८॥

इति श्रीविष्णुधर्मोत्तरे द्वितीयखण्डे मार्कण्डेयवज्रसंवादे राजरक्षावर्णनं नामाष्टाविंशतितमोऽध्यायः ।

द्वितीयखण्डे एक[illegible]तमोऽध्यायः

पुष्कर उवाच—

राजधर्मव्रतं श्रेष्ठं कृत्वा पुरुषविग्रहम् ।
पुरुषान्विनियुञ्जीत चोत्तमाधमकर्मसु ॥३१९॥
ग्रामस्याधिपतिं कुर्याद्दशग्रामाधिपं तथा ।
शतग्रामाधिपं चापि तथैव विषयेश्वरम् ॥३२०॥
तेषां भागविभागश्च भवेत्कर्मानुरूपतः ।
नित्यमेव तथा कार्यं तेषां चारैः परीक्षयेत् ॥३२१॥
ग्रामदोषान् समुत्पन्नान् ग्रामेशः प्रशमं नयेत् ।
अशक्तो देशपालस्य स तु गत्वा निवेदयेत् ॥३२२॥
श्रुत्वा तु देशपालोऽपि तत्र युक्तिमुपाचरेत् ।

सोऽप्यशक्तः शतेशाय यथावद्विनिवेदयेत् ॥३२३॥
शतेशो विषयेशाय सोऽपि राज्ञे निवेदयेत् ।
अशक्तौ शक्तिमान् राम ! स्वयं युक्तिमुपाचरेत् ॥३२४॥
राजा सर्वात्मना कुर्याद्विषये राम ! रक्षणम् ।
वित्तमाप्नोति धर्मज्ञ ! विषयाच्च सुरक्षितात् ॥३२५॥
रिपुघातसमर्थः स्याद्वित्तवानेव पार्थिवः ।
परचक्रोपमर्देषु वित्तवानेव मुच्यते ॥३२६॥
वित्तवानेव सहते सुदीर्घमपि विग्रहम् ।
बहुदण्डानपि परांस्तथा भिन्द्याद्धनाधिपः ॥३२७॥
अन्ने प्राणाः प्रजाः सर्वा धने नच प्रतिष्ठितम् ।
धनवान्धर्ममाप्नोति धनवान्काममश्नुते ॥३२८॥
यस्यार्थस्तस्य मित्राणि यस्यार्थस्तस्य बान्धवः ।
यस्यार्थः स पुमांल्लोके यस्यार्थः सोऽपि पण्डितः॥३२९॥
अर्थेन हि विहीनस्य पुरुषस्याल्पमेधसः ।
विच्छिद्यन्ते क्रियाः सर्वा ग्रीष्मे कुसरितो यथा ॥३३०॥
विशेषो नास्ति लोकेषु पतितस्याधनस्य च ।
पतितानां न गृह्णन्ति दरिद्रो न प्रयच्छति ॥३३१॥
धनहीनस्य भार्यापि नैव स्याद्वशवर्तिनी ।
गुणौघमपि चैवास्य नैव कश्चित्प्रकाशयेत् ॥३३२॥
बान्धवा विनिवर्तन्ते धनहीनात्तथा नरात् ।
यथा पुष्पफलैर्हीनाच्छकुन्ता द्विज ! पादपात् ॥३३३॥
दारिद्र्यमरणे चोभे केषांचित्सदृशे मते ।
सत्यं ह्यसाद्दरिद्रस्य मृत्युः श्रेयान्मते मम ॥३३४॥
कोशं राज्यतरोर्मूलं तस्माद् यत्नं तदर्जने ।
धर्मेणैव ततः कुर्यान्नाधर्मेण कथञ्चन ॥३३५॥
धनैरधर्मसम्प्राप्तैर्यद् दृढं हि पिधीयते ।
तदेव याति विस्तारं विनाशाय दुरात्मनाम् ॥३३६॥
सुकृतस्य पुराणस्य बलेन बलिनां वर !
यद्यधर्मात्फलं शीघ्रं नाप्नुवन्ति दुरात्मनः ॥३३७॥
तथापि पूर्वकर्मान्ते तेन पापेन कर्मणा ।

विनश्यन्ति समूलास्ते सपुत्रधनबान्धवाः ॥३३८॥
नरकेषु तथा तेषां यातना विविधाः स्मृताः ।
बहून्यब्दसहस्राणि ये नृपा राष्ट्रपीडकाः ॥३३६॥
नित्यं राज्ञा सदा भाव्यं गर्भिणीसहधर्मिणा ।
यथा स्वं सुखमुत्सृज्य गर्भस्य सुखमावहेत् ॥३४०॥
गर्भिणी तद्वदेवेह भाव्यं भूपतिना सदा ।
प्रजासुखं तु कर्तव्यं सुखमुद्दिश्य चात्मनः ॥३४१॥
किं यज्ञैस्तपसा तस्य प्रजा यस्य सुरक्षिताः ।
सुरक्षिताः प्रजास्तस्य स्वर्गस्तस्य गृहोपमः ॥३४२॥
अरक्षिताः प्रजा यस्य नरकं तस्य मन्दिरम् ।
राजा षड्भागमादत्ते सुकृताद् दुष्कृतादपि ॥३४३॥
धर्मो नाम महाभाग! सम्पद्रक्षणतत्परः ।
अरक्षितस्तथा सर्वः पापमाप्नोति भार्गव! ॥३४४॥
नैव किञ्चिदवाप्नोति पुण्यभाक्पृथिवीपतिः ।
आपन्नमपि धर्मिष्ठं प्रजा रक्षत्यथापदि ॥३४५॥
तस्माद्धर्मार्थकामेन प्रजा रक्ष्या महीक्षिता ।
सुभगैश्चाथ दुर्वृत्तराजवल्लभतस्करैः ॥३४६॥
भक्ष्यमाणाः प्रजा रक्ष्या कायस्थैश्च विशेषतः ।
रक्षितास्तद्भयेभ्यस्तु प्रजा राज्ञां भवन्ति ताः ॥३४७॥
अरक्षिता सा भवति तेषामेवेह भोजनम् ।
साधुसंरक्षणार्थाय राजा दुष्टनिबर्हणम् ॥३४८॥
तृणानामिव निर्माता सदा कुर्याज्जितेन्द्रियः ।
शास्त्रोक्तं बलिमादद्याद्धर्मं तत्तस्य जीवितम् ॥३४६॥
तस्य संत्यजनं राजा न समृद्धोऽपि कारयेत् ।
आकाराणि च सर्वाणि शुल्कं शास्त्रोदितो बलिः ॥३५०॥
दण्डं विनयनाद्राज्ञो धर्म्यं तत्तस्य जीवितम् ।
धर्ता कराणां सर्वेषां प्रभुरुक्तो महीपतिः ॥३५१॥
निधिं पुराणं सम्प्राप्य केशवं तु प्रवेशयेत् ।
अर्थं ब्राह्मणसात्कुर्याद्धर्मकामो महीपतिः ॥३५२॥
निधिं द्विजोत्तमः प्राप्य गृह्णीयात् सकलं तथा ।

जगतोऽस्य समस्तस्य प्रभुरुक्तो द्विजोत्तमः ॥३५३॥
निधिं ज्ञात्वा पुराणं तु क्षत्रविट्शूद्रयोनयः ।
निवेदयेयुर्भूपाय राजा लब्ध्वापि तं निधिम् ॥३५४॥
चतुर्थमष्टमं चांशं तथा षोडशमं द्विज !
वर्णक्रमेण विसृजेदाख्यातं धर्मकारणम् ॥३५५॥
तेऽपि लब्ध्वा तदा तेन संविभज्य द्विजोत्तमान् ।
शेषेण कुर्युः कामार्थौ विदितौ पृथिवीपतेः ॥३५६॥
प्रकाशविभवो लोके यस्य राज्ञः स भूपतिः ।
अप्रकाशधनो यस्तु नरकं तस्य मन्दिरम् ॥३५७॥
ममेदमिति यो ब्रूयान्निधिं सत्येन मानवः ।
तस्याददीत नृपतिर्भागमब्राह्मणस्य तु ॥३५८॥
चतुर्विंशतिकं राम ! द्वादशं षष्ठमेव च ।
क्षत्रियाश्च तथा वैश्याः शूद्राश्च भृगुनन्दन ! ॥३५९॥
अनृतं च वदन्दण्ड्यः स्ववित्तस्यांशमष्टकम् ।
प्रनष्टस्वामिकं रिक्थं राजा त्र्यब्दं निधापयेत् ॥३६०॥
अर्वाक् त्र्यब्दाद्धरेत्स्वामी परेण नृपतिर्हरेत् ।
ममेदमिति यो ब्रूयादनुयुक्तो यथाविधि ॥३६१॥
सम्पाद्य रूपं द्रव्यादीन् स्वामी तद् द्रव्यमर्हति ।
अवेदयानो नष्टस्य देशं कालं च तत्त्वतः ॥३६२॥
वर्णरूपं प्रमाणं च तत्समं दण्डमर्हति ।
निधिवद्भागमादद्यात्प्रनष्टाधिगतान्नृपः ॥३६३॥
बालदायादिकं रिक्थं तावद्राजा तु पालयेत् ।
यावत्स स्यात्समावृत्तो यावद्वातीतशैशवः ॥३६४॥
बालपुत्रेषु चैवं स्याद्रक्षणं निष्कुलासु च ।
पतिव्रतासु च स्त्रीषु विधवास्वातुरासु च ॥३६५॥
जीवन्तीनां तु तासां ये धारयेयुः स्वबान्धवाः ।
ताञ्छिष्याच्चौरदण्डेन धार्मिकः पृथिवीपतिः ॥३६६॥
सर्वेषामेव वर्णानां चौरैरपहृतं धनम् ।
तत्प्रमाणं स्वकात्कोशाद्दातव्यमविचारयन् ॥३६७॥
ततस्तु पश्चात्कर्तव्यं चौरान्वेषणमञ्जसा ।

चौररक्षाधिकारिभ्यो राजापि तदवाप्नुयात् ॥३६८॥
अहृते च तथा वित्ते हृतमित्येव वादिनम् ।
निर्धनं पार्थिवः कृत्वा विषयात्स्वाद्विवासयेत् ॥३६९॥
न तद्राज्ञा प्रदातव्यं गृहे यत्परिचारकैः ।
प्रच्छरद्भिर्हृतं द्रव्यं कार्यं तत्रान्ववेक्षणम् ॥३७०॥
स्वराष्ट्रपण्यादादद्याद्राजा विंशतिमं द्विज !
शुल्कांशं परदेशाच्च निबोध गदतो मम ॥३७१॥
क्षयव्ययप्रवासांश्च यथायामं द्विजोत्तम !
ज्ञात्वा तु कल्पयेत्तत्र शुल्कांशं पृथिवीपतिः ॥२७२॥
तथा कार्यं यथालाभं वणिजः समवाप्नुयुः ।
पुण्यच्छेदश्च नैव स्यात्स्वदेशे पृथिवीपतेः ॥३७३॥
व्ययं शुल्कप्रवासादि लङ्घयित्वा तथा द्विज !
विंशांशभागमादद्युर्दण्डनीया अतोऽन्यथा ॥३७४॥
दिशि दिश्येकमेव स्याच्छुल्कस्थानं नृपस्य तु ।
तदतिक्रमतो द्रव्यं राजगामि विधीयते ॥३७५॥
दूतानां ब्राह्मणानां च राजाज्ञागामिनां तथा ।
स्त्रीणां प्रव्रजितानां च तारशुल्कं विवर्जयेत् ॥३७६॥
भिन्नकर्षापणं शुल्कं न ग्राह्यं पृथिवीक्षिता ।
तारेषु दाशदोषेण नष्टं दाशात्प्रदापयेत् ॥३७७॥
दैवदोषविनष्टं च नष्टं यस्यैव तस्य तत् ।
शूकधान्येषु षड्भागं शिविधान्येष्वथाष्टकम् ॥३७८॥
राजा बल्यर्थमादद्याद्देशकालानुरूपकम् ।
राजांशभागमादद्याद्राजा पशुहिरण्ययोः ॥३७९॥
गन्धौषधिरसानां च पुष्पमूलफलस्य च ।
पत्रशाकतृणानां च वत्सरेण च चर्मणाम् ३८०॥
वैदलानां च भाण्डानां सर्वस्याश्ममयस्य च ।
षड्भागमेव चादद्याद् ब्राह्मणेभ्यस्तथा करम् ॥३८१॥
तेभ्यस्तद्धर्मलाभेन राज्ञो लाभः परं भवेत् ।
नच क्षुधावसीदेत श्रोत्रियो विषये वसन् ॥३८२॥
यस्य राज्ञस्तु विषये श्रोत्रियः सीदति क्षुधा ।

तस्य सीदति तद्राष्ट्रं दुर्भिक्षव्याधितस्करैः ॥३८३॥
अतवृत्ते तु विज्ञाय वृत्तिं तस्य प्रकल्पयेत् ।
रक्षेच्च सर्वतस्त्वेनं पिता पुत्रमिवौरसम् ॥३८४॥
संरक्ष्यमाणो राज्ञा यः कुरुते धर्मसंग्रहम् ।
तेनायुर्वर्धते राज्ञो द्रविणं राष्ट्रमेव च ॥३८५॥
कर्म कुर्युर्नरेन्द्रस्य मासेनैकं च शिल्पिनः ।
भक्तमात्रेण ये चान्ये स्वशरीरोपजीविनः ॥३८६॥
स्नातानुलिप्ताश्च विभूषिताश्च
वेश्याङ्गना वारविवर्तितेन ।
संवीतगात्राः पृथिवीश्वरस्य
सदाभ्युपासां परितस्त्रिकुर्युः ॥३८७॥

इति श्रीविष्णुधर्मोत्तरे मार्कण्डेयवज्रसंवादे द्वितीयखण्डे रामं प्रति पुष्करोपाख्याने राजधर्मवर्णनो नामैकषष्टितमोऽध्यायः ।

द्विषष्टितमोऽध्यायः ।

पुष्कर उवाच —

धर्मश्चार्थश्च कामश्च पुरुषार्थः परः स्मृतः ।
अन्योन्यरक्षणात्तेषां सेवा कार्या महीक्षिता ॥३८८॥
धर्ममूलोऽर्थविटपस्तथा कामफलो महान् ।
त्रिवर्गपादपस्तस्य रक्षणात्फलभाग्भवेत् ॥३८९॥
धर्माविरोधिनी कार्या कामसेवा सदैव तु ।
मूलच्छेदे भवेन्नाशो विटपस्य फलस्य च ॥३९०॥
कामसेवाविहीनस्य धर्मार्थावपि निष्फलौ ।
ओषधीनां फलार्थाय कीनाशो यत्नवांस्तथा ॥३९१॥
आहारं मैथुनं निद्रा यैर्वृतं सकलं जगत् ।
असेवनादथैतस्य तथैवात्यन्तसेवनात् ॥३९२॥
रोगग्रामो नृणां देहे सम्भवत्यनिदारुणः ।
विश्वासमतिसक्तिश्च तीक्ष्णानां स्त्रीषु वर्जयेत् ॥३९३॥
न चाधिकारे कर्तव्या भूषणाच्छादनाशनैः ।

सुविभक्ताश्च कर्तव्या लालनीयास्तथैव च ॥३९४॥
ज्ञेयौ रागापरागौ च तथा तासां विशेषतः ।
नारी रागवते लोके मानृतेन विशिष्यते ॥३९५॥
विरक्ताभिर्महीपाल ! छद्मना बहवो हताः ।
द्विष्टान्याचरते या तु नाभिनन्दति तत्कथाम् ॥३९६॥
ऐक्यं द्विषद्भिर्व्रजति गर्वं वहति चोद्धता ।
चुम्बिता मार्ष्टि वदनं दत्तं न बहु मन्यते ॥३९७॥
स्वपित्यादौ प्रसुप्तापि तथा पश्चाद्विबुध्यति ।
स्पृष्टा धुनोति गात्राणि कान्तं चैव रुणद्धि या ॥३९८॥
ईषत्स्मितेन वाक्यानि प्रियाण्यपि पराङ्मुखी ।
नयस्यश्रुतवद्या तु जघनं च विगूहति ॥३९९॥
दृष्टे विवर्णवदना मित्रेष्वपि पराङ्मुखी ।
तत्कामितासु च स्त्रीषु मध्यस्थैव च लक्ष्यते ॥४००॥
ज्ञातमङ्गलकालापि न करोति च मण्डनम् ।
या सा विरक्ता रक्ता च निबोध गदतो मम ॥४०१॥
दृष्ट्वैव हृष्टा भवति वीक्षते च पराङ्मुखम् ।
दृश्यमाना तथाऽन्यत्र दृष्टिं क्षिपति चञ्चलाम् ॥४०२॥
तथाप्यपावर्तयति नैव शक्नोत्यशेषतः ।
विवृणोति तथाङ्गानि सुगुह्यान्यपि भार्गव ! ॥४०३॥
गर्हितं च तथैवाङ्गं प्रयत्नेन विगूहते ।
तद्दर्शनेन कुरुते बालालिङ्गनचुम्बनम् ॥४०४॥
आभाष्यमाणा भवति सत्यवाक्या तथैव च ।
स्पृष्टा पुलकितैरङ्गैः सस्वेदैर्वापि भज्यते ॥४०५॥
करोति च तथा राम ! सुलभद्रव्ययाचनम् ।
ततः स्वल्पमपि प्राप्य प्रयाति परमां मुदम् ॥४०६॥
नामसङ्कीर्तनादेव मुदिता बहु मन्यते ।
करजाङ्काङ्कितान्यस्य फलानि प्रेषयत्यपि ॥४०७॥
तत्प्रेषितानि हृदये विन्यस्यत्यपि चादरात् ।
आलिङ्गनैश्च गात्राणि लिम्पन्तीवामृतेन च ॥४०८॥
सुप्ते स्वपित्यथादौ तु तथा तस्य विबुध्यते ।

ऊरू स्पृशति चात्यर्थं सुप्तं चैनं विचुम्बते ॥४०६॥
एवं रक्तां तु विज्ञाय कामयेतात्मवान्नरः ।
कामं च भोजनं सख्यं ज्ञेयाः कृत्रिमपुत्रिकाः ॥४१०॥
स्वीकर्तुमिच्छन्बालायाः क्रीडनादिस्तथैव च ।
गन्धमाल्यप्रदानेन यौवनस्थां वशं नयेत् ॥४११॥
वस्त्रभूषणदानेन तथा यौवनविच्युताम् ।
क्रीडासाधुप्रिया बाला तथा यौवनविच्युता ॥४१२॥
रतिप्रिया तु विज्ञेया तरुणी चोभयप्रिया ।
आत्मसम्भावना स्त्रीषु न कर्तव्या कथञ्चन ॥४१३॥
असूया जायतेऽत्यर्थमात्मसम्भाविते नरे ।
न चासां दर्शनं देयं न चात्यन्तमदर्शनम् ॥४१४॥
उभयेनाप्यथैतासामुत्कण्ठा तु विहन्यते ।
हृद्यैः सुविहितैर्भोगैर्गन्धयुक्तैश्च कौशलैः ।
कार्यमाराधनं स्त्रीणां रतिकामैः सदैव तु ॥४१५॥
एवं सदा यस्तु करोति राम !
स्त्रीचेतसां स्वीकरणं मनुष्यः ।
तस्यान्तराया न भवन्ति किञ्चि-
त्स्त्रीद्वारमासाद्य सदासपत्नः ॥४१६॥

इति श्रीविष्णुधर्मोत्तरे द्वितीयखण्डे मार्कण्डेयवज्रसंवादे रामं प्रति पुष्करोपाख्याने अन्तःपुरचिन्ता नाम द्विषष्टितमोऽध्यायः ।

त्रिषष्टितमोऽध्यायः ।

पुष्कर उवाच –

एवं कुर्यात्सदा स्त्रीणां रक्षणं पृथिवीपतिः ।
नचेमां विश्वसेज्जातु पुत्रमात्रा विशेषतः ॥४१७॥
न स्वपेत्स्त्रीगृहे रात्रौ विश्वासं कृत्रिमं व्रजेत् ।
राजपुत्रस्य रक्षा च कर्तव्या पृथिवीक्षिता ॥४१८॥
आचार्यैश्चास्य कर्तव्यं नित्यं युक्त्यैव रक्षणम् ।
धर्मार्थकाममोक्षाणां धनुर्वेदं च शिक्षयेत् ॥४१९॥
रथेऽश्वे कुञ्जरे चैनं व्यायामं कारयेत्सदा ।

शिल्पानि शिक्षयेच्चैनमाप्तैर्मिथ्याप्रियंवदैः ॥४२०॥
शरीररक्षाव्याजेन रक्षिणोऽस्य नियोजयेत् ।
न चास्य सङ्गो दातव्यः क्रुद्धलुब्धविमानितैः ॥४२१॥
तथा च विनयेदेनं यथा यौवनगं सुखे ।
विषयैर्यैर्न कृष्येत सतां मार्गात्सुदुर्गमात् ॥४२२॥
गुणाधानं न शक्यं तु यस्य कर्तुं स्वभावतः ।
बन्धनं तस्य कर्तव्यं गुप्तदेशे सुखान्वितम् ॥४२३॥
अविनीतकुमारं हि कुलमाशु विशीर्यते ।
अधिकारेषु सर्वेषु विनीतं विनियोजयेत् ॥४२४॥
आदौ स्वल्पे ततः पश्चात्क्रमेणाथ महत्स्वपि ।
मृगया पानमक्षांश्च वर्जयेच्च महीपतिः ॥४२५॥
एतान्संसेवमानास्तु विनष्टाः पृथिवीक्षितः ।
बहवो भृगुशार्दूल ! येषां संख्या न विद्यते ॥४२६॥
दिवास्वापं वृथा वादं विशेषेण विवर्जयेत् ।
वाक्पारुष्यं न कर्तव्यं दण्डपारुष्यमेव च ॥४२७॥
परोक्षनिन्दा च तथा वर्जनीया महीक्षिता ।
अर्थस्य दूषणं राम ! द्विप्रकारं विवर्जयेत् ॥४२८॥
अर्थानां दूषणं चैकं तथा चार्थेन दूषणम् ।
प्राकाराणां समुच्छेदो दुर्गादीनां समक्रिया ॥४२९॥
अर्थानां दूषणं प्रोक्तं विप्रकीर्णत्वमेव च ।
अदेशकाले यद्दानमपात्रे दानमेव च ॥४३०॥
अर्थैस्तु दूषणं प्रोक्तमसत्कर्मप्रवर्तनम् ।
कामः क्रोधो मदो मानं लोभो हर्षस्तथैव च ॥४३१॥
जेतव्यमरिषड्वर्गमाहुस्तु पृथिवीक्षिताम् ।
एतेषां विजयं कृत्वा कार्यो भृत्यजयस्ततः ॥४३२॥
कृत्वा भृत्यजयं राजा पौरजानपदाञ्जयेत् ।
कृत्वा च विजयं तेषां शत्रून्बाह्यांस्ततो जयेत् ॥४३३॥
बाह्याश्च त्रिविधा ज्ञेयास्तुल्यानन्तरकृत्रिमाः ।
गुरवस्ते यथापूर्वं तेषु यत्नः सदा भवेत् ॥४३४॥
पितृपैतामहं मित्रमाश्रितञ्च तथा रिपोः ।

कृत्रिमं च महाभाग ! मित्रं त्रिविधमुच्यते ॥४३५॥
तथापि च गुरुः पूर्वं भवेत्तत्रापि चाश्रितम् ।
स्वाम्यमात्यजनपदा बलं दुर्गं तथैव च ॥४३६॥
कोशो मित्रं च धर्मज्ञ ! सप्ताङ्गं राज्यमुच्यते ।
सप्ताङ्गस्यापि राज्यस्य मूलं स्वामी प्रकीर्तितः ॥४३७॥
तन्मूलत्वात्तथाङ्गानां स तु रक्ष्यः प्रयत्नतः ।
षडङ्गरक्षा कर्तव्या तेन चापि प्रयत्नतः ॥४३८॥
अङ्गेभ्यो यस्त्वथैकस्य द्रोहमाचरतेऽल्पधीः ।
वधस्तस्य तु कर्तव्यः शीघ्रमेव महीक्षिता ॥४३९॥
न राज्ञा मृदुना भाव्यं मृदुर्हि परिभूयते ।
न भाव्यं दारुणेनापि तीक्ष्णादुद्विजते जनः ॥४४०॥
काले मृदुर्यो भवति काले भवति दारुणः ।
राजा लोकद्वयापेक्षी तस्य लोकद्वयं भवेत् ॥४४१॥
भृत्यैः सह महीपालः परिहासं विवर्जयेत् ।
भृत्याः परिभवन्तीह नृपं हर्षवशङ्गतम् ॥४४२॥
व्यसनानि च सर्वाणि भूपतिः परिवर्जयेत् ।
लोकसंग्रहणार्थाय कृतकव्यसनी भवेत् ॥४४३॥
शौण्डीर्यस्य नरेन्द्रस्य नित्यमुत्क्षिप्तचेतसः ।
जनो विरागमायाति सदा दुःसेव्यभावतः ॥४४४॥
स्मितपूर्वाभिभाषी स्यात्सर्वस्यैव महीपतिः ।
वध्येष्वपि महाभागो भ्रुकुटिं न समाचरेत् ॥४४५॥
भाव्यं धर्मभृतां श्रेष्ठ ! स्थूललक्ष्येण भूभुजा ।
स्थूललक्ष्यस्य वशगा सर्वा भवति मेदिनी ॥४४६॥
अदीर्घसूत्रश्च भवेत्सर्वकर्मसु पार्थिवः ।
दीर्घसूत्रस्य नृपतेः कर्महानिर्ध्रुवं भवेत् ॥४४७॥
रागे दर्पे च माने च द्रोहे पापे च कर्मणि ।
अप्रिये चैव वक्तव्ये दीर्घसूत्रः प्रशस्यते ॥४४८॥
राज्ञा संवृतमन्त्रेण सम्भाव्यं द्विजसत्तम !
तस्यासंवृतमन्त्रस्य ज्ञेयाः सर्वापदो ध्रुवाः ॥४४९॥
कृतान्येव हि कर्माणि ज्ञायन्ते यस्य भूपतेः ।

नारब्धानि महाभाग ! तस्य स्याद्वसुधा वशे ॥४५०॥
मन्त्रमूलं सदा राज्यं तस्मान्मन्त्रः सुरक्षितः ।
कर्तव्यः पृथिवीपालैर्मन्त्रभेदभयात्सदा ॥४५१॥
मन्त्रवित्साधितो मन्त्रः संयतानां सुखावहः ।
मन्त्रभेदेन बहवो विनष्टाः पृथिवीक्षितः ॥४५२॥
आकारैरिङ्गितैर्गत्या चेष्टया भाषितेन च ।
नेत्रवक्त्रविकारैश्च ज्ञायतेऽन्तर्गतं मनः ॥४५३॥
न यस्य कुशलैस्तस्य वशे सर्वा वसुन्धरा ।
भवतीह महीभर्तुः सदा भार्गवनन्दन ! ॥४५४॥
नैकस्तु मन्त्रयेन्मन्त्रं न राजा बहुभिः सह ।
बहुभिर्मन्त्रयेत्कामं राजा मन्त्रान्पृथक् पृथक् ॥४५५॥
मन्त्रिणामपि नो कुर्यान्मन्त्री मन्त्रप्रकाशनम् ।
कस्यचित्क्वचिद्विश्वास्यो भवतीह सदा नृणाम् ॥४५६॥
निश्चयश्च तथा मन्त्रे कार्य एकेन सूरिणा ।
भवेद्वा निश्चयावाप्तिः परबुद्ध्युपजीवनात् ॥४५७॥
एकस्यैव महीभर्तुर्भूयः कार्ये सुनिश्चिते ।
ब्राह्मणान्पर्युपासीत त्रयीं राम ! सुनींश्च तान् ॥४५८॥
नासच्छास्त्रवतो मूढांस्ते हि लोकस्य कण्टकाः ।
वृद्धांश्च नित्यं सेवेत विप्रान्वेदविदः शुचीन् ॥४५९॥
तेभ्यो हि शिक्षेद्विनयं विनीतात्मा हि नित्यशः ।
समग्रां वशगां कुर्यात्पृथिवीं नात्र संशयः ॥४६०॥
बहवोऽविनयाद्भ्रष्टा राजानः सपरिच्छदाः ।
वनस्था अपि राज्यानि विनयात्प्रतिपेदिरे ॥४६१॥
त्रैविद्येभ्यस्त्रयीं विद्यां दण्डनीतिं च शाश्वतीम् ।
आन्वीक्षिकीं चात्मविद्यां वार्तारम्भं च लोकतः ॥४६२॥
इन्द्रियाणां जये योगं समातिष्ठेद्दिवानिशम् ।
जितेन्द्रियो हि शक्नोति वशे स्थापयितुं प्रजाः ॥४६३॥
यजेत राजा क्रतुभिर्बहुभिश्चाप्तदक्षिणैः ।
धर्मार्थं चैव विप्रेभ्यो दद्याद्भोगान्धनानि च ॥४६४॥
सांवत्सरिकमाप्तैश्च राष्ट्रादाहारयेद्बलिम् ।

स्याच्चाम्नायपरो लोके वर्तेत पितृवन्नृषु ॥४६५॥
आवृत्तानां गुरुकुलाद् द्विजानां पूजनं भवेत् ।
नृपाणामक्षयो ह्येष निधिर्ब्राह्मो विधीयते ॥४६६॥
न तं स्तेना नाप्यमित्रा हरन्ति न च नश्यति ।
तस्माद्राज्ञा निधातव्यो ब्राह्मणेष्वक्षयो निधिः ॥४६७॥
समोत्तमाधमै राजा ह्याहूतः पालयन्प्रजाः ।
न निवर्तेत संग्रामात्क्षात्रं व्रतमनुस्मरन् ॥४६८॥
संग्रामेष्वनिवर्तित्वं प्रजानां परिपालनम् ।
शुश्रूषा ब्राह्मणानां च राज्ञां निःश्रेयसं परम् ॥४६९॥
कृपणानां च वृद्धानां विधवानां च योषिताम् ।
योगं क्षेमं च वृत्तिं च तथैव परिकल्पयेत् ॥४७०॥
वर्णाश्रमव्यवस्था तु तथा कार्या विशेषतः ।
स्वधर्मप्रच्युतान् राजा स्वधर्मे विनियोजयेत् ॥४७१॥
आश्रमेषु यथाकालं तैलभाजनभोजनम् ।
स्वयमेव नयेद्राजा सत्कृतान्नवमन्य च ॥४७२॥
तापसे सर्वकार्याणि राज्यमात्मानमेव च ।
निवेदयेत्प्रयत्नेन देववच्चैनमर्चयेत् ॥४७३॥
द्वे प्रज्ञे वेदितव्ये च ऋज्वी वक्रा च मानवैः ।
शठाञ्ज्ञात्वा न सेवेत प्रतिबोधं तथा गतान् ॥४७४॥
नास्य छिद्रं परो विद्याच्छिद्राच्छिद्रं परस्य तु ।
गूहेत्कूर्म इवाङ्गानि रक्षेद्विवरमात्मनः ॥४७५॥
न विश्वसेदविश्वस्ते विश्वस्ते नातिविश्वसेत् ।
विश्वासाद्भयमुत्पन्नं मूलान्यपि निकृन्तति ॥४७६॥
विश्वासयेच्चापि परं तत्त्वभूतेन हेतुना ।
बकवच्चिन्तयेदर्थान्सिंहवच्च पराक्रमेत् ॥४७७॥
वृकवच्चावलुम्पेत शशवच्च विनिष्पतेत् ।
दृढप्रहारी च भवेत्तथा सूकरवन्नृपः ॥४७८॥
चित्राकारश्च शिखिवद् दृढभक्तस्तथाश्ववत् ।
भवेच्च मधुराभाषी शुककोकिलवन्नृपः ॥४७९॥
काकशंकी भवेन्नित्यं नाज्ञातवसतिं वसेत् ।

नापरीक्षितपूर्वं च भोजनं शयनं स्पृशेत् ॥४८०॥
वस्त्रं पुष्पमलङ्कारं यच्चान्यन्मनुजोत्तम !
न गाहेज्जनसंबाधं न चाज्ञातं जलाशयम् ॥४८१॥
नापरीक्षितपूर्वैस्तु पुरुषैराप्तकारिभिः ।
नारोहेत्कुञ्जरं व्यालं नादान्तं तुरगं तथा ॥४८२॥
नाविज्ञातां स्त्रियं गच्छेन्नैव चाशुभवाजसम् ।
नारोहेद्विषमां नावं नापरीक्षितनाविकाम् ॥४८३॥
ये चास्य भूमिं जयतो भवेयुः परिपन्थिनः ।
तानानयेद्वशं सर्वान्सामादिभिरुपक्रमैः ॥४८४॥
यथा न स्यात्कृशीभावः प्रजानामनवेक्षया ।
तथा राज्ञा विधातव्यं स्वराष्ट्रं परिरक्षता ॥४८५॥
मोहाद्राजा स्वराष्ट्रं यत्कर्षयत्यनवेक्षया ।
सोऽचिराद् भ्रंशते राज्याज्जीविताच्च सबान्धवः ॥४८६॥
भृतो वत्सो जातबलः कर्मयोग्यो यथा भवेत् ।
तथा राष्ट्रं महाभाग ! भृतं कर्मसहद्भवेत् ॥४८७॥
यो राष्ट्रमनुगृह्णाति राजा सुपरिरक्षति ।
तं प्रजाश्चोपजीवन्ति विन्दते स महत्फलम् ॥४८८॥
दुह्याद्धिरण्यं धान्यं च मही राज्ञा सुरक्षिता ।
नित्यं स्वेभ्यः परेभ्यश्च यथा माता यथा पिता ॥४८९॥
गोपिनो हि सदा कार्याः संविभागाः प्रियाणि च ।
अजस्रमुपयोक्तव्यं फलं तेभ्यस्तथैव च ॥४९०॥
सर्वं कर्मेदमायत्तं विधाने दैवपौरुषे ।
तयोर्दैवमचिन्त्यं हि पौरुषे विद्यते क्रिया ॥४९१॥
एवं महीं पालयतोऽस्य भर्तु-
र्लोकानुरागः परमो भवेत्तु ।
लोकानुरागप्रभवा हि लक्ष्मी-
र्लक्ष्म्या भवेच्चैव परश्च लोकः ४९२॥

इति श्रीविष्णुधर्मोत्तरे द्वितीयखण्डे मार्कण्डेयवज्रसंवादे रामपुष्करसंवादे राजधर्मवर्णनं नाम पञ्चषष्टितमोऽध्यायः ।

———

द्वितीयखण्डे षट्षष्टितमोऽध्यायः

राम उवाच—

दैवे पुरुषकारे च किं ज्यायस्तद्वदस्व मे ।
अत्र मे संशयो देव ! संशयच्छिद्भवांस्तथा ॥४९३॥

पुष्कर उवाच—

स्वमेव कर्म दैवाख्यं विद्धि देहान्तरार्जितम् ।
तस्मात्पौरुषमेवेह श्रेष्ठमाहुर्मनीषिणः ॥४९४॥
प्रतिकूलं तथा दैवं पौरुषेण विहन्यते ।
मङ्गलाचारयुक्तानां नित्यमुत्थानशालिनाम् ॥४९५॥
येषां पूर्वकृतं कर्म सात्त्विकं मनुजोत्तम !
पौरुषेण विना तेषां केषाञ्चित् दृश्यते फलम् ॥४९६॥
कर्मणा प्राप्यते लोके राजन् ! सम्यक् तथा फलम् ।
पौरुषेणाप्यते राम ! मार्गितव्यं फलं नरैः ॥४९७॥
दैवमेव न जानाति नरः पौरुषवर्जितः ।
तस्मात्सत्कार्ययुक्तस्य दैवं तु सफलं भवेत् ॥४९८॥
पौरुषं चैव सम्पत्त्या काले फलति भार्गव !
दैवं पुरुषकारश्च कालश्च मनुजोत्तम ! ॥४९९॥
त्रयमेतन्मनुष्यस्य पिण्डितं स्यात्फलावहम् ।
कृषिवृष्टिसमायोगाद् दृश्यन्ते फलसिद्धयः ॥५००॥
तास्तु कालेन दृश्यन्ते नैवाकाले कथञ्चन ।
तस्मात्सदैव कर्तव्यं सधर्मं पौरुषं नृभिः ॥५०१॥
विपत्तावपि यस्येह परलोके फलं ध्रुवम् ।
नालसाः प्राप्नुवन्त्यर्थान्न च दैवपरायणाः ।
तस्मात्सर्वप्रयत्नेन पौरुषे यत्नमाचरेत् ॥५०२॥
त्यक्त्वालसान्दैवपरान्मनुष्या-
नुत्थानयुक्तान्पुरुषान् हि लक्ष्मीः ।
अन्विष्य यत्नाद् वृणुते द्विजेन्द्र !
तस्मात्समुत्थानवता हि भाव्यम् ॥५०३॥

इति श्रीविष्णुधर्मोत्तरे द्वितीयखण्डे मार्कण्डेयवज्रसंवादे रामपुष्करसंवादे
पुरुषकाराध्यायो नाम षट्षष्टितमोऽध्यायः ।

द्वितीयखण्डे सप्तषष्टितमोऽध्यायः।

राम उवाच—

उपायांस्त्वं समाचक्ष्व सामपूर्वान्महाद्युते !
लक्षणं च तथा तेषां प्रयोगं वरुणात्मज ! ॥५०४॥

पुष्कर उवाच—

सामभेदौ तथा राम ! दण्डं च मनुजोत्तम !
उपेक्षा च तथा माया इन्द्रजालं च भार्गव ! ॥५०५॥
प्रयोगाः कथिताः सप्त तन्मे निगदतः शृणु ।
द्विविधं कथितं साम तथ्यं चातथ्यमेव च ॥५०६॥
तत्रातथ्यमसाधूनामाक्रोशायैव जायते ।
तत्र साधुप्रियं ते च सामसाध्या न राम ! ते ॥५०७॥
महाकुलीना ऋजवो धर्मनिष्ठा जितेन्द्रियाः ।
सामसाध्या न चातथ्यं तेषु साम प्रयोजयेत् ॥५०८॥
तथ्यं च साम कर्तव्यं कुलशीलादिवर्णनम् ।
तथा तदुभयं राम ! कृतानां चैव वर्णनम् ॥५०९॥
अनयैव तथा युक्त्या कृतज्ञख्यापनं स्वकम् ।
एवं सान्त्वेन कर्तव्या वशगा धर्मतत्पराः ॥५१०॥
साम्ना यद्यपि रक्षांसि गृह्णन्तीति परा श्रुतिः ।
तथाप्येतदसाधूनां प्रयुक्तं नोपकारकम् ॥५११॥
अतिसन्धिकमित्येव पुरुषं सामवादिनम् ।
असाधवो विजानन्ति तस्मात्तत्तेषु वर्जितम् ॥५१२॥
ये शुद्धवंशा ऋजवः प्रतीता
धर्मे स्थिताः सत्यपरा विनीताः ।
ते सामसाध्याः पुरुषाः प्रदिष्टा
मानोन्नता ये सततं च राम ! ॥५१३॥

इति श्रीविष्णुधर्मोत्तरे द्वितीयखण्डे मार्कण्डेयवज्रसंवादे सामविधिर्नाम सप्तषष्टितमोऽध्यायः ।

———

द्वितीयखण्डेऽष्टषष्टितमोऽध्यायः ।

पुष्कर उवाच—

परस्परं तु ये दुष्टाः क्रुद्धा भीतावमानिताः ।
तेषां भेदं प्रयुञ्जीत भेदसाध्या हि ते मताः ॥५१४॥
ये तु येनैव दोषेण परस्माद्राम ! बिभ्यति ।
ते तु तद्दोषपातेन भेदनीया भृशं ततः ॥५१५॥
आत्मीयाद्दर्शयेदाशां परस्माद्दर्शयेद्भयम् ।
एवं हि भेदयेद्भिन्नान्यथावद्वशमानयेत् ॥५१६॥
संहिता हि विना भेदं शक्रेणापि सुदुःसहा ।
भेदमेव प्रशंसन्ति तस्मान्नयविशारदाः ॥५१७॥
स्वमुखेनाथ यद्भेदं भेदं परमुखेन च ।
परीक्ष्य साधु मन्येऽहं भेदं परमुखाच्छ्रुतम् ॥५१८॥
भेद्याः स्वकार्यमुद्दिश्य कुशलैर्ये हि भेदिताः ।
भेदितास्ते विनिर्दिष्टा नैव राजार्थवादिभिः ॥५१९॥
अन्तःकोपबहिःकोपौ यत्र स्यातां महीक्षिताम् ।
अन्तःकोपो महांस्तत्र नाशनः पृथिवीक्षिताम् ॥५२०॥
सामन्तकोपो बाह्यस्तु कोपः प्रोक्तो मनीषिभिः ।
महिषीयुवराजाभ्यां तथा सेनापतेर्द्विज ! ॥५२१॥
अमात्यान्मन्त्रिपुत्राच्च राजपुत्रात्तथैव च ।
अन्तःकोपो विनिर्दिष्टो दारुणः पृथिवीक्षिताम् ॥५२२॥
बहिःकोपे समुत्पन्ने सुमहत्यपि पार्थिवः ।
शुद्धान्तस्तु महाभाग ! शीघ्रमेव जयेदरीन् ॥५२३॥
अपि शक्रसमो राजा कोपेनान्तर्विनश्यति ।
स्वान्तःकोपः प्रयत्नेन तस्माद्रक्ष्यो नरेश्वरैः ॥५२४॥
परान्तःकोपमुत्पाद्य भेदेन विजिगीषुणा ।
रक्ष्यश्चैव प्रयत्नेन ज्ञातिभेदस्तथात्मनः ॥५२५॥
ज्ञातयः परितप्यन्ते सततं यद्यपि श्रिया ।
तथापि तेषां कर्तव्यं सुगम्भीरेण चेतसा ॥५२६॥
ग्रहणं दानमानाभ्यां भेदस्तेभ्यो भयङ्करः ।

नाज्ञातिरनुगृह्णाति नाज्ञातिः स्नेहमिच्छति ॥५२७॥
ज्ञातिभिर्भेदनीयास्तु रिपवस्तेन पार्थिवैः ॥५२८॥
भिन्ना हि शक्या रिपवः प्रभूताः
स्वल्पेन सैन्येन निहन्तुमाजौ ।
सुसंहितेनाथ ततस्तु भेदः
कार्यो रिपूणां नयशास्त्रविद्भिः ॥५२९॥

इति श्रीविष्णुधर्मोत्तरे द्वितीयखण्डे मार्कण्डेयवज्रसंवादे भेदविधानं नामाष्टषष्टितमोऽध्यायः ॥

द्वितीयखण्डे एकोनसप्ततितमोऽध्यायः ।

पुष्कर उवाच—

सर्वेषामप्युपायानां दानं श्रेष्ठतमं मतम् ।
सुदत्तेनैव भवति दानेनोभयलोकजित् ॥५३०॥
स नास्ति राम ! दानेन वशगो यो न जायते ।
दानवान् गोचरं नैति तथा रामापदां क्वचित् ॥५३१॥
दानवानेव शक्नोति संहतान्भेदितुं परान् ।
यद्यप्यलुब्धा गम्भीराः पुरुषाः सागरोपमाः ॥५३२॥
न गृह्णन्ति तथाप्येते जायन्ते पक्षपातिनः ।
अन्यत्रापि कृतं दानं करोत्यन्यांस्तथा परैः ॥५३३॥
उपायेभ्यः प्रयच्छन्ति दानं श्रेष्ठतमं नराः ।
दानं संवर्धनं श्रेष्ठं दानं श्रेयस्करं परम् ।
दानवानेव लोकेषु पुत्रवत्प्रीयते सदा ॥५३४॥
न केवलं दानपरा जयन्ति
भूलोकमेकं पुरुषप्रवीर !
जयन्ति ते राम ! सुरेन्द्रलोकं
सुदुर्जयं यद्विबुधाधिवासम् ॥५३५॥

इति श्रीविष्णुधर्मोत्तरे द्वितीयखण्डे मार्कण्डेयसंवादे दानविधिर्नामैकोनसप्ततितमोऽध्यायः ॥

द्वितीयखण्डे सप्ततितमोऽध्यायः ।

पुष्कर उवाच—

न शक्या ये स्वयं कर्तुं चोपायत्रितयेन तु ।
दण्डेन तान् वशीकुर्याद्दण्डो हि वशकृत्परः ॥५३६॥
सम्यक्प्रणयनं तस्य सदा कार्यं महीक्षिता ।
धर्मशास्त्रानुसारेण सुसहायेन धीमता ॥५३७॥
तस्य सम्यक्प्रणयनं त्रिदशानपि पीडयेत् ।
वानप्रस्थांश्च धर्मज्ञ ! निर्द्देशान्निष्परिग्रहान् ॥५३८॥
स्वदेशे परदेशे च धर्मशास्त्रविशारदः ।
समीक्ष्य प्रणयेद्दण्डं सर्वं दण्डे प्रतिष्ठितम् । ५३९॥
आश्रमी यदि वा वर्णी पूज्यो वाऽथ गुरुर्महान् ।
नादण्ड्यो राम ! राज्ञा तु यः स्वधर्मे न तिष्ठति ॥५४०॥
अदण्ड्यान्दण्डयन् राजा दण्ड्यांश्चैवाप्यदण्डयन् ।
इह राज्यपरिभ्रष्टो नरकं प्रतिपद्यते ॥५४१॥
तस्माद्राज्ञा विनीतेन धर्मशास्त्रानुसारतः ।
दण्डप्रणयनं कार्यं लोकानुग्रहकाम्यया ॥५४२॥
यत्र श्यामो लोहिताक्षो दण्डश्चरति निर्भयः ।
प्रजास्तत्र न मुह्यन्ति नेता चेत्साधु पश्यति ॥५४३॥
बालवृद्धातुरयतिद्विजास्त्रीविधवाबलाः ।
मात्स्यन्यायेन भक्ष्येरन् यदि दण्डो न पालयेत् ॥५४४॥
देवदैत्योरगगणाः सिद्धभूतपतत्त्रिणः ।
उत्क्रामेयुः स्वमर्यादां यदि दण्डो न पालयेत् ॥५४५॥
एष ब्रह्माभिशापेषु सर्वप्रहरणेषु च ।
सर्वविक्रमकोपेषु व्यवसाये च तिष्ठति ॥५४६॥
पूज्यन्ते दण्डिनो देवा न पूज्यन्ते त्वदण्डिनः ।
न ब्रह्माणं न धातारं न पूषार्यमणावपि ॥५४७॥
यजन्ते मानवाः केचित्प्रशान्ताः सर्वकर्मसु ।
रुद्रमग्निं च शक्रं च सूर्याचन्द्रमसौ तथा ॥५४८॥
विष्णुं देवगणांश्चान्ये दण्डिनः पूजयन्ति हि ।

दण्डः शास्ति प्रजाः सर्वा दण्ड एवाभिरक्षति ॥५४९॥
दण्डः सुप्तेषु जागर्ति दण्डं धर्मं विदुर्बुधाः ।
राजदण्डभयादेव पापाः पापं न कुर्वते ॥५५०॥
यमदण्डभयादन्ये परस्परभयादपि ।
एवं सांसिद्धिके लोके सर्वं दण्डे प्रतिष्ठितम् ॥५५१॥
अन्धे तमसि मज्जेयुर्यदि दण्डो न पालयेत् ।
तस्माद्दम्यान्दमयति उद्दण्डान् दण्डयत्यपि ।
दमनाद्दण्डनाच्चैव तस्माद्दण्डं विदुर्बुधाः ॥५५२॥
दण्डस्य भीतैस्त्रिदशैः समस्तै-
र्भागो धृतः शूलधरस्य यज्ञे ।
चक्रुः कुमारं ध्वजिनीपतिं च
वरं शिशूनां च भयाद् बलस्थम् ॥५५३॥

इति श्रीविष्णुधर्मोत्तरे द्वितीयखण्डे मार्कण्डेयवज्रसंवादे पुष्करोपाख्याने दण्डप्रशंसा नाम सप्ततितमोऽध्यायः ।

द्वितीयखण्डे एकसप्ततितमोऽध्यायः ।

राम उवाच—

दण्डप्रणयनार्थाय राजा सृष्टः स्वयंभुवा ।
देवभागानुपादाय सर्वभूताभिगुप्तये ॥५५४॥
तेजसा यदयं कश्चिन्नैव शक्नोति वीक्षितुम् ।
तदा भवति लोकेषु राजा भास्करवत्प्रभुः ॥५५५॥
यदस्य दर्शने लोकः प्रसादमुपगच्छति ।
नयनानन्दकारित्वात्तदा भवति चन्द्रमाः ॥५५६॥
चारैर्यदायं व्याप्नोति सर्वलोकं यदृच्छया ।
तदा भवति लोकेषु राजा देवः समीरणः ॥५५७॥
यदाऽपराधिनां चैव विधत्ते निग्रहं नृपः ।
तदा भवति लोकेषु राजा वैवस्वतः सदा ॥५५८॥
यदा भवति माहात्म्यात् क्रुद्धबुद्धान्नरान्नृपः ।
अनिच्छन्नपि लोकेषु तदा भवति पावकः ॥५५९॥

करोति च यदा दानं धनानां सर्वतो नृपः ।
विसर्गार्थं सुरश्रेष्ठ ! तदा भवति वित्तदः ॥५६०॥
यदा च धनधाराभिर्वर्षन् प्लावयते जगत् ।
तदा स वरुणः प्रोक्तो राजा नयविशारदैः ॥५६१॥
क्षमाबलेन मनसा धारयन्सकलाः प्रजाः ।
अविशेषेण धर्मज्ञ ! पार्थिवः पार्थिवो भवेत् ॥५६२॥
यदाधिपत्येन जनान्समग्रान्परिरक्षति ।
तदा भवति देवेन्द्रः सर्वभूतानुकम्पिता ॥५६३॥
उत्साहमन्त्रशक्तिर्या प्रभुशक्तिश्च दैविकी ।
चतस्रः शक्तयस्तत्र वैष्णव्यः परिकीर्तिताः ॥५६४॥
कः समर्थः प्रजाः पातुं विना वैष्णवतेजसा ।
तिस्रस्तु शक्तयस्तस्य वैष्णव्यः पृथिवीपतेः ॥५६५॥
इति श्रीविष्णुधर्मोत्तरे द्वितीयखण्डे मार्कण्डेयवज्रसंवादे रामवाक्याध्यायो
नामैकसप्ततितमोऽध्यायः ।

द्वितीयखण्डे पञ्चचत्वारिंशदुत्तरशततमोऽध्यायः ।

राम उवाच—

किं नु कृत्यतमं राज्ञस्तन्ममाचक्ष्व पृच्छतः ।
राज्यतन्त्रं कथं राज्ञा पालनीयं विपश्चिता ॥५६६॥

पुष्कर उवाच—

सप्ताङ्गस्य च राज्यस्य भावयुक्तेन भूभृता ।
एतावदेव कर्तव्यं राज्ञा तन्त्रं भृगूत्तम ! ॥५६७॥
साम दानं तथा दुर्गं कोशो दण्डस्तथैव च ।
मित्रं जनपदश्चैव राज्यं सप्ताङ्गमुच्यते ॥५६८॥
सप्ताङ्गस्य च राज्यस्य विघ्नकर्तॄन्विवासयेत् ।
अहितान्घातयेद्राजा क्षिप्रमेवाविचारयन् ॥५६९॥
सप्ताङ्गस्य च राज्यस्य वृद्धिः कार्या सुमण्डले ।
मण्डलेषु च सर्वेषु कर्षणीया महीक्षिता ॥५७०॥

राम उवाच—

मण्डलानि समाचक्ष्व विजिगीषोर्यथाविधि ।
यान्याश्रित्य नृपैः कार्यं सन्धिविग्रहचिन्तनम् ॥५७१॥

पुष्कर उवाच—

आत्ममण्डलमेवात्र प्रथमं मण्डलं भवेत् ।
समन्तात्तस्य विज्ञेया रिपवो मण्डलस्य तु ॥५७२॥
अधिकृत्याभियोज्यं तु तत्रापि शृणु कल्पनम् ।
अभियोज्यः स्मृतः शत्रुस्तत्रापि च प्रतीक्षिता ॥५७३॥
तत्परस्तु सुहृज्ज्ञेयो मित्रं मित्ररिपुस्तथा ।
एतत्पुरस्तात्कथितं पश्चादपि निबोध मे ॥५७४॥
पार्ष्णिग्राहस्ततः पश्चात्ततस्त्वाक्रन्द उच्यते ।
आसारस्तु ततोऽप्यन्यस्त्वाक्रन्दासार उच्यते ॥५७५॥
जिगीषोः शत्रुयुक्तस्य वियुक्तस्य तथा द्विज !
निग्रहानुग्रहे शक्तो मध्यस्थः परिकीर्तितः ॥५७६॥
निग्रहानुग्रहे शक्तः सर्वेषामपि यो भवेत् ।
उदासीनः स कथितो बलवान्पृथिवीपतिः ॥५७७॥
एतावदेव ते राम ! प्रोक्तं द्वादशराजकम् ।
नात्रापि निश्चयः शक्यो वक्तुं मनुजपुङ्गव ! ॥५७८॥
नास्ति जात्या रिपुर्नाम मित्रं नाम न विद्यते ।
सामर्थ्ययोगाज्जायन्ते मित्राणि रिपवस्तथा ॥५७९॥
त्रिविधा रिपवः प्रोक्ताः कुल्यानन्तरकृत्रिमाः ।
पूर्वः पूर्वो गुरुस्तेषां दुश्चिकित्स्यतमो मतः ॥५८०॥
अनन्तरोऽपि यः शत्रुः सोऽपि मे कृत्रिमो मतः ।
पार्ष्णिग्राहो भवेद्राजा शत्रोर्मित्राभियोगिनः ॥५८१॥
पार्ष्णिग्राहमुपायैस्तु शमयेच्च तथा स्वकम् ।
मित्रेण शत्रोरुच्छेदं न शंसन्ति पुरातनाः ॥५८२॥
मित्रं हि शत्रुतामेति सामन्तत्वादनन्तरम् ।
शत्रुं जिगीषुरुच्छिन्द्यात्स्वयं शक्नोति चेद्यदि ॥५८३॥
प्रतापवृद्धौ तेनास्य न मित्राज्जायते भयम् ।
नान्यथा पृथिवीं जेतुं शक्त्या राम ! जिगीषुणा ॥५८४॥

प्रतापवृद्धिः कर्तव्या तस्माद्राज्ञा यथा तथा ।
यथास्य नोद्विजेल्लोके विश्वासश्च यथा भवेत् ॥५८५॥
जिगीषुर्धर्मविजयी तथा लोकं वशं नयेत् ।
यः स्यादधर्मविजयी तस्मादुद्विजते जनः ।
प्राप्यापि वसुधां कृत्स्नां न चिरं श्रियमश्नुते ॥५८६॥
धर्मेण यशो भवतीह वृद्धि-
र्धर्मेण वृद्धिश्च तथापरत्र ।
धर्मेण लब्धा वसुधा जितारि-
र्भुक्त्वा चिरं नाकमनुप्रयाति ॥५८७॥

इति श्रीविष्णुधर्मोत्तरे द्वितीयखण्डे मार्कण्डेयवज्रसंवादे रामं प्रति पुष्करोपाख्याने राज्यमण्डलवर्णनं नाम पञ्चचत्वारिंशदुत्तरशततमोऽध्यायः ॥

द्वितीयखण्डे षट्चत्वारिंशदुत्तरशततमोऽध्यायः ।

राम उवाच—

सामभेदौ तथा प्रोक्तौ दानदण्डौ तथैव च ।
दण्डः सुदेशे कथितः परदेशे ब्रवीहि मे ॥५८८॥

पुष्कर उवाच—

द्विविधः कथितो दण्डः परदेशे पुरातनैः ।
प्रकाशश्चाप्रकाशश्च तं निबोध द्विजोत्तम ! ॥५८९॥
लुण्ठनं ग्रामघातश्च सस्यघातस्तथैव च ।
चतुरङ्गेण दण्डेन परेषां च तथा वधः ॥५९०॥
प्रकाशः कथितो दण्डः प्रत्यक्षं वह्निदीपनम् ।
अप्रकाशो विषं वह्निर्गूढैश्च पुरुषैर्वधः ॥५९१॥
दूषणं यवसादीनामुदकानां च दूषणम् ।
रसक्रियाश्च विविधाः सुभगा भेदनादिकम् ॥५९२॥
एवमादीनि कार्याणि परचक्रे महोक्षिता ।
स्वराष्ट्रे च द्विजश्रेष्ठ ! दूषणं बलिनामपि ॥५९३॥
चत्वार एते कथिता उपायाः
प्रधानभूता भुवि पार्थिवानाम् ।

अतः परं ते कथयामि राम !

शेषास्त्रयस्ते न मयेरिता ये ॥५६४॥

इति श्रीविष्णुधर्मोत्तरे द्वितीयखण्डे मार्कण्डेयवज्रसंवादे दण्डप्रणयनवर्णनो नाम षट्चत्वारिंशदुत्तरशततमोऽध्यायः ॥

द्वितीयखण्डे सप्तचत्वारिंशदुत्तरशततमोऽध्यायः ।

पुष्कर उवाच—

अभिमन्येत नृपतिरनेन मम विग्रहे ।
अनर्थायानुबन्धः स्यात्सन्धिना च तथा भवेत् ॥५६५॥
साम लज्जास्पदं चात्र दानं चात्र क्षयार्थकम् ।
भेदे दण्डेऽनुबन्धः स्यात्तदा पक्षं समाश्रयेत् ॥५६६॥
अवज्ञोपहतस्तत्र राज्ञा कार्यो रिपुर्भवेत् ।
उपेक्षयैव धर्मज्ञ ! श्रेयसे तव सा स्मृता ॥५६७॥
उपेक्षया यत्र तु शक्यमर्थं
क्षयव्ययवाया समता न तत्र ।
कार्यं भवेद् ब्राह्मणविग्रहेण
लज्जास्पदेनाप्यथ सन्धिना वा ॥५६८॥

इति श्रीविष्णुधर्मोत्तरे द्वितीयखण्डे मार्कण्डेयवज्रसंवादे रामं प्रति पुष्करोपाख्याने उपेक्षावर्णनो नाम सप्तचत्वारिंशदुत्तरशततमोऽध्यायः ।

द्वितीयखण्डेऽष्टचत्वारिंशदुत्तरशततमोऽध्यायः ।

पुष्कर उवाच—

उत्पातैरनृतैः कार्यं परस्योद्वेजनं नृपैः ।
अरातिशिबिरस्यात्र वसतिर्यस्य पक्षिणः ॥५६९॥
स्थूलस्य तस्य पुच्छस्थां कृत्वोल्कां विपुलां द्विज !
विसृज्यैनं ततस्तीरमुल्कापातं प्रदर्शयेत् ॥६००॥
अनेनैवात्र सारेण बुद्ध्या निश्चित्य यत्नतः ।
उत्पातानि तथान्यानि दर्शनीयानि पार्थिवैः ॥६०१॥
उद्वेजनं तथा कुर्यात्कुहकैर्द्विविधैर्द्विषाम् ।

सांवत्सरा अहार्यस्य नाशं ब्रूयुः परस्य च ॥६०२॥
जिगीषुः पृथिवीराज्ये तेन चोद्वेजयेत्परान् ।
दैवतानां प्रसादानि कीर्तनीयानि तस्य तु ॥६०३॥
स स्वप्नलाभांश्च तथा जिगीषुः परिकीर्तयेत् ।
दुःस्वप्नलाभं च तथा परेषामिति निश्चयः ॥६०४॥
आगतं नो मित्रबलं प्रहरध्वमभीतवत् ।
एवं ब्रूयाद्रणे प्राप्ते मया भग्नाः परे इति ॥६०५॥
क्ष्वेडाः किलकिलाशब्दं मम शत्रुर्हतस्तथा ।
देवाज्ञाबृंहितो राजा सन्नद्धः समरं प्रति ॥६०६॥
एवंप्रकारा द्विजवर्य ! मायाः
कार्या नरेन्द्रैररिपु प्रहृष्टैः ।
मायाहतः शत्रुरथ प्रसह्य
शक्यः सुखं हन्तुमदीनसत्त्वः ॥६०७॥

इति श्रीविष्णुधर्मोत्तरे द्वितीयखण्डे मार्कण्डेयवज्रसंवादे रामं प्रति पुष्करोपाख्याने उपाधिवर्णनं नामाऽष्टचत्वारिंशदुत्तरशततमोऽध्यायः ।

द्वितीयखण्डे एकोनपञ्चाशदुत्तरशततमोऽध्यायः ।

पुष्कर उवाच—

चतुरङ्गं बलं राजा मायाजालेन दर्शयेत् ।
सहायार्थमनुप्राप्तान्दर्शयेत्त्रिदिवौकसः ॥६०८॥
रक्तवृष्टिश्च संदर्श्या परेषां शिविरं प्रति ।
छिन्नानि रिपुशीर्षाणि प्रासादाग्रेषु दर्शयेत् ॥६०९॥
आधित्सतासन्धिमहीनसत्त्व !
कार्यं भवेद्राम ! महेन्द्रजालम् ।
वक्ष्यामि तच्चोपनिषत्सु तुभ्यं
योगानि चान्यानि जयावहानि ॥६१०॥

इति श्रीविष्णुधर्मोत्तरे मार्कण्डेयवज्रसंवादे इन्द्रजालवर्णनो नामैकोनपञ्चाशदुत्तरशततमोऽध्यायः ।

द्वितीयखण्डे पञ्चाशदुत्तरशततमोऽध्यायः ।

पुष्कर उवाच—

सन्धिश्च विग्रहश्चैव द्वैगुण्यं कथितं बुधैः ।
यदाश्रित्य तथैवान्यैः षाड्गुण्यं परिकीर्तितम् ॥६११॥
सन्धिश्च विग्रहश्चैव यानमासनमेव च ।
द्वैधीभावं संश्रयं च षाड्गुण्यं परिकीर्तितम् ॥६१२॥
पणाबन्धः स्मृतः सन्धिरपकारस्तु विग्रहः ।
जिगीषोः शत्रुविषये यानं यात्रा विधीयते ॥६१३॥
विग्रहेऽपि स्वके देशे स्थितिरासनमुच्यते ।
बलार्धेन प्रयाणं तु द्वैधीभावं तदुच्यते ॥६१४॥
उदासीने मध्यमे वा संश्रयात्संश्रयः स्मृतः ।
समेन सन्धिरन्वेष्यो हीनेन च बलीयसः ॥६१५॥
हीनेन विग्रहः कार्यः स्वयं राज्ञा बलीयसा ।
तत्रापि तस्य पार्ष्णिस्तु बलीयान्न समाश्रयेत् ॥६१६॥
आसीनः कर्मविच्छेदं शक्तः कर्तुं रिपुर्यदा ।
अशुद्धपार्ष्णिर्बलवान्द्वैधीभावं समाश्रयेत् ॥६१७॥
बलिना निगृहीतस्तु यो मन्येतेन पार्थिवः ।
संश्रयस्तेन कर्तव्यो गुणानामधमो गुणः ॥६१८॥
बहुक्षयव्ययायासं तेषां यानं प्रकीर्तितम् ।
बहुलाभकरम्भ स्यात्तदा राम ! समाश्रयेत् ॥६१९॥
सर्वशक्तिविहीनस्तु तदा कुर्यात्तु संश्रयम् ॥६२०॥
एवं च बुद्ध्वा नृपतिर्गुणानां
काले च देशे च तथा विभागे ।
समाश्रयेद् भार्गववंशमुख्यं
चैतावदुक्तं नृपतेस्तु कार्यम् ॥६२१॥

इति श्रीविष्णुधर्मोत्तरे द्वितीयखण्डे मार्कण्डेयवज्रसंवादे रामं प्रति पुष्करोपाख्याने षाड्गुण्यवर्णनो नाम पञ्चाशदुत्तरशततमोऽध्यायः ।

———

द्वितीयखण्डे एकपञ्चाशदुत्तरशततमोऽध्यायः ।

राम उवाच—

अजस्रं कर्म मे ब्रूहि राज्ञां राजीवलोचन !
यच्च कार्यं नरेन्द्राणां तथा च प्रतिवत्सरम् ॥६२२॥

पुष्कर उवाच—

द्विमुहूर्तविशेषायां रात्रौ निद्रां त्यजेन्नृपः ।
वेणुवीणामृदङ्गानां पटहानां च निःस्वनैः ॥६२३॥
वन्दिनां निःस्वनैश्चैव तथा मङ्गलवादिनाम् ।
ततः पश्येन्महीपालो गूढांश्च पुरुषान्निशि ॥६२४॥
विज्ञायन्ते न ये लोका तदीया इति केनचित् ।
आयव्ययस्य श्रवणं ततः कार्यं यथाविधि ॥६२५॥
वेगोत्सर्गं ततः कृत्वा राजा स्नानगृहं व्रजेत् ।
दत्ताभ्यङ्गः प्रदोषे तु कल्पमुत्सादितस्ततः ॥६२६॥
स्नानं कुर्यात्ततः पश्चाद्दन्तधावनपूर्वकम् ।
सौषधैर्मन्त्रपूतैस्तु पानीयैर्विविधैः शुभैः ॥६२७॥
सन्ध्यामुपास्य प्रयतः कृतजप्यः समाहितः ।
अग्न्यागारं प्रविश्याथ वह्नीन पश्येत्पुरोधसा ॥६२८॥
हुतान् सम्यक् ततः कुर्याद्वासुदेवस्य चार्चनम् ।
दुःस्वप्नशमनं कर्म तत्र कुर्यात्पुरोहितः ॥६२९॥
स्वयं चौपसदे वह्नौ पवित्रां जुहुयान्नृपः ।
तर्पयेदुदकैर्देवान् पितॄनथ यथाविधि ॥६३०॥
दद्याद् द्विजातये धेनुं सवत्सां च सकाञ्चनाम् ।
शक्त्या धनैः पूजयित्वा दत्ताशीः सततं द्विजैः ॥६३१॥
अनुलिप्तस्ततः स्रग्वी सुवासाश्चाप्यलङ्कृतः ।
दर्पणे च मुखं पश्येत्ससुवर्णे च सर्पिषि ॥६३२॥
आज्यं प्रसन्नं सुरभि यदि स्याद्विजयो भवेत् ।
दीयमाने च दुर्गन्धे पतिते च भयं भवेत् ॥६३३॥
विकृतं चेन्मुखं पश्येद्राजा मृत्युमवाप्नुयात् ।
सुप्रभं च यदा पश्येत्तदा तस्य शुभं भवेत् ॥६३४॥
ततस्तु शृणुयाद्राजा सांवत्सरमुखोद्गतम् ।

दिवसे तिथिनक्षत्रे सर्वाशुभविनाशनम् ॥६३५॥
भिषजां च वचः कुर्यात्ततस्त्वारोग्यवर्धनम् ।
मङ्गलालम्भनं कृत्वा ततः पश्येद् गुरून्नृपः ॥६३६॥
कृत्वाशीर्गुरुभिः पश्चाद्राजा गच्छेत्समन्ततः ।
तत्रस्थान्ब्राह्मणान्पश्येदमात्यान्मन्त्रिणस्तथा ॥६३७॥
प्रकृतीश्च महाभाग ! प्रतीहारनिबोधनः ।
तत्रेतिहासश्रवणं कुर्यात्किञ्चिदतन्द्रितः ॥६३८॥
ततः कार्यार्थिनां कुर्याद् यथाधीः कार्यनिर्णयम् ।
व्यवहारांस्ततः पश्येत्समो भूत्वारिमित्रयोः ।
त्यक्त्वा सभां ततः कुर्यान्मन्त्रं तु सह मन्त्रिभिः ॥६३९॥
यत्रास्य कश्चित्तं मन्त्रं शृणुयान्न कथञ्चन ।
एकेन सह तं कुर्यान्न कुर्याद् बहुभिः सह ॥६४०॥
नच मूर्खैर्न चानाप्तैस्तथा नाधार्मिकैर्नृपः ।
मन्त्रं स्वधिष्ठितं कुर्याद् येन राष्ट्रं न धावति ॥६४१॥
राज्ञां विनाशमूलस्तु कथितो मन्त्रविभ्रमः ।
नाशहेतुर्भवेन्मन्त्रः कुप्रयुक्तस्त्वमन्त्रवत् ॥६४२॥
मन्त्रे सुनिश्चिते सिद्धिः कथिता पृथिवीक्षिताम् ।
क्रियमाणानि कर्माणि यस्य वेत्ति न कश्चन ॥६४३॥
कृतान्येव विजानाति स राजा पृथिवीपतिः ।
पृथक् च मन्त्रिभिर्मन्त्रं कृतं वै संहितैः पुनः ॥६४४॥
विचार्यमात्मनः साधु पश्चात्तत्र समाश्रयेत् ।
प्रज्ञाभिमानी नृपतिर्न मन्त्रिवचने रतः ॥६४५॥
क्षिप्रं विनाशमायाति तडागमिव काजलम् ।
आकारगूहनैः राज्ञो मन्त्ररक्षा परा मता ॥६४६॥
आकारैरिङ्गितैः प्राज्ञा मन्त्रं जानन्ति पण्डिताः ।
सांवत्सराणां वैद्यानां मन्त्रिणां वचने रतः ॥६४७॥
राजा विभूतिमाप्नोति चिरं यशसि तिष्ठति ।
त एनं मृगयासक्तं धारयन्ति विपश्चितः ।६४८॥
स्त्रीषु माने तथाक्षेषु वृथा ज्यायांश्च भार्गव !
करप्रणयने सक्तं हिंसायां च नराधिपम् ॥६४९॥

तथा परोक्षनिन्दायां बलवद्विग्रहेऽपि च ।
अन्येषु चाप्यनर्थेषु प्रसक्तं वारयन्ति तम् ॥६५०॥
मन्त्रं कृत्वा ततः कुर्याद् व्यायामं पृथिवीपतिः ।
रथे नागे तथैवाश्वे खड्गे धनुषि चाऽप्यथ ॥६५१॥
अन्येषु चैव शस्त्रेषु नियुद्धेषु ततः परम् ।
पद्भ्यामुद्वर्तितः स्नातः पश्येद्विष्णुं सुपूजितम् ॥६५२॥
हुतं च पावकं पश्येद्विप्रान्पश्येत् सुपूजितान् ।
स्वामिनो दक्षिणाभिश्च पूजितान् भृगुनन्दन ! ॥६५३॥
ततोऽनुलिप्तः सुरभिः स्रग्वी रुचिरभूषणः ।
सुवासा भोजनं कुर्याद् गीतं च शृणुयात्तदा ॥६५४॥
आप्तं परीक्षितं वह्नौ मृगपक्षीङ्गितैस्तथा ।
पूर्वं परीक्षितं चान्यैर्जाङ्गुल्या चाभिमन्त्रितम् ॥६५५॥
विषघ्नांश्च मणीन् राजा धारयन्नौषधीस्तथा ।
भुक्त्वा गृहीतताम्बूलः परिक्रम्य विशेषतः ॥६५६॥
शयने वामपार्श्वेन ततः शास्त्राणि चिन्तयेत् ।
कोष्ठागारायुधागारान् प्रति चाम्र्यं च वाहनम् ॥६५७॥
योधांश्च दृष्ट्वा चान्वास्या ततः सन्ध्या च पश्चिमा ।
कार्याणि चिन्तयित्वा च प्रेषयित्वा ततश्चरान् ।
अन्तःपुरचरो भूत्वा लघु भुक्त्वा तथा हितम् ॥६५८॥
सवेणुवीणापटहस्वनेन
संसेवेत निद्रां कृतपूर्वरक्षाम् ।
एतद् यशस्यं हि नराधिपाना-
माजस्रिकं ते कथितं विधानम् ॥६५९॥

